Gadya Sangraha Series No. 1.

KADAMBARI SANGRAHA.

OF

Pandit R. V. KRISHNAMACHARIAR,

(ABHINAVA BHATTA BANA)

Superintendent of Sanskrit School, Madras,

Late Senior Professor, Sanskrit College, Tiruvadi, and

S. P. G. College, Trichinopoly.

EDITED BY

Pandit M. DURAISWAMI IYANGAR,

(AYURVEDA BHUSHANA)

MADRAS:

SADANANDANILAYA PRESS.

1916.

Price, Rs. 1—8—0.

गद्यसंग्रहकल्पलतायाः प्रथमा मञ्जरी ।

॥ कादम्बरीसंग्रहः ॥

श्रीमत्कुक्कुडक्रोडपौरस्त्यराजधानीभूषण
विद्वत्कविकुलतिलकश्रीमानविक्रमसामूतिरिमहाराजास्थानप्रतिवर्ष-
प्रचलितसहृदयसमागमसमाजसंमानित
"अभिनवभट्टबाणशब्दतर्कालंकारविद्याभूषण"
बिरुदभाजा
वात्स्यचक्रवर्तिना
रायंपेट्टै - कृष्णमाचार्येण
समुद्धृत्य संकलितः ।

मद्रनगरस्थे
सदानन्दनिलयमुद्रायन्त्रालये
संमुद्रितः
(द्वितीयं मुद्रणम्)

१९१६.

PREFACE.

There are not many prose works in Sanskrit literature; so much so, that this paucity is generally believed to be the cause of Sanskrit not being a spoken language. Though this is not the place for an examination of the correctness of this theory, there is no denying the fact that the number of prose works in Sanskrit can be counted on one's fingers. It is also undisputed that of all the authors of extant Sanskrit Prose works, Bana is the most famous and even among Bana's works, Kadambari is admittedly by far the best in point of style, diction, majesty and flow. Its plot is most skilfully woven; its style is most elegant and musical. Its discriptions are always realistic and its characters are life-like and consistent to a very unusual degree. The feelings and emotions delineated in it are quite natural. In short it is one of the ornaments of Indian classical literature; its study invigorates its readers and refreshes the depressed. On his representation of Kadambari in particular, Bana has spent all his wealth of observation, fullness of imagery and keenness of sympathy.* His flight of imagination is such that even after the most exhaustive description he feels that it is not enough and so adds the words इत्येतानि चान्यानि च।

Even such a masterpiece is, I am afraid, not widely read and appreciated. In the midst of the multifarious subjects to wich he has to direct his attention, the student has not the time enough for a patient

study of the whole work. In some cases it may be the inability to comprehend the force of a work which has always attracted several of the best intellects of the East. Even some Pandits allege that since Kadambari does not treat of any of the acknowledged sacred personages with the Puranas as its background, it is not worth their while to waste their precious time and energy on a study of this book. True it is, it would have been far better if Bana had taken his theme from any of the several Puranas which form the fountain for almost all the classical Sanskrit works. But this story, taken as it is with slight modifications of names from the Brihatkatha, was evidently chosen since it tallied with the author's own life-story in the guise of that of the parrot Vaisampayana. This fact will be clear from a perusal of both Kadambari and Harshacharita.

Though the Uttarabhaga or the second part which is a continuation of the story by the author's son, is not as great a masterpiece as the Purvabhaga, still it may safely be said that only the son of Bana could have completed the story as he has done.

For the past ten years I have been a close student of Kadambari and every time I read it, I found new and hidden meanings of several passages which did not strike me before. So much was I struck with this richness of meaning and wealth of imagination that I was constantly trying to find out some method whereby I could present it to the public in such a manner that the readers might appreciate its real worth without getting tired of the long and verbose descriptions contained in it. In one of my several

interviews with Rao Bahadur M. Rangachariar avl., Professor of Sanskrit and Comparative Philology, Presidency college, Madras, he suggested to me the idea of condensing the ancient Sanskrit Prose works, especially Kadambari and Harshacharita, in such a way as to suit modern tastes, preserving at the same time as much as possible the very words of the original. Accordingly I most eagerly worked out the idea, since it solved the problem I was brooding upon for a long time, with the result that I am now able to present this, the first of the Gadya Sangraha series, to the public. I may also inform my readers that the 2nd No. of the series *viz.*, Harshacharita Sangraha is in the press and will appear shortly.

In this Kadambari Sangaraha I have eliminated all such descriptive portions as are unnecessarily long, all pun upon words which are rather uninteresting and also all repetitions which do not exemplify the author's thorough mastery of the Sanskrit language and his skill in using felicitous expressions as opportunity affords. But I have used throughout, the very words of Bana (just altering the forms of the verbs wherever the work of compilation necessitated it) retaining all such descriptive passages, and elegant similes and metaphors as will interest modern readers. As far as possible I have retained all passages conversational as well as delineative of feelings and emotions. I regret much that pressure of space compelled me to strike out some portions of that fine piece of successful realism *viz.* Sukanasa's advice to Chandrapida (which, by the way, is a masterly review of the dangers to which men in exalted posi-

tions are of necessity exposed) as also of the excellent description of the old Dravida Dharmika.

I have tried my best to keep up in this compilation, the elegance and the charm of the original; how far I have succeeded in my earnest endeavours, I leave my readers to judge. In this connection I may be permitted to print here the letter of Rao Bahadur M. Rangachariar Avl. written after a perusal of this work.

TRIPLICANE,
15-3-06.

MY DEAR PANDIT,

I am so glad that you have been able to carry out my suggestion regarding the *Kadambari Sangraha* so well. From what I have known of your work, I believe it will prove of great use in the hands of Sanskrit students and make it easy for them to appreciate the story as well as the style of *Kadambari.*

Yours with sincere regards,
M. RANGACHAR.

If my humble work achieves the above purpose, if it finds a place in the hands of every Sanskrit student and creates in him a taste for the style of Kadambari, I would consider myself amply rewarded for my labours.

I have generally followed the readings adopted by Dr. Peterson in his edition of Kadambari, which, I may say, is very carefully edited.

TRICHINOPOLY.
21-3-1906.

R. V. KRISHNAMACHARIAR.

॥ श्रीः ॥

॥ कादम्बरीसंग्रहः ॥

आसीदशेषनरपतिशिरःसमभ्यर्चितशासनः, पाकशासन इवापरः, चतुरुदधिमालामेखलाया भुवो भर्ता, प्रतापानुरागावनतसमस्तसामन्तचक्रः, कर्ता महाश्चर्याणाम्, आहर्ता क्रतूनाम्, आदर्शः सर्वशास्त्राणाम्, उत्पत्तिः कलानाम्, कुलभवनं गुणानाम्, आश्रयो रसिकानाम्, राजा शूद्रको नाम।

यश्च मनसि धर्मेण, कोपे यमेन, प्रसादे धनदेन, प्रतापे वह्निना, भुजे भुवा, दृशि श्रिया, वाचि सरस्वत्या, मुखे शशिना, बले मरुता, प्रज्ञायां सुरगुरुणा, रूपे मनसिजेन, तेजसि सवित्रा च वसता, सर्वदेवमयस्य प्रकटितविश्वरूपाकृतेरनुकरोति भगवतो नारायणस्य।

तस्य च राज्ञो जलावगाहनायातजयकुञ्जरकुम्भसिन्दूरसंध्यायमानसलिलया वेत्रवत्या सरिता परिगता विदिशाभिधाना नगरी राजधान्यासीत्।

स तस्यामवजिताशेषभुवनमण्डलतया विगतराज्यचिन्ताभारनिर्वृतः, वलयमिव लीलया भुजेन भुवनभारमुद्वहन्, अमरगुरुमपि प्रज्ञयोपहसद्भिरनेककुलक्रमागतैरसकृदालोचितनीतिशास्त्रनिर्मलमनोभि-

रलुब्धैः स्निग्धैः प्रबुद्धैश्चामात्यैः परिवृतः, समानवयोविद्यालंकारैरग्राम्यपरिहासकुशलैरिङ्गिताकारवेदिभिः केसरिकिशोरकैरिव विक्रमैकरसैरपि विनयव्यवहारिभिरात्मनः प्रतिबिम्बैरिव राजपुत्रैः सह रममाणः प्रथमे वयसि सुखमतिचिरमुवास। तस्य चातिविजिगीषुतया महासत्त्वतया च तृणमिव लघुवृत्ति स्त्रैणमाकलयतः प्रथमे वयसि वर्तमानस्यापि रूपवतोऽपि संतानार्थिभिरमात्यैरपेक्षितस्यापि वनिताव्यतिकरस्योपरि द्वेष इवासीत्। सत्यपि लावण्यवति विनयवत्यन्वयवति हृदयहारिणि चावरोधजने, स कदाचित्स्वयमारब्धमृदङ्गवाद्यः संगीतकप्रसङ्गेन, कदाचिन्मृगयाव्यापारेण, कदाचित्काव्यप्रबन्धरचनेन, कदाचिच्छास्त्रालापेन, कदाचिदाख्यानकाख्यायिकेतिहासपुराणाकर्णनेन, कदाचिदालेख्यविनोदेन, कदाचिद्वीणया, कदाचिद्दर्शनागतमुनिजनचरणशुश्रूषया, कदाचिदक्षरच्युतकमात्राच्युतकबिन्दुमतीगूढचतुर्थपादप्रहेलिकाप्रदानादिभिः, वनितापराङ्मुखः सुहृत्परिवृतो दिवसमनयत्। यथैव च दिवसम्, एवमारब्धविविधक्रीडापरिहासचतुरैः सुहृद्भिरुपेतो निशामनैषीत्।

एकदा तु नातिदूरोदिते भगवति सहस्रमरीचिमालिनि राजानमास्थानमण्डपगतमङ्गनाजनविरुद्धेन वामपार्श्वावलम्बिना कौक्षेयकेण भीषणरमणीयाकृतिः प्रतीहारी समुपसृत्य क्षितितलनिहितजानुकरकमला सविनयमब्रवीत्—"देव, द्वारस्थिता सुरलोकमारोहतस्त्रिशङ्कोरिव कुपितशतमखहुंकारनिपतिता राजलक्ष्मीर्दक्षिणापथादागता चाण्डालकन्यका पञ्जरस्थं शुकमादाय देवं विज्ञापयति – 'सकलभुवनतलसर्वरत्नानामुदधिरिवैकभाजनं देवः। विहंगमश्चायमाश्चर्यभूतो निखिलभुवनतलरत्नमिति कृत्वा देवपादमूलमादायागताहमिच्छामि देवदर्शनसुख-

मनुभवितुम्' इति। एतदाकर्ण्य देवः प्रमाणम्'' इत्युक्त्वा विरराम। उपजातकुतूहलस्तु राजा समीपवर्तिनां राज्ञामालोक्य मुखानि 'को दोषः। प्रवेश्यताम्' इत्यादिदेश।

अथ प्रतीहारी नरपतिवचनानन्तरमुत्थाय तां मातङ्गकुमारीं प्रावेशयत्। प्रविश्य च सा नरपतिसहस्रमध्यवर्तिनम्, अवलम्बितस्थूलमुक्ताकलापस्य कनकशृङ्खलानियमितमणिदण्डिकाचतुष्टयस्य गगनसिन्धुफेनपटलपाण्डुरस्य नातिमहतो दुकूलवितानस्याधस्तादिन्दुकान्तमणिपर्यङ्किकानिषण्णम्, उद्धूयमानकनकदण्डचामरकलापम्, अमृतफेनधवले गोरोचनालिखितहंसमिथुनसनाथपर्यन्ते चारुचामरपवनप्रनर्तितदशे दुकूले वसानम्, आतसुरभिचन्दनानुलेपनधवलितोरःस्थलम्, उपरिविन्यस्तकुङ्कुमस्थासकम्, अमलकलधौतपट्टायतमष्टमीचन्द्रशकलाकारमूर्णासनाथं ललाटदेशमुद्वहन्तम्, अपरिमितपरिवारजनमप्यद्वितीयम्, अविरतप्रवृत्तदानमप्यमदम्, राजानमद्राक्षीत्।

आलोक्य च सा दूरस्थितैव वेणुलतामादाय नरपतिप्रबोधनार्थमसकृत्सभाकुट्टिममाजघान; येन सकलमेव तद्राजकमेकपदे तेन वेणुलताध्वनिना युगपदावलितवदनमवनिपालमुखादाकृष्य चक्षुस्तदभिमुखमासीत्।

अवनिपतिस्तु दूरात् 'आलोक्य' इत्यभिधाय प्रतीहार्या निर्दिश्यमानां ताम् अनवरतकृतव्यायामतया यौवनापगमेऽप्यशिथिलशरीरसंधिना पुरुषेणाधिष्ठितपुरोभागाम्, आकुलाकुलकाकपक्षधारिणा कनकशलाकानिर्मितं पञ्जरमुद्वहता चाण्डालदारकेणानुगम्यमानाम्, आगुल्फावलम्बिना नीलकञ्चुकेनाच्छन्नशरीराम्, उपरि रक्तांशुकरचितावगुण्ठ-

नाम्, मेखलादाम्ना परिगतजघनस्थलाम्, अतिस्थूलमुक्ताफलघटितेन शुचिना हारेण कृतकण्ठग्रहाम्, श्रियमिव हस्तस्थितकमलशोभाम्, यक्षाधिपलक्ष्मीमिवालकोद्भासिनीम्, अचिरोपरूढयौवनामतिशयरूपाकृतिमनिमेषलोचनो ददर्श।

समुपजातविस्मयस्य चाभून्मनसि महीपतेः—'अहो विधातुरस्थाने रूपनिष्पादनप्रयत्नः। तथा हि—यदि नामेयमात्मरूपोपहसिताशेषरूपसंपदुत्पादिता, किमर्थमपगतस्पर्शे कृतं कुले जन्म। मन्ये च, मातङ्गजातिस्पर्शदोषभयादस्पृशतेयमुत्पादिता प्रजापतिना; अन्यथा कथमियमक्लिष्टता लावण्यस्य। न हि करतलस्पर्शक्लेशितानामवयवानामीदृशी भवति कान्तिः' इत्येवमादि चिन्तयन्तमेव राजानमीषदवगलितकर्णपल्लवावतंसा प्रगल्भवनितेव कन्यका प्रणनाम। कृतप्रणामाया च तस्यां मणिकुट्टिमोपविष्टाया स पुरुषस्तं विहङ्गमादाय पञ्जरगतमेव किंचिदुपसृत्य राज्ञे न्यवेदयत्; अब्रवीच्च—'देव, विदितसकलशास्त्रार्थः, वेदिता गीतश्रुतीनाम्, काव्यनाटकाख्यायिकाख्यानकप्रभृतीनामपरिमितानां सुभाषितानामध्येता स्वयं च कर्ता, गजतुरगपुरुषस्त्रीलक्षणाभिज्ञः, सकलभूतलरत्नभूतोऽयं वैशम्पायनो नाम शुकः; सर्वरत्नानां चोदधिरिव देवो भाजनमिति कृत्वैनमादायास्मत्स्वामिदुहिता देवपादमूलमायाता। तदयमात्मीयः क्रियताम्' इत्युक्त्वा नरपतेः पुरो निधाय पञ्जरमसावपससार।

अपसृते च तस्मिन् स विहंगराजो राजाभिमुखो भूत्वा समुन्नमय्य दक्षिणं चरणमतिस्पष्टवर्णस्वरसंस्कारया गिरा कृतजयशब्दो राजानमुद्दिश्यार्यामिमां पपाठ—

स्तनयुगमश्रुस्नातं समीपतरवर्ति हृदयशोकाग्नेः ।
चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम् ॥

राजा तु तां श्रुत्वा संजातविस्मयः सहर्षमासन्नवर्तिनमतिवयसमग्रजन्मानमखिलमन्त्रिमण्डले प्रधानममात्यं कुमारपालितनामानमब्रवीत्—'श्रुता भवद्भिरस्य विहंगमस्य स्पष्टता वर्णोच्चारणे, स्वरे च मधुरता? प्रथमं तावदिदमेव महदाश्चर्यम्, यदयमसङ्कीर्णवर्णप्रविभागामभिव्यक्तमात्रानुस्वारसंस्कारयोगा विशेषसंयुक्तां परिस्फुटाक्षरा गिरमुदीरयति। तत्र पुनरपरम्—अभिमतविषये तिरश्चोऽपि मनुजस्येव संस्कारवतो बुद्धिपूर्वा प्रवृत्तिः। तथा हि—अनेन समुत्क्षिप्तदक्षिणचरणेनोच्चार्य जयशब्दमियमार्या मामुद्दिश्यातिस्फुटाक्षरं गीता। प्रायेण हि पक्षिणः पशवश्च भयाहारनिद्रासंज्ञामात्रवेदिनो भवन्ति। इदं तु महच्चित्रम्' इत्युक्तवति भूभुजि कुमारपालितः किंचित्स्मितवदनो नृपमवादीत्—'देव, किमत्र चित्रम्। एते हि शुकशारिकाप्रभृतयो विहंगमविशेषा यथाश्रुतां वाचमुच्चारयन्तीत्यधिगतमेव देवेन। तत्राप्यन्यजन्मोपात्तसंस्कारानुबन्धेन वा पुरुषप्रयत्नेन वा संस्कारातिशय उपजायत इति नातिचित्रम्। अन्यत्—एतेषामपि पुरा पुरुषाणामिवातिपरिस्फुटाभिधाना वागासीत्। अग्निशापात्त्वपरिस्फुटालापता शुकानामुपजाता, करिणां च जिह्वापरिवृत्तिः' इति। एवमुच्चारयत्येव तस्मिन्नशिशिरकिरणमम्बरतलस्य मध्यमारूढमावेदयन्नाडिकाच्छेदप्रहतपटुपटहनादानुसारी मध्याह्नशङ्खध्वनिरुदतिष्ठत्। तमाकर्ण्य च समासन्नस्नानसमयो विसर्जितराजलोकः क्षितिपतिरास्थानमण्डपादुत्तस्थौ।

अथ चलति महीपतावन्योन्यमतिरभससंचलनचालिताङ्गदपु-

त्रभङ्गमकरकोटिपाटितांशुकपटानाम्, गमनप्रणामलालसानामहमहमिकया, वक्षःस्थलप्रेङ्खोलितहारलतानाम्, उत्तिष्ठतामासीदतिमहान्संभ्रमो महीपतीनाम्। इतश्चेतश्च निष्पतन्तीनां स्कन्धदेशावसक्तचामराणां चामरग्राहिणीनां पदे पदे रणितमणीनां मणिनूपुराणां निनादेन, प्रतीहारीणां च पुरः ससंभ्रमं समुत्सारितजनानां भवनप्रासादकुञ्जेषूच्चरितप्रतिशब्दतया दीर्घतामुपगतेनालोकशब्देन, प्रचलितजनचरणशतसंक्षोभभयादपहाय कुसुमप्रकरमुत्पतता च मधुलिहां हुंकृतेन, संक्षोभादतित्वरितपदप्रवृत्तैरवनिपतिभिः केयूरकोटिताडितानां क्वणितमुखररत्नदाम्नां च मणिस्तम्भानां रणितेन सर्वतः क्षुभितमिव तदास्थानभवनमभवत्।

अथ विसर्जितराजलोकः 'विश्रम्यताम्' इति स्वयमेवाभिधाय तां चाण्डालकन्यकाम्, 'वैशम्पायनः प्रवेश्यतामभ्यन्तरम्' इति ताम्बूलकरङ्कवाहिनीमादिश्य कतिपयाप्तराजपुत्रपरिवृतो नरपतिरभ्यन्तरं प्राविशत्। अपनीताशेषभूषणश्च दिवसकर इव विगलितकिरणजालः समुपाहृतसमुचितव्यायामोपकरणां व्यायामभूमिमयासीत्। स तस्यां च समानवयोभिः सह राजपुत्रैः कृतमधुरव्यायामः, तत्कालं विरलजनेऽपि राजकुले समुत्सारणाधिकारमुचितमाचरद्भिर्दण्डिभिरुपदिश्यमानमार्गः, गन्धोदकपूर्णकनकमयजलद्रोणीसनाथमध्याम्, उपस्थापितस्फाटिकस्नानपीठाम्, एकान्तनिहितैरतिसुरभिगन्धसलिलपूर्णैः स्नानकलशैरुपशोभितां स्नानभूमिमगच्छत्।

ततश्च तत्र निर्वर्तिताभिषेको विषधरनिर्मोकपरिलघुनी धवले परिधाय धौतवाससी, अतिधवलजलधरच्छेदशुचिना दुकूलपटपल्लवेन

कृतशिरोवेष्टनः, संपादितपितृजलक्रियो मन्त्रपूतेन तोयाञ्जलिना दिवसकरमभिप्रणम्य देवगृहमगमत् । उपरचितपशुपतिपूजनश्च निष्क्रम्य देवगृहान्निर्वर्तिताग्निकार्यो विलेपनभूमौ मृगमदकर्पूरकुङ्कुमवाससुरभिणा चन्दनेनानुलिप्तसर्वाङ्गो विरचितामोदिमालतीकुसुमशेखरः कृताम्बरपरिवर्तो रत्नकर्णपूरमात्राभरणः समुचितभोजनैः सह भूपतिभिराहारमभिमतरसास्वादजातप्रीतिरवनिपो निर्वर्तयामास ।

परिपीतधूमवर्तिरुपस्पृश्य च गृहीतताम्बूलस्तस्मात्प्रमृष्टमणिकुट्टिमात्प्रदेशादुत्थाय, नातिदूरवर्तिन्या ससम्भ्रमप्रधावितया प्रतीहार्या प्रसारितं बाहुमवलम्ब्य, अभ्यन्तरसंचारसमुचितेन परिजनेनानुगम्यमानः, धवलांशुकजवनिकापरिगतपर्यन्ततया स्फटिकमणिमयभित्तिबद्धमिवोपलक्ष्यमाणम्, अतिसुरभिणा मृगनाभिपरिगतेनामोदिना चन्दनवारिणा सिक्तशिशिरमणिभूमिम्, उत्कीर्णसालभञ्जिकानिवहेन गन्धसलिलक्षालितेन कलधौतमयेन स्तम्भसंचयेन विराजमानम्, कुसुमामोदवासितप्रच्छदपटेन पट्टोपधानाध्यासितशिरोधाम्ना शयनेन सनाथीकृतवेदिकमास्थानमण्डपमयासीत् । तत्र च शयनतलनिषण्णः क्षितितलोपविष्टया शनैः शनैरुत्सङ्गनिहितासिलतया खड्गवाहिन्या नवनलिनदलकोमलेन करसंपुटेन संवाह्यमानचरणस्तत्कालोचितदर्शनैरवनिपतिभिरमात्यैर्मित्रैश्च सह तास्ताः कथाः कुर्वन्मुहूर्तमिवासांचक्रे । ततो नातिदूरवर्तिनीम् 'अन्तःपुराद्वैशम्पायनमादायागच्छ' इति समुपजाततद्वृत्तान्तप्रश्नकुतूहलो राजा प्रतीहारीमादिदेश ।

अथ मुहूर्तादिव वैशम्पायनः प्रतीहार्या गृहीतपञ्जरः कनकवेत्रलतावलम्बिना किंचिदवनतपूर्वकायेन सितकञ्चुकावच्छन्नवपुषा

कञ्चुकिनानुगम्यमानो राजान्तिकमाजगाम। क्षितितलनिहितकरतलस्तु कञ्चुकी राजानं व्यज्ञापयत्—'देव, देव्यो विज्ञापयन्ति, देवादेशादेष वैशम्पायनः स्नातः कृताहारश्च देवपादमूलं प्रतीहार्यानीतः' इत्यभिधाय गते च तस्मिन् राजा वैशम्पायनमपृच्छत्—'कच्चिदभिमतमास्वादितमभ्यन्तरे भवता किंचिदशनजातम्' इति। स प्रत्युवाच — 'देव, किं वा नास्वादितम्। आमत्तकोकिललोचनच्छविर्नीलपाटलः कषायमधुरः प्रकाममापीतो जम्बूफलरसः। हरिनखरभिन्नमत्तमातङ्गकुम्भमुक्तरक्तार्द्रमुक्ताफलत्विषि खण्डितानि दाडिमबीजानि। नलिनीदलहारेन्ति द्राक्षाफलस्वादूनि च दलितानि स्वेच्छया प्राचीनामलकीफलानि। किं वा प्रलपितेन बहुना। सर्वमेव देवीभिः स्वयं करतलोपनीयमानममृतायते' इति। एवंवादिनो वचनमाक्षिप्य नरपतिरब्रवीत्—'आस्तां तावत्सर्वमेवेदम्। अपनयतु नः कुतूहलम्। आवेदयतु भवानादितः प्रभृति कार्त्स्न्येन। आत्मनो जन्म कस्मिन्देशे? भवान्कथं जातः? केन वा नाम कृतम्? का माता? कस्ते पिता? कथं वेदानामागमः? कथं शास्त्राणां परिचयः? कुतः कलाः समासादिताः? किं जन्मान्तरानुस्मरणम्? उत वरप्रदानम्? अथवा विहंगवेषधारी कश्चिच्छन्नं निवससि? क्व वा पूर्वमुषितम्? कियद्वा वयः? कथं पञ्जरबन्धः? कथं चाण्डालहस्तगमनम्? इह वा कथमागमनम्?' इति। वैशम्पायनस्तु स्वयमुपजातकुतूहलेन सबहुमानमवनिपतिना पृष्टो मुहूर्तमिव ध्यात्वा सादरमब्रवीत्—"देव, महतीयं कथा। यदि कौतुकमाकर्ण्यताम्—

अस्ति पूर्वापरजलनिधिवेलावलग्ना मध्यदेशालंकारभूता मेखलेव भुवः, वनकरिकुलमदजलसेकसंवर्धितैरतिविकचधवलकुसुमनिकु-

रमत्युच्चतया तारागणमिव शिखरदेशलग्नमुद्वहद्भिः पादपैरुपशोभिता, मधुमदोपरक्तकेरलीकपोलकोमलच्छविना संचरद्वनदेवताचरणालक्तकरसरञ्जितेनेव पल्लवप्रचयेन संछादिता, प्रेताधिपनगरीव सदासंनिहितमृत्युभीषणा महिषाधिष्ठिता च, कात्यायनीव प्रचलितखड्गभीषणा रक्तचन्दनालंकृता च, क्वचित्प्रलयवेलेव महावराहदंष्ट्रासमुत्खातधरणिमण्डला, क्वचित्समरभूमिरिव शरशतनिचिता, क्वचिन्नारायणमूर्तिरिव तमालनीला, क्वचिद्विराटनगरीव कीचकशतावृता, विन्ध्याटवी नाम।

तस्या च दण्डकारण्यान्तःपाति, सकलभुवनतलख्यातम्, उत्पत्तिक्षेत्रमिव भगवतो धर्मस्य, दक्षिणाशामुखविशेषकस्य सुरलोकादेकहुंकारनिपातितनहुषप्रकटप्रभावस्य भगवतो महामुनेरगस्त्यस्य भार्यया लोपामुद्रया स्वयमुपरचितालवालकैः करपुटसलिलसेकसंवर्धितैः सुतनिर्विशेषैरुपशोभितं पादपैः, तत्पुत्रेण च गृहीतव्रतेनाषाढिना गृहीतहरितपर्णपुटेन प्रयुटजमटता भिक्षां दढदस्युनाम्ना पवित्रीकृतम्, सरिता च गोदावर्या परिगतम्, आश्रमपदमासीत्।

यत्र च दशरथवचनमनुपालयन्नुत्सृष्टराज्यो रामो महामुनिमगस्त्यमनुचरन्सह सीतया लक्ष्मणोपरचितरुचिरपर्णशाले पञ्चवट्यां कंचित्कालं सुखमुवास। यत्र च पीतोद्गीर्णं जलनिधिजलमिव मुनिना निखिलमाश्रमोपान्तवर्तिषु विभक्तं महाह्रदेषु। अत्यायतश्च यस्मिन् दशरथसुतशरनिपातितो योजनबाहोर्बाहुरगस्त्यप्रसादनागतनहुषाजगरकायशङ्कामकरोदृषिजनस्य।

तस्य चैवंविधस्य संप्रत्यपि प्रकटोपलक्ष्यमाणपूर्ववृत्तान्तस्याश्र-

स्याश्रमस्य नातिदूरे जलनिधिपानप्रकुपितवरुणोत्साहितेनागस्त्यमत्सरात्तदाश्रमसमीपवर्त्यपर इव वेधसा महाजलनिधिरुत्पादितः, अम्बुरुहमधुपानमत्तकलहंसकामिनीकृतकोलाहलम्, अनिलोल्लासितकल्लोलशिखरशीकरारब्धदुर्दिनम्, एकदेशावतीर्णमुनिजनापूर्यमाणकमण्डलुकलकलध्वनिमनोहरम्, उदवासितापसानां देवतार्चनोपयुक्तकुसुमाभिर्लतामण्डपतलस्थितशिखण्डिमण्डलारब्धताण्डवाभिरनेककुसुमपरिमलवाहिनीभिर्वनराजिभिरुपरुद्धतीरम्, अपरसागराशङ्किभिः सलिलमादातुमवतीर्णैर्जलधरैरिव बहलपङ्कमलिनैर्वनकरिभिरनवरतमापीयमानसलिलम्, अगाधम्, अप्रतिमम्, अपां निधानं पम्पाभिधानं पद्मसरः।

तस्यैवंविधस्य पद्मसरसः पश्चिमे तीरे दिग्गजकरदण्डानुकारिणा जरदजगरेण सततमावेष्टितमूलतया बद्धमहालवाल इव, दिक्चक्रवालपरिमाणमिव गृह्णता भुवनान्तरालविप्रकीर्णेन शाखासंचयेन प्रलयकालताण्डवप्रसारितभुजसहस्रमुडुपतिशकलशेखरमिव विडम्बयितुमुद्यतः, परिपीतसागरसलिलैर्गगनागतैः शाखान्तरेषु निलीयमानैः क्षणमम्बुभारालसैरार्द्रीकृतपल्लवैर्जलधरपटलैरप्यदृष्टशिखरदेशः, तुङ्गतया नन्दनवनश्रियमिवावलोकयितुमभ्युद्यतः, नलिननाभ इव वनमालोपगूढः, नवजलधरव्यूह इव नभसि दर्शितोन्नतिः, अखिलभुवनतलावलोकनप्रासाद इव वनदेवतानाम्, अधिपतिरिव दण्डकारण्यस्य, महान् जीर्णः शाल्मलीवृक्षः।

तत्र च शाखाग्रेषु कोटरोदरेषु पल्लवान्तरेषु स्कन्धसंधिषु जीर्णवल्कलविवरेषु महावकाशतया विस्रब्धविरचितकुलायसहस्राणि दुरारोहतया विगलितविनाशभयानि नानादेशसमागतानि शुकशकुनिकु-

लानि प्रतिवसन्ति स्म। यैः परिणामविरलदलसंहतिरपि स वनस्पतिरविरलदलनिचयश्यामल इवोपलक्ष्यते दिवानिशं निलीनैः। ते च तस्मिन्वनस्पतावतिवाह्यातिवाह्य रजनीमात्मनीडेषु, प्रतिदिनमुत्थायोत्थायाहारान्वेषणाय नभसि विरचितपङ्क्तयः, दिवसकररथतुरगप्रभानुलिप्तमिव गगनतलमुपपादयन्तः, संचारिणीमिव मरकतस्थलीं विडम्बयन्तः, सेन्द्रायुधमिवान्तरिक्षमादधाना विचरन्ति स्म शुकशकुनयः। कृताहाराश्च पुनः प्रतिनिवृत्यात्मकुलायावस्थितेभ्यः शावकेभ्यो विविधान्फलरसान्कलममञ्जरीविकारांश्च चञ्चुपुटेन दत्त्वा दत्त्वा, अधरीकृतसर्वस्नेहेनासाधारणेन गुरुणापत्यप्रेम्णा तस्मिन्नेव क्रोडान्तर्निहिततनयाः क्षपाः क्षपयन्ति स्म।

एकस्मिंश्च जीर्णकोटरे जायया सह निवसतः पश्चिमे वयसि वर्तमानस्य कथमपि पितुरहमेवैको विधिवशात्सूनुरभवम्। अतिप्रबलया चाभिभूता ममैव जायमानस्य प्रसववेदनया जननी मे लोकान्तरमगमत्। अभिमतजायाविनाशशोकदुःखितोऽपि खलु तातः सुतस्नेहादन्तर्निगृह्य पटुप्रसरमपि शोकम्, एकाकी मत्संवर्धनपर एवाभवत्। अतिपरिणतवयाश्च, अवस्रस्तांसदेशशिथिलामपगतोत्पतनसंस्कारां पक्षसंततिमुद्वहन्, उपारूढकम्पतया च संतापकारिणीमङ्गलग्नां जरामिव विधुन्वन्, स्फुटिताग्रकोटिना चञ्चुपुटेन परनीडनिपतिताभ्यः शालिवल्लरीभ्यस्तण्डुलकणानादायादाय तरुमूलनिपतितानि शुककुलावदलितानि फलशकलानि समाहृत्य परिभ्रमितुमशक्तो मह्यमदात्। प्रतिदिवसमात्मना च मदुपभुक्तशेषमकरोदशनम्।

एकदा तु प्रभातसंध्यारागलोहिते अपरजलनिधितटमवतरति

चन्द्रमसि, व्रजति विशालतामाशाचक्रवाले, आतम्रलाक्षिकतन्तुपाटलाभिरायामिनीभिरशिशिरकिरणदीधितिभिः पद्मरागरत्नशलाकासंमार्जनीभिरिव समुत्सार्यमाणे गगनकुट्टिमकुसुमप्रकरे तारागणे, क्षपाजलजडकेसरं कुसुमनिकरमुदयगिरिशिखरस्थितं सवितारमिवोद्दिश्य पल्लवाञ्जलिभिः समुत्सृजति कानने, धर्मपताकास्विव समुन्मिषन्तीषु तपोवनाग्निहोत्रधूमलेखासु, विघटमानकमलखण्डमधुशीकरासारवर्षिणि निशावसानजातजडिम्नि मन्दमन्दसंचारिणि प्रवाति प्राभातिके मातरिश्वनि, मधुलिहां कुमुदोदरेषु घनघटमानदलपुटनिबद्धपक्षसंहतीनामुच्चरत्सु हुंकारेषु, प्रभातशिशिरमारुताहतमुक्तघजतुरसाश्लिष्टपक्ष्ममालामिव सशेषनिद्राजिह्मतारं चक्षुरुन्मीलयत्सु शनैः शनैरूषरशय्याधूसरक्रोडरोमराजिषु वनमृगेषु, विजृम्भमाणे श्रोत्रहारिणि पम्पासरःकलहंसकोलाहले, स्पष्टे जाते प्रत्यूषसि, नचिरादिव दिवसाष्टमभागभाजि स्पष्टभासि भास्वति भूते, प्रयातेषु यथाभिमतानि दिगन्तराणि शुककुलेषु, कुलायनिलीननिभृतशावकसनाथेऽपि निःशब्दतया शून्य इव तस्मिन्वनस्पतौ, स्वनीडावस्थित एव ताते, मयि च शैशवादसंजातबलसमुद्भिद्यमानपक्षपुटे तातस्य समीपवर्तिनि कोटरगते, सहसैव तस्मिन्महावने, संत्रासितसकलवनचरः, सरभसमुत्पतत्पतत्रिपक्षपुटशब्दसंततः, भीतकरिपोतचीत्कारपीवरः, परिभ्रमदुद्भ्रान्तवनवराहरवघर्घरः, गिरिगुहासुप्तप्रबुद्धसिंहनादोपबृंहितो मृगयाकोलाहलध्वनिरुदचरत्।

आकर्ण्य च तमहमश्रुतपूर्वमुपजातवेपथुरर्भकतया जर्जरितकर्णविवरो भयविह्वलः समीपवर्तिनः पितुः प्रतीकारबुद्ध्या जराशिथिलपक्षपुटान्तरमविशम्।

अनन्तरं च सरभसमितो गजयूथपतिलुलितकमलिनीपरिमलः, इतः क्रोडकुलदृश्यमानभद्रमुस्तारसामोदः, इतो वनमहिषविषाणकोटिकुलिशभिद्यमानवल्मीकधूलिः, इतो वनगजकुलम्, इतो वनमहिषवृन्दम्, इतो मृगपतिनखभिद्यमानकुम्भकुञ्जररसितम्, इयमार्द्रपङ्कमलिना वराहपद्धतिः, इयमभिनवशाष्पकबलरसश्यामला हरिणरोमन्थफेनसंहतिः, एषा निपतितरुधिरबिन्दुसिक्तशुष्कपत्रपाटला रुरुपदवी, एष नखकोटिविलिखितविकटपत्रलेखो रुधिरपाटलः करिमौक्तिकदलदन्तुरो मृगपतिमार्गः, इयमटवीवेणिकानुकारिणी पक्षच्छरस्य यूथपतेर्मदजलमलिना संचारवीथी, चमरीपङ्क्तिरियमनुगम्यताम्, त्वरिततरमध्यास्यतामियं वनस्थली, तरुशिखरमारुह्यताम्, आलोक्यतां दिगियम्, आकर्ण्यतामयं शब्दः, गृह्यतां धनुः, अवहितैः स्थीयताम्, विमुच्यन्तां श्वानः, इत्यन्योन्यमभिवदतो मृगयासक्तस्य महतो जनसमूहस्य तरुगहनान्तरितविग्रहस्य क्षोभितकाननं कोलाहलमशृणवम्।

अथ नातिचिरादिव गिरिविवरविजृम्भिप्रतिनादगम्भीरेण शबरशरताडितानां केसरिणां निनादेन, सरभससारमेयविलुप्यमानावयवानामालोलकातरतरलतारकाणामेणकानां च करुणकूजितेन, तरुशिखरसमुत्पतितानामाकुलाकुलचारिणां च पत्त्ररथानां कोलाहलेन सर्वतः प्रचलितमिव तदरण्यमभवत्। अचिराच्च प्रशान्ते तस्मिन्मृगयाकलकले, मन्दीभूतभयोऽहमुपजातकुतूहलः पितुरुत्सङ्गादीषदिव निष्क्रम्य कोटरस्थ एव शिरोधरां प्रसार्य संत्रासतरलतारकः शैशवात्किमिदमिति समुपजातदिदृक्षस्तामेव दिशं चक्षुः प्राहिणवम्।

अभिमुखमापतच्च तस्माद्वनान्तरात्, अन्तकपरिवारमिव परिभ्रम-

न्तम्, अशुभकर्मसमूहमिवैकत्र समागतम्, अनवरतशरनिकरवर्षिराम-निहतखरदूषणबलविग्रहमिव तदपध्यानात्पिशाचतामुपगतम्, अनेकसहस्रसंख्यम्, अतिभयजननमुत्पातवेतालव्रातमिव शबरसैन्यमद्राक्षम्।

मध्ये च तस्यातिमहत: शबरसैन्यस्य, प्रथमे वयसि वर्तमानम्, एकलव्यमिव जन्मान्तरागतम्, आजानुलम्बेन कुञ्जरकरप्रमाणमिव गृहीत्वा निर्मितेन भुजयुगलेनोपशोभितम्, अविरतश्रमाभ्यासादुल्लिखितोदरम्, इभमदमलिनमालानस्तम्भयुगलमुपहसन्तमिवोरुदण्डद्वयेन, उपजातपरिचयैरनुगच्छद्भि: श्रमवशाद्दूरविनिर्गताभि: स्वभावपाटलतया शुष्काभिरपि हरिणशोणितमिव क्षरन्तीभिर्जिह्वाभिरावेद्यमानखेदै: स्थूलवराटकमालिकापरिगतकण्ठैर्महावराहदंष्ट्राप्रहारजर्जरैरल्पकायैरपि महाशक्तित्वादनुपजातकेसरैरिव केसरिकिशोरकैरनेकवर्णै: श्वभिरनुगम्यमानम्, अंशावतारमिव कृतान्तस्य, सहोदरमिव पापस्य, सारमिव कलिकालस्य, मातङ्गकनामानं शबरसेनापतिमपश्यम्। अभिधानं तु पश्चात्तस्याहमश्रौषम्।

आसीच्च मे मनसि—'अहो, मोहप्रायमेतेषां जीवितम्, साधुजनविगर्हितं च चरितम्। तथा हि—पुरुषपिशितोपहारे धर्मबुद्धि:। आहार: साधुजननिन्दितो मधुमांसादि:। शास्त्रं शिवारुतम्। समुपदेष्टार: सदसतां कौशिका:। परिचिता: श्वान:। मित्राणि क्रूरकर्मसाधनानि धनूंषि। क्रूरात्मभि: शार्दूलै: सह संवास:। पशुरुधिरेण देवतार्चनम्। चौर्येण जीवनम्। भूषणानि भुजंगमणय:। वनगजमदैरङ्गराग:। यस्मिन्नेव कानने निवसन्ति, तदेवोत्खातमूलमशेषत: कुर्वते' इति चिन्तयत्येव मयि स शबरसेनापतिरटवीभ्र-

मणसमुद्भवं श्रममपनिनीषुरागत्य तस्यैव शाल्मलीतरोरधश्छायायामुपाविशत्। अन्यतमस्तु शबरयुवा ससंभ्रममवतीर्य, तस्मात्करयुगलपरिक्षोभिताम्भसः सरसो वैदूर्यद्रवानुकारि अत्यच्छतया स्पर्शानुमेयमम्भः कमलिनीपत्रपुटेन, प्रत्यग्रोद्धृताश्च धौतपङ्कनिर्मलमृणालिकाः समुपाहरत्। आपीतसलिलश्च सेनापतिस्ता मृणालिकाः क्रमेणादशत्। अपगतश्रमश्चोत्थाय परिपीताम्भसा सकलेन तेन शबरसैन्येनानुगम्यमानः शनैः शनैरभिमतं दिगन्तरमयासीत्।

एकतमस्तु जरच्छबरस्तस्मात्पुलिन्दबृन्दादनासादितहरिणपिशितः पिशितार्थी तस्मिन्नेव तरुतले मुहूर्तमिव व्यलम्बत।' अन्तरिते च शबरसेनापतौ स जीर्णशबरः पिबन्निवास्माकमायूंषि सुचिरमारुरुक्षुस्तं वनस्पतिमा मूलादपश्यत्। उत्क्रान्तमिव तस्मिन्क्षणे तदालोकनभीतानां शुककुलानामसुभिः। किमिव हि दुष्करमकरुणानाम्। यतः स तमनेकसालतुङ्गमभ्रंकषशाखाशिखरमपि सोपानैरिवायत्नेनैव पादपमारुह्यताननुपजातोत्पतनशक्तीन् कांश्चिदल्पदिवसजातान्गर्भच्छविपाटलाञ्छाल्मलीकुसुमशङ्कामुपजनयतः, कांश्चिदुद्भिद्यमानपक्षतया नलिनसंवर्तिकानुकारिणः, प्रतीकारासमर्थानेकैकतया फलानीव तस्य वनस्पतेः शाखान्तरेभ्यः कोटरेभ्यश्च शुकशावकानग्रहीत्। अपगतासूंश्च कृत्वा क्षितावपातयत्।

तातस्तु तं महान्तमकाण्ड एव प्राणहरमप्रतीकारमुपप्लवमुपनतमालोक्य द्विगुणतरोपजातवेपथुर्मरणभयादुद्भ्रान्ततरलतारकां दृशमितस्ततो दिक्षु विक्षिपन्, पक्षसंपुटेनाच्छाद्य मां तत्कालोचितं प्रतीकारं तदेव मन्यमानः, स्नेहपरवशो मद्रक्षणाकुलः किंकर्तव्यताविमूढः

क्रोडविभागेन मामवष्टभ्य तस्थौ । असावपि पापः क्रमेण शाखान्तरैः संचरमाणः, कोटरद्वारमागत्य जीर्णासितभुजंगभोगभीषणं प्रसार्य वामबाहुम्, अतिनृशंसो मुहुर्मुहुर्दत्तचञ्चुप्रहारमुत्कूजन्तमाकृष्य तातमपगतासुमकरोत्। मां तु स्वल्पत्वाद्भयसंपिण्डिताङ्गत्वात्सावशेषत्वादायुषः कथमपि पक्षसंपुटान्तरगतं नालक्षयत्। उपरतं च तमवनितले शिथिलशिरोधरमधोमुखममुञ्चत्। अहमपि तच्चरणान्तराले प्रवेशितशिरोधरो निभृतमङ्कनिलीनस्तेनैव सहापतम्। अवशिष्टपुण्यतया तु पवनवशासंपुञ्जितस्य महतः शुष्कपत्रराशेरुपरि पतितमात्मानमपश्यम्। अङ्गानि येन मे नाशीर्यन्त। यावच्चासौ तस्मात्तरुशिखरान्नावतरति, तावदहमवशीर्णपर्णसवर्णत्वादस्फुटोपलक्ष्यमाणमूर्तिः, पितरमुपरतमुत्सृज्य, नृशंस इव प्राणपरित्यागयोग्येऽपि काले बालतया कालान्तरभुवः स्नेहरसस्यानभिज्ञः, जन्मसहभुवा भयेनैव केवलमभिभूयमानः, किंचिदुपजाताभ्यां पक्षाभ्यामीषत्कृतावष्टम्भो लुठन्नितस्ततः, कृतान्तमुखकुहरादिव विनिर्गतमात्मानं मन्यमानः, नातिदूरवर्तिनस्तमालविटपिनो मूलदेशमविशम्।

अवतीर्य स तेन समयेन क्षितितलविप्रकीर्णान्संहृत्य ताञ्छुकशिशूनेकलतापाशसंयतानाबध्य, सेनापतिगतेनैव वर्त्मना तामेव दिशमगच्छत्। मां तु लब्धजीविताशं प्रत्यग्रपितृमरणशोकशुष्कहृदयमतिदूरपातादायासितशरीरं संत्रासजाता सर्वाङ्गोपतापिनी बलवती पिपासा परवशमकरोत्। अनया च कालकलया सुदूरमतिक्रान्तः स पापकृदिति परिकल्प्य, किंचिदुन्नमितकंधरो भयचकितया दृशा दिशोऽवलोक्य, तृणेऽपि चलति पुनः प्रतिनिवृत्त इति तमेव पदे पदे

पापकारिणमुत्प्रेक्षमाणो निष्क्रम्य तस्मात्तमालतरुमूलात्सलिलसमीपमुपसर्तुं प्रयत्नमकरवम्।

अजातपक्षतया च नातिस्थिरसंचारस्य, मुहुर्मुहुर्मुखेन पततः, मुहुस्तिर्यङ्निपतन्तमात्मानमेकया पक्षपाल्या संधारयतः, क्षितितलसंसर्पणश्रमातुरस्य, अनभ्यासवशादेकमपि दत्त्वा पदमनवरतमुन्मुखस्य स्थूलस्थूलं श्वसतः, धूलिधूसरस्य संसर्पतो मम समभून्मनसि—'अतिकष्टास्वप्यवस्थासु जीवितनिरपेक्षा न भवन्ति खलु जगति सर्वप्राणिनां प्रवृत्तयः। नास्ति जीवितादन्यदभिमततरमिह जगति सर्वजन्तूनाम्। एवमुपरतेऽपि सुगृहीतनाम्नि ताते, यदहमविकलेन्द्रियः पुनरेव प्राणिमि। धिङ्मामकरुणमतिनिष्ठुरमकृतज्ञम्। अहो सोढपितृमरणशोकदारुणं येन मया जीव्यते। उपकृतमपि नापेक्ष्यते। खलं हि खलु मे हृदयम्। मया हि, लोकान्तरगतायामम्बायां नियम्य शोकवेगम्, आप्रसवदिवसात्परिणतवयसापि सता तैस्तैरुपायैर्मत्संवर्धनक्लेशमतिमहान्तमपि स्नेहवशादगणयता यत्तातेन परिपालितः, तत्सर्वमेकपदे विस्मृतम्। अतिकृपणाः खल्वमी प्राणाः। यदुपकारिणमपि तातमद्यापि क्वापि गच्छन्तं नानुगच्छन्ति। सर्वथा न कंचिन्न खलीकरोति जीविततृष्णा। यदीदृगवस्थमपि मामयमायासयति जलाभिलाषः। मन्ये चागणितपितृमरणशोकस्य निर्घृणतैव केवलमियं मम सलिलपानबुद्धिः। अद्यापि दूर एव सरस्तीरम्। अस्फुटानि हि श्रूयन्ते सारसरसितानि। दिवसस्य चेयमतिकष्टा दशा वर्तते। रविरम्बरतलमध्यवर्ती स्फुरन्तमातपमनवरतमनलधूलिनिकरमिव विकिरति करैः। अधिकामुपजनयति तृषामातपस्पर्शसंतप्तपांसुपटलदुर्गमा

भूमि: । अतिप्रबलपिपासावसन्नानि गन्तुमल्पमपि मे नालमङ्गकानि । अप्रभुरस्म्यात्मन: । सीदति मे हृदयम् । अन्धकारतामुपयाति चक्षु: । अपि नाम खलो विधिरनिच्छतोऽपि मे मरणमद्योपपादयेत्' इत्येवं चिन्तयत्येव मयि—तस्मात्सरसो नातिदूरवर्तिनि तपोवने जाबालिर्नाम महातपा मुनि: प्रतिवसति स्म । तत्तनयश्च हारीतनामा तापसकुमारक: सनत्कुमार इव सर्वविद्यावदातचेता:, सवयोभिरपरैस्तपोधनकुमारकैरनुगम्यमानस्तेनैव पथा, सकलविषयोपभोगनिवृत्त्यर्थमुपपादितेन ललाटपट्टके त्रिसत्येनेव भस्मत्रिपुण्ड्रकेणालंकृत:, विषाणशिखरोत्खातामुद्वहता स्नानमृदमुपजातपरिचयेन नीवारमुष्टिसंवर्धितेन तपोवनमृगेणानुयात:, तदेव कमलसर: सिष्णासुरुपागमत् ।

प्रायेणाकारणमित्राण्यतिकरुणार्द्राणि च सदा खलु भवन्ति सतां चेतांसि । यत: स मां तदवस्थमालोक्य समुपजातदय: समीपवर्तिनमृषिकुमारकमन्यतममब्रवीत्—'अयं कथमपि शुकशिशुरसंजातपक्षपुट एव तरुशिखरादस्मात्परिच्युत: । श्येनमुखपरिभ्रष्टेन वानेन भवितव्यम् । तथा हि—अतिदवीयस्तया प्रपातस्य, अल्पावशेषजीवितोऽयमामीलितलोचनो मुहुर्मुहुर्मुखेन पतति । मुहुर्मुहुरत्युल्बणं श्वसिति । मुहुर्मुहुश्चञ्चुपुटं विवृणोति । न शक्नोति शिरोधरां धारयितुम् । तदेहि । यावदेवायमसुभिर्न वियुज्यते, तावदेव गृहाणेमम् । अवतारय सलिलसमीपम्' इत्यभिधाय तेन मां सरस्तीरमनाययत् । उपसृत्य च जलसमीपमादाय स्वयं मां मुक्तप्रयत्नमुत्तानितमुखमङ्गुल्या कतिचित्सलिलबिन्दूनपाययत् । अम्भ:क्षोदकृतसेकं च समुपजातनवीनप्राणमुपतटप्ररूढस्य नलिनीपलाशस्य जलशिशिरायां छायायां

निधाय, समुचितमकरोत्स्नानविधिम्। अभिषेकावसाने च प्रत्यग्रभङ्गैरुन्मुखो रक्तारविन्दैर्भगवते सवित्रे दत्त्वार्घमुदतिष्ठत्। आगृहीतधौतधवलवल्कलश्च मां गृहीत्वा तपोवनाभिमुखं शनैरगच्छत्।

अनतिदूरमिव गत्वा दिशि दिशि सदासंनिहितकुसुमफलैस्तारकावर्षमिवाधर्मविनाशपिशुनं कुसुमनिकरमनिलचलितमनवरतमतिधवलमुत्सृजद्भिः काननैरुपगूढम्, अनवरताज्याहुतिप्रीतैश्चित्रभानुभिः सशरीरमेव मुनिजनममरलोकं निनीषुभिरुद्धूयमानधूमलेखाच्छलेनाबध्यमानस्वर्गमार्गगमनसोपानसेतुमिवोपलक्ष्यमाणम्, अनवरतश्रवणगृहीतवषट्कारवाचालशुककुलम्, परिचितशाखामृगकराकृष्टिनिष्कास्यमानप्रवेश्यमानजरदन्धतापसम्, उपचर्यमाणातिथिवर्गम्, उद्दिश्यमानश्राद्धकल्पम्, व्याख्यायमानयज्ञविद्यम्, आलोच्यमानधर्मशास्त्रम्, वाच्यमानविविधपुस्तकम्, विचार्यमाणसकलशास्त्रार्थम्, अदृष्टपूर्वं कलिकालस्य, अपरिचितम् अनृतस्य, अश्रुतपूर्वम् अनङ्गस्य, अतिरमणीयमपरमिव ब्रह्मलोकमाश्रममपश्यम्।

यत्र च मलिनता हविर्धूमेषु न चरितेषु, मुखरागः शुकेषु न कोपेषु, तीक्ष्णता कुशाग्रेषु न स्वभावेषु, चञ्चलता कदलीदलेषु न मनःसु।

तस्य चैवंविधस्य मध्यभागमण्डलमलंकुर्वाणस्य रक्ताशोकतरोरधश्छायायामुपविष्टम्, आयामिनीभिः पलितपाण्डुराभिरमरलोकमारोढुं पुण्यरज्जुभिरिवोपसंगृहीताभिर्जटाभिरुपशोभमानम्, अतिचपलानामिन्द्रियाश्वानामन्तःसंयमनरज्जुभिरिवाततताभिः कण्ठनाडीभिर्निरन्तरसंबद्धकंधरम्, स्थैर्येणाचलानां गाम्भीर्येण सागराणां तेजसा

सवितुः संविभागमिव कुर्वाणम्, वैनतेयमिव स्वप्रभावोपात्तद्विजाधिपत्यम्, शंतनुमिव प्रियसत्यव्रतम्, भगवन्तं जाबालिमपश्यम्।

अवलोक्य चाहमचिन्तयम्—'अहो प्रभावस्तपसाम्। इयमस्य शान्तापि मूर्तिरुत्तप्तकनकावदाता परिस्फुरन्ती सौदामनीव चक्षुषः प्रतिहन्ति तेजांसि। सततमुदासीनापि महाप्रभावतया भयमिवोपजनयति प्रथमोपगतस्य। नित्यमसहिष्णु तपस्विनां तनुतपसामपि तेजः प्रकृत्या भवति। किमुत सकलभुवनतलवन्दितचरणानामनवरततपःक्षपितमलानां करतलामलकफलवदखिलं जगदालोकयतां दिव्येन चक्षुषा भगवतामेवंविधानामवक्षयकारिणाम्। पुण्यानि हि नामग्रहणान्यपि महामुनीनाम्, किं पुनर्दर्शनानि। धन्यमिदमाश्रमपदम्, अयमधिपतिर्यत्र। अथवा भुवनतलमेव धन्यमखिलमनेनाधिष्ठितमवनितलकमलयोनिना। पुण्यभाजः खल्वमी मुनयः, यदहर्निशमेनमपरमिव नलिनासनमपगतान्यव्यापारा मुखावलोकननिश्चलदृष्टयः पुण्याः कथाः शृण्वन्तः समुपासते। चतुर्मुखमुखकमलवासिभिश्चतुर्भिर्वेदैः सुचिरादिव द्वितीयमिदमपरमुचितमासादितं स्थानम्। नियतमिह सर्वात्मना कृतावस्थितिना भगवता परिभूतकलिकालविलसितेन धर्मेण न स्मर्यते कृतयुगस्य। धरणितलमनेनाधिष्ठितमालोक्य न वहति नूनमिदानीं सप्तर्षिमण्डलनिवासाभिमानमम्बरतलम्। प्रायो महाभूतानामपि दुरभिभवानि भवन्ति तेजांसि। सर्वतेजस्विनामयं चाग्रणीः। द्विसूर्यमिवाभाति जगदनेनाधिष्ठितं महात्मना। एष प्रवाहः करुणारसस्य, संतरणसेतुः संसारसिन्धोः, आधारः क्षमाम्भसाम्, परशुस्तृष्णालतागहनस्य,

दिवसकरो मोहान्धकारस्य, कुलभवनमाचाराणाम्, आयतनं मङ्गलानाम्, प्रतिपक्षः कलिकालस्य, कोशस्तपसः, सखा सत्यस्य, क्षेत्रमार्जवस्य, प्रभवः पुण्यसंचयस्य, अवशो विषयाणाम्, अनभिमुखः सुखानाम्। अस्य भगवतः प्रसादादेवोपशान्तवैरमपगतमत्सरं तपोवनम्। अहो प्रभावो महात्मनाम्। अत्र हि शाश्वतिकमपहाय विरोधम्, उपशान्तात्मानस्तिर्यञ्चोऽपि तपोवनवसतिसुखमनुभवन्ति। तथा हि—एष विशति शिखिनः कलापमातपाहतो निःशङ्कमहिः। अयमुत्सृज्य मातरमजातकेसरैः केसरिशिशुभिः सहोपजातपरिचयः प्रक्षरत्क्षीरधारमापिबति कुरङ्गशावकः सिंहीस्तनम्' इति।

एवं चिन्तयन्तमेव मां तस्यामेवाशोकतरोरधश्छायायामेकदेशे स्थापयित्वा, हारीतः पादावुपगृह्य कृताभिवादनः पितुरनतिसमीपवर्तिनि कुशासने समुपाविशत्। आलोक्य तु माम्, ते सर्व एव मुनयः 'कुतोऽयमासादितः शुकशिशुः' इति तमासीनमपृच्छन्। असौ तु तानब्रवीत्—'अयं मया स्नातुमितो गतेन कमलिनीसरस्तीरतरुनीडपतितः शुकशिशुर्दूरनिपतनविह्वलतनुरल्पावशेषायुरासादितः। तपस्विदुरारोहतया च तस्य वनस्पतेर्न शक्यते स्वनीडमारोपयितुमिति जातदयेनानीतः। तद्यावदयमप्ररूढपक्षतिरक्षमोऽन्तरिक्षमुत्पतितुम्, तावदत्रैव कस्मिंश्चिदाश्रमतरुकोटरे मुनिकुमारकैरस्माभिश्चोपनीतेन नीवारकणनिकरेण फलरसेन च संवर्ध्यमानो धारयतु जीवितम्। अनाथपरिपालनं हि धर्मोऽस्मद्विधानाम्। उद्भिन्नपक्षतिस्तु गगनतलसंचरणसमर्थो यास्यति, यत्रास्मै रोचिष्यते। इहैव वोपजातपरिचयः स्थास्यति' इत्येवमादिकमस्मत्संबद्धमालापमाकर्ण्य किंचिदुपजातकुतू-

हलो भगवाञ्जाबालिरीषदावलितकंधरो मामतिप्रशान्तया दृष्ट्या दृष्ट्वा, सुचिरमुपजातप्रत्यभिज्ञान इव पुनः पुनर्विलोक्य, 'स्वस्यैवाविनयस्य फलमनेनानुभूयते' इत्यवोचत्। स हि भगवान्कालत्रयदर्शी तपःप्रभावाद्दिव्येन चक्षुषा सर्वमेव करतलगतमिव जगदवलोकयति। वेत्ति जन्मान्तराण्यतीतानि। कथयत्यागामिनमप्यर्थम्। यतः सर्वैव तापसपरिषच्छ्रुत्वा विदिततत्प्रभावा 'कीदृशोऽनेनाविनयः कृतः, किमर्थं वा कृतः, क्व वा कृतः, जन्मान्तरे वा कोऽयमासीत्' इति कौतूहलिन्यभवत्। उपनाथितवती च तं भगवन्तम् 'आवेदय, प्रसीद, भगवन्, कीदृशस्याविनयस्य फलमनेनानुभूयते। कश्चायमासीज्जन्मान्तरे। विहगजातौ कथमस्य संभवः। किमभिधानो वायम्। अपनयतु नः कुतूहलम्। आश्चर्याणां हि सर्वेषां भगवान् प्रभवः' इति।

एवमुपयाच्यमानस्तु तपोधनपरिषदा स महामुनिः प्रत्यवदत्— 'अतिमहदिदमाश्चर्यमाख्यातव्यम्। अल्पशेषमहः। प्रत्यासीदति च नः स्नानसमयः। भवतामप्यतिक्रामति देवार्चनविधिवेला। तदुत्तिष्ठन्तु भवन्तः। सर्व एव तावदाचरन्तु यथोचितं दिवसव्यापारम्। अपराह्णसमये भवतां विस्रब्धोपविष्टानामादितः प्रभृति सर्वमावेदयिष्यामि—योऽयम्, यच्चानेन कृतमपरस्मिञ्जन्मनि, इह लोके यथास्य संभूतिः। अयं च तावदपगतक्लमः क्रियतामाहारेण। नियतमयमप्यात्मनो जन्मान्तरोदन्तं स्वप्नोपलब्धमिव मयि कथयति सर्वमशेषतः स्मरिष्यति' इत्यभिदधदेवोत्थाय सह मुनिभिः स्नानादिकमुचितं दिवसव्यापारमकरोत्।

अनेन च समयेन परिणतो दिवसः। अपरसागराम्भसि पतिते दिनकरे पतनवेगोत्थितमम्भःशीकरनिकरमिव तारागणमम्बरमधारयत्। क्षयमुपगतायां संध्यायां तद्विनाशदुःखिता कृष्णाजिनमिव विभावरी तिमिरोद्गममभिनवमवहत्। अपहाय मुनिजनहृदयानि सर्वमन्यदन्धकारतां तिमिरमनयत्। विगलितसकलोदयरागं रजनिकरबिम्बमम्बरापगावगाहधौतसिन्दूरमैरावतकुम्भस्थलमिव तत्क्षणमलक्ष्यत। शनैः शनैश्च दूरोदिते भगवति हिमततिस्रुति, सुधाधूलिपटलेनेव धवलीकृते चन्द्रातपेन जगति, अर्धयाममात्रावखण्डितायां विभावर्याम्, हारीतः कृताहारं मामादाय सर्वैस्तैः सह मुनिभिरुपसृत्य, चन्द्रातपोद्भासिनि तपोवनैकदेशे वेत्रासनोपविष्टं पितरमवोचत्–'हे तात, सकलेयमाश्चर्यश्रवणकुतूहलाकलितहृदया समुपस्थिता तापसपरिषदाबद्धमण्डला प्रतीक्षते। व्यपनीतश्रमश्च कृतोऽयं पतत्रिपोतः। तदावेद्यताम्, यदनेन कृतमपरस्मिञ्जन्मनि, कोऽयमभूत्, भविष्यति च' इति। एवमुक्तस्तु स महामुनिरग्रतः स्थितं मामवलोक्य, तांश्च सर्वानेकाग्राञ्छ्रवणपरान्मुनीन्बुद्ध्वा, शनैः शनैरब्रवीत्। श्रूयतां यदि कुतूहलम्।

अस्ति सकलत्रिभुवनललामभूता, आत्मनिवासोचिता भगवता महाकालभिधानेन प्रमथनाथेनापरेव पृथिवी समुत्पादिता, द्वितीयपृथिवीशङ्कया च जलनिधिनेव रसातलगम्भीरेण जलपरिखावलयेन परिवृता, पशुपतिनिवासप्रीत्या गगनपरिसरोल्लेखिशिखरमालेन कैलासगिरिणेव सुधासितेन प्राकारमण्डलेन परिगता, प्रकटशङ्खशुक्तिमुक्ताप्रवालमरकतमणिराशिभिश्चामीकरचूर्णवालुकानिकरचितैरायामिभिर-

गस्त्यपरिपीतसलिलैः सागरैरिव महाविपणिपथैरुपशोभिता, सततप्रवृत्ताध्ययनध्वनिधौतकल्मषा, भगवतो महाकालस्य शिरसि सुरसरितमालोक्य समुपजातेर्ष्ययेव सततसमाबद्धतरङ्गभ्रुकुटिलेखया सिप्रया परिक्षिप्ता, सकलभुवनख्यातयशसा हरजटाचन्द्रेणेव कोटिसारेण मैनाकेनेवाविदितपक्षपातेन जिनधर्मेणेव जीवानुकम्पिना वदान्येन दक्षेण स्मितपूर्वाभिभाषिणा शिक्षिताशेषदेशभाषेण महाभारतपुराणरामायणानुरागिणा बृहत्कथाकुशलेन श्रुतरागिणा सुभाषितव्यसनिना विलासिजनेनाधिष्ठिता, सशैलेव प्रासादैः, सशाखानगरेव महाभवनैः, गरुडमूर्तिरिवाच्युतस्थितिरमणीया, विजितामरलोकद्युतिरवन्तीषूज्जयिनी नाम नगरी।

यस्यां च निशि निशि पवनविलोलैर्दुकूलपल्लवैरुल्लसद्भिर्मालवीमुखकमलकान्तिलज्जितस्येन्दोः कलङ्कमिवापनयन्तो दूरप्रसारितोर्ध्वध्वजभुजाः प्रासादा लक्ष्यन्ते। यस्यां सुरासुरचूडामणिमरीचिचुम्बितचरणनखमयूखोऽन्धकारातिर्भगवानुत्सृष्टकैलासवासप्रीतिर्महाकालाभिधानः स्वयं निवसति।

तस्यां चैवंविधायां नगर्याम्, नलनहुषययातिधुन्धुमारभरतभगीरथदशरथप्रतिमः, फलितशक्तित्रयः, नीतिशास्त्राखिन्नबुद्धिः, अधीतधर्मशास्त्रः, तृतीय इव तेजसा कान्त्या च सूर्याचन्द्रमसोः, दशरथ इव सुमित्रोपेतः, पशुपतिरिव महासेनानुगतः, अवतार इव धर्मस्य, प्रतिनिधिरिव पुरुषोत्तमस्य, परिहृतप्रजापीडो राजा तारापीडो नामाभूत्।

यं च रतिप्रलापजनितदयार्द्रहृदयहरनिर्मितमपरं मकरकेतु-

ममंस्त लोकः। यस्य च दिष्टवृद्धिमिव शुश्राव, उपदेशमिव जग्राह, मङ्गलमिव बहु मेने, मन्त्रमिव जजाप, आगमवचनमिव न विसस्मार चरितं जनः।

तस्य च राज्ञो निखिलशास्त्रकलावगाहगम्भीरबुद्धिः, आ शैशवादुपारूढनिर्भरप्रेमरसः, नीतिशास्त्रप्रयोगकुशलः, महत्स्वपि कार्यसंकटेष्वविषण्णधीः, धाम धैर्यस्य, स्थानं स्थितेः, सेतुः सत्यस्य, धाता धर्मस्य, बृहस्पतिरिव सुनासीरस्य, वसिष्ठ इव दशरथस्य, सर्वकार्येष्वाहितमतिः, अमात्यो ब्राह्मणः शुकनासो नामासीत्।

यस्यानेकचारपुरुषसहस्रसंचारनिचिते चतुरुदधिवलयपरिक्षेपप्रमाणे धरणितले भवन इवाविदितमहरहः समुच्छ्वसितमपि राज्ञां नासीत्।

स राजा बाल एव सुरकुञ्जरकरपीवरेण राजलक्ष्मीलीलोपधानेन बाहुना विजित्य सप्तद्वीपवलयां वसुंधराम्, तस्मिञ्शुकनासनाम्नि मन्त्रिणि सुहृदीव राज्यभारमारोप्य, सुस्थिताः प्रजाः कृत्वा, शिथिलितपृथिवीव्यापारः, प्रायो विषयसुखान्यनुबभूव।

शुकनासोऽपि महान्तं तं राज्यभारमनायासेनैव प्रज्ञाबलेन बभार। यथैव राजा सर्वकार्याण्यकार्षीत्, तद्वदसावपि द्विगुणीकृतप्रजानुरागश्चक्रे।

एवं तस्य राज्ञो मन्त्रिविनिवेशितराज्यभारस्य यौवनसुखमनुभवतः कालो जगाम। भूयसा च कालेनान्येषामपि जीवलोकसुखानां प्रायः सर्वेषामन्तं ययौ। एकं तु सुतमुखदर्शनसुखं न लेभे। यथा यथा च यौवनमतिचक्राम, तथा तथा विफलमनोरथस्यानपत्यताज-

न्मावर्धतास्य संतापः। नरपतिसहस्रपरिवृतमप्यसहायमिव, चक्षुष्मन्तमप्यन्धमिव, आत्मानममन्यत।

अथ तस्य, चन्द्रलेखेव हरजटाकलापस्य, कौस्तुभप्रभेव कैटभारातिवक्षःस्थलस्य, चन्दनवनराजिरिव मलयस्य, फणामणिशिखेव शेषस्य, भूषणमभूत्त्रिभुवनविस्मयजननी सकलान्तःपुरप्रधानभूता महिषी विलासवती नाम।

एकदा च स तदावासगतः, तां चिन्तास्तिमितदृष्टिना शोकमूकेन परिजनेन परिवृताम्, अनतिदूरवर्तिनीभिश्चान्तःपुरवृद्धाभिराश्वास्यमानाम्, अविरलाश्रुबिन्दुपातार्द्रीकृतदुकूलाम्, अनलंकृताम्, वामकरतलविनिहितमुखकमलाम्, असंयतालकाम्, सुनिबिडपर्यङ्किकोपविष्टां रुदतीं ददर्श।

कृतप्रत्युत्थानां च तां तस्यामेव पर्यङ्किकायामुपवेश्य, स्वयं चोपविश्य, अविज्ञातबाष्पकारणः, भीतभीत इव करतलेन विगतबाष्पाम्भःकणौ कुर्वन्कपोलौ, भूपालस्तामवादीत्–'देवि, किमर्थमन्तर्गतगुरुशोकभारमन्थरमशब्दं रुद्यते। ग्रथ्नन्ति हि मुक्ताफलजालकमिव बाष्पबिन्दुनिकरमेतास्तव पक्ष्मपङ्क्तयः। किमर्थं च कृशोदरि, नालंकृतासि? बालातप इव रक्तारविन्दकोशयोः किमिति न पातितश्चरणयोरलक्तकरसः? केन कारणेन न विभूषिता हारेण शिरोधरा? इमां च केन हेतुना मानिनि, धारयस्यनुपरचितगोरोचनाबिन्दुतिलकामसंयमितालकिनीं ललाटरेखाम्? प्रसीद, निवेदय देवि, दुःखनिमित्तम्? किं क्वचिन्मयापराद्धम्, अन्येन वा केनचिदस्मदुपजीविना परिजनेन? अतिनिपुणमपि चिन्तयन्न पश्यामि खलु स्खलितमल्पमप्यात्मनस्त्वद्वि-

षये। त्वदायत्तं हि मे जीवितं च राज्यं च। कथ्यतां सुन्दरि, शुचः कारणम्' इत्येवमभिधीयमाना विलासवती यदा न किंचित्प्रतिवचः प्रतिपेदे, तदा विवृद्धबाष्पहेतुमस्याः परिजनमपृच्छत्।

अथ तस्यास्ताम्बूलकरङ्कवाहिनी सततप्रत्यासन्ना मकरिका नाम राजानमुवाच—'देव, कुतो देवादल्पमपि परिस्खलितम्। अभिमुखे च देवे का शक्तिः परिजनस्यान्यस्य वा कस्यचिदपराद्धुम्। किं तु विफला किल चिरमस्मीत्ययमस्या देव्याः संतापः। सुमहांश्च कालः संताप्यमानायाः। प्रथममपि स्वामिनी शयनस्नानभोजनभूषणपरिग्रहादिषु समुचितेष्वपि दिवसव्यापारेषु कथं कथमपि परिजनप्रयत्नात्प्रवर्त्यमाना सशोकैवासीत्। देवहृदयपीडापरिजिहीर्षया न दर्शितवती विकारम्। अद्य तु चतुर्दशीति भगवन्तं महाकालमर्चितुमितो गतया तत्र महाभारते वाच्यमाने श्रुतम्—'अपुत्राणां किल न सन्ति लोकाः शुभाः; पुन्नाम्नो नरकात्त्रायत इति पुत्त्रः' इति। एतच्छ्रुत्वा भवनमागत्य परिजनेन सशिरःप्रणाममभ्यर्थ्यमानापि नाहारमभिनन्दति, न भूषणपरिग्रहमाचरति, नोत्तरं प्रतिपद्यते, केवलमविरलबाष्पबिन्दुकलुषमुखी रोदिति। एतदाकर्ण्य देवः प्रमाणम्' इत्यभिधाय विरराम।

विरतवचनायां च तस्यां भूमिपालस्तूष्णीं मुहूर्तमिव स्थित्वा दीर्घमुष्णं च निश्वस्य निजगाद — "देवि, किमत्र क्रियतां दैवायत्ते वस्तुनि। अतिमात्रमलं रुदितेन। न वयमनुग्राह्याः प्रायो देवतानाम्। आत्मजपरिष्वङ्गामृतास्वादसुखस्य नूनमभाजनमस्माकं हृदयम्। अन्यस्मिञ्जन्मनि न कृतमवदातं कर्म। जन्मान्तरकृतं हि कर्म

फलमुपनयति पुरुषस्येह जन्मनि। न हि शक्यं दैवमन्यथा कर्तुमभियुक्तेनापि। यावन्मानुष्यके शक्यमुपपादयितुं तावत्सर्वमुपपाद्यताम्। अधिकां कुरु देवि, गुरुषु भक्तिम्। द्विगुणामुपपादय देवतासु पूजाम्। ऋषिजनसपर्यासु दर्शितादरा भव। परं हि दैवतमृषयः। यत्नेनाराधिता यथासमीहितफलानामतिदुर्लभानामपि वराणां दातारो भवन्ति। श्रूयते हि—पुरा चण्डकौशिकप्रभावान्मगधेषु बृहद्रथो नाम राजा जरासंधं नाम तनयं लेभे। दशरथश्च राजा परिणतवया विभण्डकमहामुनिसुतस्य ऋश्यशृङ्गस्य प्रसादादवाप चतुरः पुत्रान्। अन्ये च राजर्षयस्तपोवनानाराध्य पुत्रदर्शनामृतास्वादसुखभाजो बभूवुः। अमोघफला हि महामुनिसेवा भवति। 'अहमपि खलु देवि, कदा समुपारूढगर्भभरालसामापाण्डुमुखीं देवीं द्रक्ष्यामि। कदा मे तनयजन्ममहोत्सवानन्दनिर्भरो हरिष्यति पूर्णपात्रं परिजनः। कदा हारिद्रवसनधारिणी सुतसनाथोत्सङ्गा मामानन्दयिष्यति देवी। कदा सर्वौषधिपिञ्जरजटिलकेशः, निहितरक्षाघृतबिन्दुनि तालुनि विन्यस्तगौरसर्षपोन्मिश्रभूतिलेशः, गोरोचनाचित्रकण्ठसूत्रग्रन्थिः, उत्तानशयः, दशनशून्यस्मिताननः, पुत्रको जनयिष्यति मे हृदयाह्लादम्। कदा गोरोचनाकपिलद्युतिः, अन्तःपुरिकाकरतलपरंपरासंचार्यमाणमूर्तिः, अशेषजनवन्दितः, मङ्गलप्रदीप इव मे शोकान्धकारमुन्मूलयिष्यति चक्षुषोः। कदा च क्षितिरेणुधूसरो मण्डयिष्यति मम हृदयेन दृष्ट्या च सह परिभ्रमन्भवनाङ्गणम्। कदा मातुश्चरणयुगलरागोपयुक्तशेषेण पिण्डालक्तकरसेन वृद्धकञ्चुकिनां विडम्बयिष्यति मुखानि' इत्येतानि च अन्यानि च मनोरथशतानि चिन्तयतोऽन्तः संतप्यमानस्य प्रयान्ति

मे रजन्यः। मामपि दहत्येवायमहर्निशमनल इवानपत्यतासमुद्भवः शोकः। शून्यमिव मे प्रतिभाति जगत्। अफलमिव पश्यामि राज्यम्। अप्रतिविधेये तु विधातरि किं करोमि। तन्मुच्यतामयं देवि, शोकानुबन्धः। आधीयतां धैर्ये धर्मे च धीः। धर्मपरायणानां हि सदा समीपसंचारिण्यः कल्याणसंपदो भवन्ति" इत्येवमभिधाय, सलिलमादाय स्वयमाननमस्याः साश्रुलेखं ममार्ज। पुनः पुनश्च प्रियशतमधुराभिः शोकापनोदनिपुणाभिर्धर्मोपदेशगर्भाभिर्वाग्भिराश्वास्य, सुचिरं स्थित्वा, नरेन्द्रो निर्जगाम।

निर्गते च तस्मिन्, मन्दीभूतशोका विलासवती यथाक्रियमाणाभरणपरिग्रहादिकमुचितं दिवसव्यापारमन्वतिष्ठत्। ततः प्रभृति सुतरां देवताराधनेषु ब्राह्मणपूजासु गुरुजनसपर्यासु चादरवती बभूव। यद्यच्च किंचित्कुतश्चिच्छुश्राव, गर्भतृष्णया तत्तत्सर्वं चकार। न महान्तमपि क्लेशमजीगणत्। अनवरतदह्यमानगुग्गुलुबहुलधूपान्धकारितेषु चण्डिकागृहेषु धवलाम्बरशुचिमूर्तिरुपोषिता हरितकुशोपच्छदेषु मुसलशयनेषु सुष्वाप। पुण्यसलिलपूर्णैर्विविधकुसुमफलोपेतैः क्षीरतरुपल्लवलाञ्छनैः सर्वरत्नगर्भैः शातकुम्भकुम्भैर्गोकुलेषु वृद्धगोपवनिताकृतमङ्गलानां लक्षणसंपन्नानां गवामधः सस्नौ। प्रतिदिवसमुत्थायोत्थाय सर्वरत्नोपेतानि हैमानि तिलपात्राणि ब्राह्मणेभ्यो ददौ। महानरेन्द्रलिखितमण्डलमध्यवर्तिनी विविधबलिदानानन्दितदिग्देवतानि, बहुलपक्षचतुर्दशीनिशासु चतुष्पथे स्नपनमङ्गलानि भेजे। प्रसिद्धेषु नागकुलह्रदेषु ममज्ज। अश्वत्थप्रभृतीनुपपादितपूजान्महावनस्पतीन्कृतप्रदक्षिणा ववन्दे। दोलायमानमणिवलयेन पाणियुगलेन स्नाता स्वय-

मखण्डसिक्थसंपादितं रजतपात्रे परिगृहीतं वायसेभ्यो दध्योदनबलिमदात्। स्वयमुपहृतपिण्डपात्रान्भक्तिप्रवणेन मनसा सिद्धादेशान्नग्नक्षपणकान्पप्रच्छ। विप्रश्निकावचनानि बहु मेने। निमित्तज्ञानुपचचार। शाकुनज्ञानविदामादरमदर्शयत्। अनेकवृद्धपरंपरागमागतानि रहस्यान्यङ्गीचकार। दर्शनागतं द्विजजनमात्मजदर्शनोत्सुका वेदश्रुतीरकारयत्। अनवरतवाच्यमानाः पुण्यकथाः शुश्राव। गोरोचनालिखितभूर्जपत्रगर्भान्मन्त्रकरण्डकानुवाह। परिजनोऽपि चास्याः सततमुपश्रुत्यै निर्जगाम। तन्निमित्तानि च जग्राह। शिवाभ्यो मांसबलिपिण्डमनुदिनं निशि समुत्ससर्ज। स्वप्नदर्शनाश्चर्याण्याचार्याणामाचचक्षे। चत्वरेषु शिवबलिमुपजहार।

एवं च गच्छति काले, कदाजिद्राजा क्षीणभूयिष्ठायां रजन्याम्, स्वप्ने सितप्रासादशिखरस्थिताया विलासवत्या आनने सकलकलापरिपूर्णमण्डलं शशिनं प्रविशन्तमद्राक्षीत्। प्रबुद्धश्चोत्थाय, तस्मिन्नेव क्षणे समाहूय, शुकनासाय तं स्वप्नमकथयत्। स तं समुपजातहर्षः प्रत्युवाच—'देव, संपन्नाः सुचिरादस्माकं प्रजानां च मनोरथाः। कतिपयैरेवाहोभिरसंदेहमनुभवति स्वामी सुतमुखकमलावलोकनसुखम्। अद्य खलु मयापि निशि स्वप्ने धौतसकलवाससा शान्तमूर्तिना दिव्याकृतिना द्विजेन विकचं पुण्डरीकमुत्सङ्गे देव्या मनोरमाया निहितं दृष्टम्। आवेदयन्ति हि प्रत्यासन्नमानन्दमग्रपातीनि शुभानि निमित्तानि। अवितथफलाश्च प्रायो निशावसानसमयदृष्टा भवन्ति स्वप्नाः। सर्वथा न चिरेण मान्धातारमिव धौरेयं सर्वराजर्षीणां भुवनानन्दहेतुमात्मजं जनयिष्यति देवी; येनेयमवि-

च्छिन्नसंताना भविष्यति कुलसंततिः स्वामिनः' इति। एवमभिदधानमेव तं करेण गृहीत्वा नरेन्द्रः प्रविश्याभ्यन्तरमुभाभ्यामपि ताभ्यां स्वप्नाभ्यां विलासवतीमानन्दयांचकार।

कतिपयदिवसापगमे च देवताप्रसादात्सरसीमिव प्रतिमाशशी विवेश गर्भो विलासवतीम्। शनैः शनैश्च प्रतिदिनमुपचीयमानगर्भा मन्दं मन्दं संचचार। मुहुर्मुहुरनुबद्धविजृम्भिकमाजिह्मितलोचना सालसं निशश्वास। तथावस्थां तामहरहः स्वयमनेकरसवाञ्छितपानभोजनामालोक्य, इङ्गितकुशलः परिजनो विज्ञातवान्।

अथ तस्याः सर्वपरिजनप्रधानभूता कुलवर्धना नाम महत्तरिका, प्रशस्ते दिवसे प्रदोषवेलायाम्, अभ्यन्तरास्थानमण्डपगतम्, अनन्तरमुत्तुङ्गवेत्रासनोपविष्टेन समुपारूढविस्रम्भनिर्भरास्तास्ताः कथाः शुकनासेन सह कुर्वाणं भूमिपालमुपसृत्य, रहः कर्णमूले विलासवतीगर्भवृत्तान्तमकार्षीत्।

तेन तु तस्या वचनेनाश्रुतपूर्वेणासंभाव्येनामृतरसेनेव सिक्तसर्वाङ्गस्य राज्ञः शुकनासमुखे तत्क्षणं पपात चक्षुः। अनालोकितपूर्वं तु हर्षप्रकर्षमभिसमीक्ष्य भूपतेः, कुलवर्धनां च स्मितविकसितमुखीमागतां दृष्ट्वा, तस्य चार्थस्य सततं मनसि विपरिवर्तमानत्वादविदितवृत्तान्तोऽपि तत्कालोचितमपरमतिमहतो हर्षस्य कारणमपश्यन्, शुकनासः स्वयमुत्प्रेक्ष्य, समुत्सर्पितासनः समीपतरमुपसृत्य, नातिप्रकाशमाबभाषे—'देव, किमस्ति किंचित्तस्मिन्स्वप्नदर्शने सत्यम्? अत्यन्तमुत्फुल्ललोचना हि कुलवर्धना दृश्यते। देवस्यापीदमानन्दजलपरिप्लुतं तरलतारकं त्रिकमदावेदयति महत्प्रहर्षकारणमीक्षण-

युगलम्। उपारूढमहोत्सवश्रवणकुतूहलमुत्सुकोत्सुकं क्राम्यति मे मनः। तदावेदयतु देवः किमिदम्' इत्युक्तवति तस्मिन्, राजा विहस्याब्रवीत्—'यदि सत्यमनया यथा कथितं तथा, सर्वमवितथं स्वप्नदर्शनम्। अहं तु न श्रद्दधे। कुतोऽस्माकमियती भाग्यसंपत्। अभाजनं हि वयमीदृशानां प्रियवचनश्रवणानाम्। अवितथवादिनीमप्यहं कुलवर्धनामेवंविधानां कल्याणानामसंभावितमात्मानं मन्यमानः, विपरीतामिवाद्य पश्यामि। तदुत्तिष्ठ, स्वयमेव गत्वा किमत्र सत्यमिति देवीं पृष्ट्वा ज्ञास्यामि' इत्यभिधाय विसृज्य सकलनरेन्द्रलोकम्, उन्मुच्य स्वाङ्गेभ्यो भूषणानि कुलवर्धनायै दत्त्वा, सह शुकनासेनोत्थाय, हर्षविशेषनिर्भरेण त्वर्यमाणो मनसा, पुरःसंसर्पिणीनामनिललोलस्थूलशिखानां प्रदीपिकानामालोकेन समुत्सार्यमाणकक्षान्तरतिमिरसंहतिरन्तःपुरमयासीत्।

तत्र च सुकृतरक्षासंविधाने नवसुधानुलेपनधवलिते प्रज्वलितमङ्गलप्रदीपे पूर्णकलशाधिष्ठितद्वारपक्षके वासभवने, भूतिलिखितपत्रलताङ्कृतरक्षापरिक्षेपं शिरोभागविन्यस्तधवलनिद्रामङ्गलकलशं गर्भोचितं शयनतलमधिशयानाम्, कनकपात्रपरिगृहीतैरविच्छिन्नविरलावस्थितदधिलवैरग्रथितकुसुमाञ्जलिसनाथैः पूर्णभाजनैर्गोरोचनामिश्रगौरसर्षपैश्च सलिलाञ्जलिभिश्चाचारकुशलेनान्तःपुरजरतीजनेन क्रियमाणावतरणकमङ्गलां विलासवतीं ददर्श।

ससंभ्रमपरिजनप्रसारितकरतलावलम्बनावष्टम्भेन वामजानुविन्यस्तहस्तपल्लवमुत्तिष्ठन्तीं विलासवतीम् 'अलमलमत्यादरेण। देवि, नोत्थातव्यम्' इत्यभिधाय सह तया तस्मिन्नेव शयनीये पार्थिवः

समुपाविशत्। प्रमृष्टचामीकरचारुपादे धवलोपच्छदे चासन्ने शयनान्तरे शुकनासोऽपि न्यषीदत्।

अथ तामुपारूढगर्भामालोक्य, हर्षभरमन्थरेण मनसा प्रस्तुतपरिहासो राजा 'देवि, शुकनासः पृच्छति—यदाह कुलवर्धना किमपि, तत्किं तथैव' इत्युवाच। अथाव्यक्तस्मितच्छुरितकपोलाधरलोचना लज्जया विलासवती तत्क्षणमधोमुखी तस्थौ।

ततः क्रमेण यथासमीहितगर्भदोहदसंपादनप्रमुदिता, पूर्णे प्रसवसमये, पुण्येऽहनि, अनवरतगलन्नाडिकाकलितकालकलैर्बहिरागृहीतच्छायैर्गणकैर्गृहीते लग्ने, प्रशस्तायां वेलायाम्, सकललोकहृदयानन्दकारिणं विलासवती सुतमसूत।

तस्मिञ्जाते, सरभसमितस्ततः प्रधावितस्य परिजनस्य चरणशतसंक्षोभचलितक्षितितलः, विस्फार्यमाणान्तःपुरजनाभरणझंकारमनोहरः, पूर्णपात्राहरणविलुप्यमानवसनभूषणः, राजकुले दिष्टवृद्धिसंभ्रमोऽतिमहानभूत्। अनन्तरं च मङ्गलपटहपटुरवसंवर्धितेन, अनेकजनसहस्रकलकलबहुलेन त्रिभुवनमापूरयता, उत्सवकोलाहलेन सान्तःपुराः सप्रकृतयः सराजलोकाः सबालवृद्धा ननृतुरागोपालमुन्मत्ता इव हर्षनिर्भराः प्रजाः।

पार्थिवस्तु तनयाननदर्शनोत्सवहृतहृदयोऽपि, दिवसवशेन मौहूर्तिकगणोपदिष्टे प्रशस्ते मुहूर्ते, निवारितनिखिलपरिजनः, शुकनासद्वितीयः, मणिमयमङ्गलकलशयुगलाशून्येन संनिहितकनकमयहलमुसलयुगेन बन्दनमालान्तरालघटितघण्टागणेन द्वारदेशेन विराजमानम्, उभयतश्च द्वारपक्षकयोर्मर्यादानिपुणेन हरिद्राद्रवविच्छुरणपरिपिङ्गरा-

म्बरधारिणीं भगवतीं षष्ठीदेवीं कुर्वता विन्यस्तालक्तकपटलपाटलमध्यभागौ सूर्याचन्द्रमसावाबध्नता चन्दनजलधवलितेषु भित्तिशिखरभागेषु पद्मरागविचित्रचेलचीरकलापचिह्नामापीतपिष्टपङ्काङ्कितां वर्धमानपरम्परामन्यानि च प्रसवगृहमण्डनमङ्गलानि संपादयता पुरन्ध्रिवर्गेण समधिष्ठितम्, उपद्वारसंयतविविधगन्धकुसुममालालंकृतजरच्छागम्, अध्ययनमुखरद्विजगणविप्रकीर्यमाणशान्त्युदकलवम्, अनेकवृद्धाङ्गनारब्धसूतिकामङ्गलगीतिकामनोहरम्, अविच्छिन्नपठ्यमाननारायणनामसहस्रम्, सूतिकागृहमपश्यत् । अम्भः पावकं च स्पृष्ट्वा विवेश ।

प्रविश्य च प्रसवपरिक्षामपाण्डुमूर्तेरुत्सङ्गगतं विलासवत्याः, स्वप्रभासमुदयोपहतगर्भगृहप्रदीपप्रभम्, अपरित्यक्तगर्भरागत्वादुदयपरिपाटलमण्डलमिव सवितारम्, अपरसंध्यालोहितबिम्बमिव चन्द्रमसम्, विद्रुमकिसलयदलैरिव बालातपच्छेदैरिव पद्मरागरश्मिभिरिव रचितावयवम्, उद्भासमानैः सहजभूषणैरिव महापुरुषलक्षणैरुपेतम्, आह्लादहेतुमात्मजं ददर्श । विगतनिमेषनिश्चलपक्ष्मणा चक्षुषा पिबन्निव मनोरथसहस्रप्राप्तदर्शनं सस्पृहमीक्षमाणस्तनयाननं मुमुदे । कृतकृत्यं चात्मानं मेने । समृद्धमनोरथः शुकनासस्तु शनैः शनैरङ्गप्रत्यङ्गान्यस्य निरूपयन्, प्रीतिविस्तारितलोचनो भूमिपालमवादीत्—'देव, पश्य पश्यास्य कुमारस्य गर्भसंपीडनवशादपरिस्फुटावयवशोभस्यापि माहात्म्यमाविर्भावयन्ति चक्रवर्तिचिह्नानि । तथा हि—अस्य संध्यांशुरक्तबालशशिकलाकारे ललाटपट्टे नलिननालभङ्गतन्तुतन्वीयमूर्णा परिस्फुरति । रक्तोत्पलकलिकालोहिततलौ भगवतो विष्टर-

श्रवस इव शङ्खचक्रचिह्नौ प्रशस्तलेखालाञ्छितौ करौ। एष च दुन्दुभेरिवातिगम्भीरः स्वरयोगोऽस्य रुदतः श्रूयते' इति।

एवं कथयत्येव तस्मिन्, ससंभ्रमापसृतेन राजलोकेन दत्तमार्गः, त्वरितगतिरागत्य, मङ्गलनामा पुरुषः पादयोः प्रणम्य, राजानं व्यजिज्ञपत्—'देव, दिष्टया वर्धसे। प्रतिहतास्ते शत्रवः। चिरं जीव। जय च पृथिवीम्। त्वत्प्रसादादत्रभवतः शुकनासस्यापि ज्येष्ठायां ब्राह्मण्यां मनोरमाभिधानायां तनयो जातः। श्रुत्वा देवः प्रमाणम्' इति।

अथ नृपतिरमृतवृष्टिप्रतिममाकर्ण्य तद्वचनं प्रत्यवदत् — 'अहो कल्याणपरंपरा। सत्योऽयं जनप्रवादः—यद्विपद्विपदम्, संपत्संपदमनुबध्नातीति' इत्यभिधाय, प्रीतिविकसितमुखः सरभसमालिङ्ग्य विहसन् स्वयमेव शुकनासस्योत्तरीयं पूर्णपात्रं जहार। उत्थाय च तथैव तेन चारणगणेन विविधमुखवाद्यकृतकोलाहलेन पठता गायता चानुगम्यमानः, शुकनासभवनं गत्वा द्विगुणतरमुत्सवमकारयत्।

अतिक्रान्ते च षष्ठीजागरे, प्राप्ते दशमेऽहनि, पुण्ये मुहूर्ते, गाः सुवर्णं च कोटिशो ब्राह्मणसात्कृत्वा, 'मातुरस्य मया परिपूर्णमण्डलश्चन्द्रः स्वप्ने मुखकमलमाविशन्दृष्टः' इति स्वप्नानुरूपमेव राजा स्वसूनोः चन्द्रापीड इति नाम चकार। अपरेद्युः शुकनासोऽपि कृत्वा ब्राह्मणोचिताः सकलाः क्रियाः, राजानुमतमात्मजस्य विप्रजनोचितं वैशम्पायन इति नाम चक्रे। क्रमेण कृतचूडाकरणादिबालक्रियाकलापस्य शैशवमतिचक्राम चन्द्रापीडस्य।

तारापीडः क्रीडाव्यासङ्गविघातार्थं बहिर्नगरादनुसिप्रम् अर्धक्रोशमात्रायामम्, अतिमहता तुहिनगिरिशिखरमालानुकारिणा सुधाधवलेन

प्राकारमण्डलेन परिवृतम्, अधःकल्पितव्यायामशालं विद्यामन्दिरमकारयत्। सर्वविद्याचार्याणां च संग्रहे प्रयत्नमतिमहान्तमन्वतिष्ठत्।

तत्रस्थं च तं केसरिकिशोरकमिव पञ्जरगतं कृत्वा, प्रतिषिद्धनिर्गमम्, आचार्यकुलपुत्रप्रायपरिजनपरिवारम्, अपनीताशेषशिशुजनक्रीडाव्यासङ्गम्, अनन्यमनसम्, अखिलविद्योपादानार्थमाचार्येभ्यश्चन्द्रापीडं शोभने दिवसे वैशम्पायनद्वितीयमर्पयांबभूव। प्रतिदिनं चोत्थायोत्थाय सह विलासवत्या विरलपरिजनस्तत्रैव गत्वैनमालोकयामास राजा।

चन्द्रापीडोऽप्यनन्यहृदयतया तथा नियन्त्रितो राज्ञा, अचिरेणैव कालेन यथास्वमात्मकौशलं प्रकटयद्भिः पात्रवशादुपजातोत्साहैराचार्यैरुपदिश्यमानाः सर्वा विद्या जग्राह। तथा हि—पदे, वाक्ये, प्रमाणे, धर्मशास्त्रे, राजनीतिषु, व्यायामविद्यासु, सर्वेष्वप्यायुधविशेषेषु, रथचर्यासु, गजपृष्ठेषु, तुरंगमेषु, वीणावेणुमुरजप्रभृतिषु वाद्येषु, भरतादिप्रणीतेषु नृत्तशास्त्रेषु, नारदीयप्रभृतिषु गान्धर्ववेदविशेषेषु, शकुनिरुतज्ञाने, यन्त्रप्रयोगे, विषापहरणे, सुरुङ्गोपभेदे, तरणे, लङ्घने, प्लुतिषु, आरोहणे, सर्वलिपिषु, सर्वदेशभाषासु, अन्येष्वपि कलाविशेषेषु, परं कौशलमवाप।

सहजा चास्याजस्रमभ्यस्यतो वृकोदरस्येव शैशव एवाविर्बभूव सर्वलोकविस्मयजननी महाप्राणता। एकैकेन कृपाणप्रहारेण बाल एव तालतरून्मृणालदण्डानिव लुलाव। दशपुरुषसंवाहनयोग्येन चायोदण्डेन श्रममकरोत्। ऋते च महाप्राणतायाः, सर्वाभिरन्याभिः कलाभिरनुचकार तं वैशम्पायनः। चन्द्रापीडस्य तु सकलकलाकला-

पपरिचयबहुमानेन शुकनासगौरवेण सहपांसुक्रीडनतया च सर्वविस्रम्भस्थानं द्वितीयमिव हृदयं वैशम्पायनः परं मित्रमासीत्। निमेषमपि तेन विना स्थातुमेकाकी न शशाक। वैशम्पायनोऽपि तं न क्षणमपि विरहयांचकार।

एवं तस्य सर्वविद्यापरिचयमाचरतश्चन्द्रापीडस्य यौवनारम्भः प्रादुर्भवन् रमणीयस्यापि द्विगुणां रमणीयतां पुपोष। लक्ष्म्या सह वितस्तार वक्षःस्थलम्। बन्धुजनमनोरथैः सहापूर्यतोरुदण्डद्वयम्। स्वरेण सह गम्भीरतामाजगाम हृदयम्।

एवं च क्रमेण समारूढयौवनारम्भं परिसमाप्तसकलकलाविज्ञानम् अधीताशेषविद्यं चावगम्य, अनुमोदितमाचार्यैश्चन्द्रापीडमानेतुं राजा बलाधिकृतं बलाहकनामानमाहूय प्राहिणोत्।

स गत्वा विद्यागृहं द्वाःस्थैः समावेदितः प्रविश्य, शिरसा प्रणम्य, सविनयमासने राजपुत्रानुमतो न्यषीदत्। स्थित्वा च मुहूर्तमात्रं बलाहकश्चन्द्रापीडमुपसृत्य दर्शितविनयो व्यजिज्ञपत्—'कुमार, महाराजः समाज्ञापयति—पूर्णा नो मनोरथाः। अधीतानि शास्त्राणि। शिक्षिताः सकलाः कलाः। गतोऽसि सर्वास्वायुधविद्यासु परां प्रतिष्ठाम्। अनुमतोऽसि निर्गमाय विद्यागृहात्सर्वाचार्यैः। उपगृहीतशिक्षमवगतसकलकलाकलापं पौर्णमासीशशिनमिव नवोद्गतं पश्यतु त्वां जनः। दर्शनं प्रति ते समुत्सुकान्यतीव सर्वाण्यन्तःपुराणि। अयमत्रभवतो दशमो वत्सरो विद्यागृहमधिवसतः। प्रविष्टोऽसि षष्ठमनुभवन्वर्षम्। एवं संपिण्डितेनामुना षोडशेन प्रवर्धसे। तदद्यप्रभृति निर्गत्य दर्शनो-

त्सुकाभ्यो दत्त्वा दर्शनमखिलाभ्यो मातृभ्यः, अभिवाद्य च गुरून्, अपगतनियन्त्रणो यथासुखमनुभव राज्यसुखानि। संमानय राजलोकम्। पूजय द्विजातीन्। परिपालय प्रजाः। आनन्दय बन्धुवर्गम्। अयं च ते त्रिभुवनैकरत्नमनिलगरुडसमजव इन्द्रायुधनामा तुरंगमः प्रेषितो महाराजेन द्वारि तिष्ठति। एष खलु देवस्य पारसीकाधिपतिना त्रिभुवनाश्चर्यमिति कृत्वा 'जलधिजलादुत्थितमयोनिजमिदमश्वरत्नमासादितं मया महाराजाधिरोहणयोग्यम्' इति संदिश्य प्रहितः। तदयमनुगृह्यतामधिरोहणेन। इदं च विनयोपपन्नानां कुलक्रमागतानां राजपुत्राणां सहस्रं परिचारार्थमनुप्रेषितं तुरंगमाधिरूढं द्वारि प्रणामलालसं प्रतिपालयति' इत्यभिधाय विरतवचसि बलाहके, चन्द्रापीडः पितुराज्ञां शिरसि कृत्वा, नवजलधरध्वानगम्भीरया गिरा 'प्रवेश्यतामिन्द्रायुधः' इति निर्जिगमिषुरादिदेश।

अथ वचनानन्तरमेव प्रवेशितम्, उभयतः खलीनकनककटकावलग्नाभ्यां पदे पदे कृताकुञ्चनप्रयत्नाभ्यां पुरुषाभ्यामवकृष्यमाणम्, ऊर्ध्वकरपुरुषप्राप्यपृष्ठभागम्, अतिनिष्ठुरेण मुहुर्मुहुः प्रकम्पितोदररन्ध्रेण हेषारवेण निर्भर्त्सयन्तमिवालीकवेगदुर्विदग्धं गरुत्मन्तम्, उत्कीर्णमिव जङ्घासु, विस्तारितमिवोरसि, श्लक्ष्णीकृतमिव मुखे, त्रैलोक्यसंचरणसहायमिव मारुतस्य, वेगसब्रह्मचारिणमिव मनसः, सकलभुवनार्घार्हमश्वातिशयमिन्द्रायुधमद्राक्षीत्।

दृष्ट्वा च तमदृष्टपूर्वमशेषलक्षणोपपन्नमश्वरूपातिशयम्, अतिधीरप्रकृतेरपि चन्द्रापीडस्य पस्पर्श विस्मयो हृदयम्। आसीच्चास्य मनसि – 'सरभसविवर्तनवलितवासुकिभ्रमितमन्दरेण मथ्नता जलनिधिजलम्,

इदमश्वरत्नमनभ्युद्धरता, किं नाम रत्नमुद्धृतं सुरासुरलोकेन। उच्चैःश्रवसा विस्मितहृदयो वञ्चितः खलु जलनिधिना शतमखः। मन्ये च भगवतो नारायणस्य चक्षुर्गोचरतामियता कालेन नायमुपगतः, येनाद्यापि तां गरुडारोहणव्यसनितां न परित्यजति। अहो खल्वतिशयितत्रिदशराजसमृद्धिरियं तातस्य राज्यलक्ष्मीः, यदेवंविधान्यपि सकलत्रिभुवनदुर्लभानि रत्नान्युपकरणतामुपगच्छन्ति। अतितेजस्वितया महाप्राणतया च सदैवतेवेयमस्याकृतिर्यत्सत्यमारोहणे शङ्कामिव मे जनयति। दैवतान्यपि हि मुनिशापवशादुज्झितनिजशरीरकाणि शापवचनोपनीतानि शरीरान्तराण्यध्यासत एव। असंशयमनेनापि महात्मना केनापि शापभाजा भवितव्यम्। आवेदयतीव मदन्तःकरणमस्य दिव्यताम्' इति विचिन्तयन्नेवारुरुक्षुरासनादुदतिष्ठत्।

मनसा च, तं तुरंगममनुपसृत्य 'महात्मन्नर्वन्, योऽसि सोऽसि। नमोऽस्तु ते। सर्वथा मर्षणीयोऽयमारोहणातिक्रमोऽस्माकम्। अपरिगतानि दैवतान्यप्यनुचितपरिभवभाञ्जि भवन्ति' इत्यामन्त्रयांबभूव। विदिताभिप्राय इव स तमिन्द्रायुधश्चटुलशिरःकेसरसटाहत्याकूणिताकेकरतारकेण तिर्यक्चक्षुषा विलोक्य हेषारवमकरोत्। अथानेन मधुरहेषितेन दत्तारोहणाभ्यनुज्ञ इवेन्द्रायुधमारुरोह चन्द्रापीडः। समारुह्य तं प्रादेशमात्रमिव त्रैलोक्यमखिलं मन्यमानो निर्गत्य, अतिनिष्ठुरेण खुरपुटानां रवेण हेषितेन च बधिरीकृतसकलभुवनविवरमदृष्टपर्यन्तमश्वसैन्यमपश्यत्। तच्च सागरजलमिव चन्द्रोदयेन चन्द्रापीडनिर्गमेन सकलमेव संचचालाश्वीयम्। अहमहमिकया च प्रणामलालसाः सम्भ्रमापनीतातपत्रशून्यशिरसः परस्परोत्पीडनकुपिततुरंगमनिवारणा-

यस्ता राजपुत्रास्तं पर्यवारयन्त। एकैकशश्च प्रतिनामग्रहणमावेद्यमाना वलाहकेन ते दूरावनतैः शिरोभिः प्रणेमुः ।

चन्द्रापीडस्तु तान्सर्वान्मानयित्वा यथोचितम्, अनन्तरतुरंगमाधिरूढेनानुगम्यमानो वैशम्पायनेन, स्थूलमुक्ताकलापजालकावृतेनोपरि चिह्नीकृतं केसरेणमुद्वहतातिमहता कार्तस्वरदण्डेन ध्रियमाणेनातपत्रेण निवारितातपः, जय जीवेति च मधुरवचसा मङ्गलप्रायमनवरतमुच्चैः पठता वन्दिजनेन स्तूयमानः, नगराभिमुखः प्रतस्थे।

क्रमेण च तं समासादितविग्रहमनङ्गमिवावतीर्णं नगरमार्गमनुप्राप्तमवलोक्य, सर्व एव परित्यक्तसकलव्यापारो जनः समजनि। 'अहो वयमतिपुण्यभाजः, यदिमाममानुपीमस्याकृतिमन्तःसमारूढप्रीतिरसनिष्यन्दविस्तारितेन लोचनयुगलेनानिवारिताः पश्यामः। सफला नोऽद्य जाता जन्मवत्ता। सर्वथा नमोऽस्मै रूपान्तरधारिणे भगवते चन्द्रापीडच्छद्मने पुण्डरीकेक्षणाय' इति वदन्नारचितप्रणामाञ्जलिर्नगरलोकः प्रणनाम। सर्वतश्च समपावृतकवाटपुटप्रकटवातायनसहस्रतया चन्द्रापीडदर्शनकुतूहलान्नगरमपि समुन्मीलितलोचननिवहमिवाभवत्। क्रमेण च चन्द्रापीडो राजद्वारमासाद्य तुरंगमादवततार।

अवतीर्य च करतलेन करे वैशम्पायनमवलम्ब्य, पुरः सविनयं प्रस्थितेन वलाहकेनोपदिश्यमानमार्गः, त्रिभुवनमिव पुञ्जीभूतम्, आगृहीतकनकवेत्रलतैः सितवारवाणधारिभिः महाप्रमाणैर्दिवानिशमालिखितैरिवोत्कीर्णैरिव तोरणस्तम्भनिषण्णैर्द्वारपालैरनुज्झितद्वारदेशम्, अन्तर्गतायुधनिवहाभिराशीविषकुलसंकुलाभिः पातालगुहाभिरिवातिगम्भीराभिरायुधशालाभिरुपेतम्, अनवरतसंगीतमृदङ्गध्वनिमामीलित-

-लोचनत्रिभागेण वामदशनकोटिनिषण्णहस्तेन निश्चलकर्णतालेनाकर्णयता गन्धमादननाम्ना गन्धहस्तिना सनाथीकृतैकदेशम्, उज्ज्वलपट्टकम्बलपटप्रावारितपृष्ठैश्च भूपालवल्लभैर्मन्दुरागतैस्तुरंगमैरुद्भासितम्, अधिकरणमण्डपगतैश्चार्यवेषैरत्युच्चवेत्रासनोपविष्टैर्धर्ममयैरिव धर्माधिकारिभिर्महापुरुषैरधिष्ठितम् , अधिगतसकलग्रामनगरनामभिरेकभवनमिव जगदखिलमालोकयद्भिरालिखितसकलभुवनव्यापारतया धर्मराजनगरव्यतिकरमिव दर्शयद्भिरधिकरणलेखकैरालिख्यमानशासनसहस्रम्, आस्थानमण्डपगतेन च यथोचितासनोपविष्टेन भावयता नरपतिकृतकाव्यसुभाषितानि गृह्णता कविगुणान् मूर्धाभिषिक्तेन सामन्तलोकेनाधिष्ठितम्, एकदेशनिपण्णचामीकरशृङ्खलासंयतश्वगणम्, अनेककुब्जकिरातवर्षवरबधिरवामनकमूकसंकुलम् , इभपतिमदपरिमलामर्षजृम्भितैश्च निष्कूजद्भिः पञ्जरकेसरिभिरुद्भास्यमानम्, जलधरसनाथमिव कृष्णागुरुधूमपटलैः, सबालातपमिव रक्ताशोकैः, सतारागणमिव मुक्ताकलापैः, सवर्षासमयमिव धारागृहैः, सतडिल्लतमिव हेममयीभिर्मयूरयष्टिभिः, सगृहदैवतमिव सालभञ्जिकाभिः, उत्कृष्टकविगद्यमिव विविधवर्णश्रेणिप्रतिपाद्यमानाभिनवार्थसंचयम्, संध्यासमयमिव दृश्यमानचन्द्रापीडोदयम्, बलभद्रमिव कादम्बरीरसविशेषवर्णनाकुलम्, दिव्यमुनिगणमिव कलापिसनाथश्वेतकेतुशोभितं राजकुलं विवेश।

ससंभ्रमोपगतैश्च कृतप्रणामैः प्रतीहारमण्डलैरुपदिश्यमानमार्गः, पदे पदे चाभ्यन्तरविनिर्गताभिराचारकुशलाभिरन्तःपुरवृद्धाभिः क्रियमाणावतरणमङ्गलः, भुवनान्तराणीव विविधप्राणिसहस्रसंकुलानि सप्त

कक्षान्तराण्यतिक्रम्य, कुलक्रमागतैरुदात्तान्वयैरनुरक्तैः सर्वतः शरीररक्षाधिकारनियुक्तैः पुरुषैः परिवृतं हंसधवलशयनतले निषण्णं पितरमपश्यत्।

'आलोकय' इति च प्रतीहारवचनानन्तरमतिदूरावनतेन शिरसा कृतप्रणामम् 'एह्येहि' इत्यभिदधानः, दूरादेव प्रसारितभुजयुगलः, तं पिता विनयावनतमालिलिङ्ग। आलिङ्गितोन्मुक्तश्च पितुश्चरणपीठसमीपे पिण्डीकृतमुत्तरीयमात्मताम्बूलकरङ्कवाहिन्या सत्वरमासनीकृतम् 'अपनय' इति शनैर्वदन्नग्रचरणेन समुत्सार्य, चन्द्रापीडः क्षितितल एव निषसाद। अनन्तरनिहिते चास्यासने राज्ञा सुतनिर्विशेषमुपगूढो वैशम्पायनो न्यषीदत्। मुहूर्तमिव स्थित्वा 'गच्छ वत्स, पुत्रवत्सलां मातरमभिवाद्य दर्शनलालसा यथाक्रमं सर्वा जननीर्दर्शनेनानन्दय' इति विसर्जितः पित्रा, सविनयमुत्थाय, निवारितपरिजनः, वैशम्पायनद्वितीयः, अन्तःपुरप्रवेशायोग्येन राजपरिजनेनोपदिश्यमानवर्त्मा अन्तःपुरमाययौ।

तत्र धवलकञ्चुकावच्छन्नशरीरैरनेकशतसंख्यैः समन्तात्परिवृतां शुद्धान्तान्तर्वंशिकैः, अतिप्रशान्ताकाराभिश्च कषायरक्ताम्बरधारिणीभिर्भूतपूर्वाः पुण्याः कथाः कथयन्तीभिर्जरत्प्रव्रजिताभिर्विनोद्यमानाम्, समुपसृत्य मातरं ननाम।

सा तु तं ससंभ्रममुत्थाप्य, सत्यप्याज्ञासंपादनदक्षे पार्श्वपरिवर्तिनि परिजने स्वयमेव कृतावतरणका, हृदयेनान्तःशुभशतान्यभिध्यायन्ती, मूर्धन्युपाघ्राय, तं सुचिरमाशिश्लेष। अनन्तरं च तथैव कृतयथोचितसमुपचारमाश्लिष्टवैशम्पायना स्वयमुपविश्य, विनयाद-

वनितले समुपविशन्तमाकृष्य बलादनिच्छन्तमपि चन्द्रापीडमुत्सङ्गमारोपितवती। ससंभ्रमपरिजनोपनीतायामासन्द्यामुपविष्टे च वैशम्पायने, चन्द्रापीडं पुनःपुनरालिङ्ग्य, ललाटदेशे वक्षसि भुजशिखरयोश्च मुहुर्मुहुः करतलेन परामृशन्ती विलासवती तमवादीत्—'वत्स, कठिनहृदयस्ते पिता, येनेयमाकृतिरीदृशी त्रिभुवनलालनीया क्लेशमतिमहान्तमियन्तं कालं लम्भिता। कथमसि सोढवानतिदीर्घामिमा गुरुजनयन्त्रणाम्। अहो बालस्यापि सतः कठोरस्येव ते महद्धैर्यम्। अहो विगलितशिशुजनक्रीडाकौतुकलाघवमर्भके त्वयि हृदयम्। अहो गुरुजनस्योपरि भक्तिरसाधारणी। सर्वथा यथा पितुः प्रसादात्समस्ताभिरुपेतो विद्याभिरालोकितोऽसि, एवमचिरेणैव कालेनानुरूपाभिर्वधूभिरुपेतमालोकयिष्यामि' इत्येवमभिधाय लज्जास्मितावनतं कपोले पर्यचुम्बदेनम्। एवं च तत्रापि नातिचिरमेव स्थित्वा, क्रमेण सर्वान्तःपुराणि दर्शनेनानन्दयामास। निर्गत्य च राजकुलद्वारावस्थितमिन्द्रायुधमारुह्य तथैव तेन राजपुत्रलोकेनानुगम्यमानः, शुकनासं द्रष्टुमयासीत्।

समन्ततो विविधशास्त्राञ्जनोन्मीलितबुद्धिलोचनैः शाक्यमुनिशासनपथधौरेयै रक्तपटैः पाशुपतैर्द्विजैश्च दिवानिशमासेव्यमानं शुकनासगृहद्वारमासाद्य, राजकुल इव राजपुत्रो बाह्याङ्गण एव तुरंगादवततार। द्वारदेशावस्थापिततुरंगश्च वैशम्पायनमवलम्ब्य, नवनवसुधावदातप्रासादसहस्रनिरन्तरं द्वितीयमिव राजकुलं शुकनासभवनं विवेश। प्रविश्य चानेकनरेन्द्रसहस्रमध्योपविष्टमपरमिव पितरमुपदर्शितविनयो दूरावनतेन मौलिना शुकनासं ववन्दे।

शुकनासस्तं ससंभ्रममुत्थायानुपूर्व्येणोत्थितराजलोकः सादरमभिमुखदत्ताविरलपदः प्रहर्षविस्फारितलोचनागतानन्दजलकणः सह वैशम्पायनेन प्रेम्णा गाढमालिलिङ्ग । आलिङ्गितोन्मुक्तश्च सादरोपनीतमपहाय रत्नासनम्, अवनावेव राजपुत्रः समुपाविशत् । तदनु च वैशम्पायनः ।

समुपविष्टे च राजपुत्रे शुकनासवर्जमन्यदखिलमवनिपालचक्रमुज्झितनिजासनमवनितलमभजत । स्थित्वा च तूष्णीं क्षणमिव, शुकनासः समुद्गतप्रीतिपुलकैरङ्गैरावेद्यमानहृदयहर्षप्रकर्षः, तमब्रवीत् — 'तात चन्द्रापीड, अद्य खलु देवस्य तारापीडस्य समाप्तविद्यमुपारूढयौवनमालोक्य भवन्तम्, सुचिराद्भुवनराज्यफलप्राप्तिरुपजाता । अद्य समृद्धाः सर्वा गुरुजनाशिषः । अद्य फलितमनेकजन्मान्तरोपात्तमवदातं कर्म । अद्य प्रसन्नाः कुलदेवताः । न ह्यपुण्यभाजां भवादृशास्त्रिभुवनविस्मयहेतवः पुत्रतां प्रतिपद्यन्ते । क्वेदं वयः । क्वेयममानुषी शक्तिः । क्व चेदमशेषविद्याग्रहणसामर्थ्यम् । अहो, धन्याः प्रजाः, यासां भरतभगीरथप्रतिमो भवानुत्पन्नः पालयिता । किं खलु कृतमवदातं कर्म वसुंधरया, ययासि भर्ता समासादितः । सर्वथा कल्पकोटीमहावराह इव दंष्ट्रावलयेन वह बाहुना वसुंधराभारं सह पित्रा' इत्यभिधाय च, स्वयमाभरणवसनकुसुमाङ्गरागादिभिरभ्यर्च्य विसर्जयांचकार ।

विसर्जितश्चोत्थायान्तःपुरं प्रविश्य, दृष्ट्वा वैशम्पायनमातरं मनोरमाभिधानाम्, निर्गत्य समारुह्येन्द्रायुधम्, पित्रा पूर्वकल्पितं प्रतिच्छन्दकमिव राजकुलस्य कुमारो भवनं जगाम । गत्वा च श्रीमण्डपाव-

स्थिते शयने मुहूर्तमुपविश्य, सह तेन राजपुत्रलोकेनाभिषेकादिकमशनावसानमकरोद्दिवसविधिम्। अभ्यन्तरे च स्वशयनीयगृह एवेन्द्रायुधस्यावस्थानमकल्पयत्।

एवंप्रायेण चास्योदन्तेन तदहः परिणतिमुपययौ। गगनतलादवतरन्त्या दिवसश्रियः पद्मरागनूपुरमिव स्वप्रभापिहितरन्ध्रं रविमण्डलमुन्मुक्तपादं पपात। कमलिनीपरिमलपरिचयागतालिमालाकुलितकण्ठं कालपाशैरिव चक्रवाकमिथुनमाकृष्यमाणं विजवटे।

क्रमेण च प्रतीचीकर्णपूररक्तोत्पले लोकान्तरमुपगते भगवति गभस्तिमालिनि, कमलिनीनिपीतमातपमुन्मूलयितुमन्धकारपल्लवेष्विव विशत्सु रक्तकमलोदराणि मधुकरकुलेषु, शनैः शनैश्च गलिते संध्यारागे, दिक्षु दिक्षु विक्षिप्तेषु संध्यादेवतार्चनबलिपिण्डेषु, कृतराजस्वस्त्ययनेषु निष्क्रामत्सु पुरोहितेषु, प्रज्वलितदीपिकासहस्रप्रतिबिम्बचुम्बितेषु कृतविकचचम्पकदलोपहारेष्विव मणिभूमिकुट्टिमेषु, सूर्यकान्तमणिभ्य इव संक्रान्तानलेषु ज्वलत्सु मानिनीनां शोकविधुरेषु हृदयेषु, प्रवृत्ते प्रदोषसमये, चन्द्रापीडो राजकुलं गत्वा पितुः समीपे मुहूर्तं स्थित्वा, दृष्ट्वा च विलासवतीम्, आगत्य स्वभवनं शयनतलमधिशिश्ये।

प्रभातायां च निशीथिन्याम्, समुत्थाय समभ्यनुज्ञातः पित्रा, अभिनवमृगयाकौतुकावकृष्यमाणहृदयः, भगवत्यनुदित एव सहस्ररश्मौ, आरुह्येन्द्रायुधम्, अग्रतो बालेयप्रमाणानाकर्षद्भिश्चामीकरशृङ्खलाभिः कौलेयकान् कोदण्डपाणिभिः श्वपोषकैरनवरतकृतकोलाहलैः प्रधावद्भिर्द्विगुणीक्रियमाणगमनोत्साहः, बहुगजतुरगपदातिपरिवृतो वनं ययौ।

तत्र च कर्णान्तावकृष्टमुक्तैर्नाराचैर्वनवराहान् केसरिणः कुरङ्कांश्च सहस्रशो जघान। अन्यांश्च जीवत एव महाप्राणतया स्फुरतो जग्राह।

समारूढे च मध्यमह्नः सवितरि, वनात्, स्नानोत्थितेनेव श्रमसलिलबिन्दुवर्षमनवरतमुज्झता श्रमशिथिलमुखगलितफेनिलरुधिरलवेनेन्द्रायुधेनोह्यमानः, दूरविच्छिन्नेन पदातिपरिजनेन शून्यीकृतपुरोभागः, प्रजवितुरंगमाधिरूढैरल्पावशिष्टैः सह राजपुत्रैः 'एवं मृगपतिः, एवं वराहः, एवं शरभः' इति तमेव मृगयावृत्तान्तमुच्चारयन्, स्वभवनमाजगाम।

अवतीर्य च तुरंगमात्ससंभ्रमप्रधावितपरिजनोपनीते समुपविश्यासने, वारवाणमवतार्य, अपनीय चाशेषं तुरंगमाधिरोहणोचितं वेषपरिग्रहम्, इतस्ततःप्रचलिततालवृन्तपवनापनीयमानश्रमो मुहूर्तं विशश्राम। विश्रम्य च मणिरजतकनककलशशतसनाथां स्नानभूमिमगात्। निर्वर्तिताभिषेकव्यापारस्य च कृतदेवतार्चनस्याङ्गरागभूमौ समुपविष्टस्य, राज्ञा विसर्जिता राजकुलपरिचारिकाः पटलकविनिहितानि विविधान्याभरणानि माल्यान्यङ्गरागान्वासांसि चादाय, पुरतस्तस्योपतस्थुः, उपनिन्युश्च। यथाक्रममादाय च ताभ्यः प्रथमं स्वयमुपलिप्य वैशम्पायनम्, उपरचिताङ्गरागः, दत्त्वा च समीपवर्तिभ्यो यथार्हमाभरणवसनाङ्गरागकुसुमानि, आहारमण्डपमगच्छत्।

तत्र च द्विगुणीकृतकुथासनोपविष्टः, समीपोपविष्टेन तद्गुणापवर्णनपरेण वैशम्पायनेन यथार्हभूमिभागोपवेशितेन राजपुत्रलोकेन 'इदमस्मै दीयताम्, इदमस्मै दीयताम्' इति प्रसादविशेषदर्शनसंवर्धितसेवारसेनाहारविधिमकरोत्। उपस्पृश्य च, गृहीतताम्बूलस्तस्मि-

न्मुहूर्तमिव स्थित्वा, इन्द्रायुधसमीपमगमत्। तत्र चानुपविष्ट एव तद्गुणोपवर्णनप्रायालापाः कथाः कृत्वा, स्वयमेवेन्द्रायुधस्य पुरो यवसमाकीर्य निर्गत्य राजकुलमयासीत्। तेनैव क्रमेणावलोक्य राजानम्, आगत्य निशामनैषीत्।

अपरेद्युश्च प्रभातसमय एव सर्वान्तःपुराधिकृतम्, अनुमार्गागतया शक्रगोपकालोहितरागेणांशुकेन रचितावगुण्ठनया समसुवृत्ततुङ्गनासिकया विकसितपुण्डरीकधवललोचनया महानुभावाकारयानुगम्यमानं कन्यकया, कैलासनामानं कञ्चुकिनमायान्तमपश्यत्।

स कृतप्रणामः समुपसृत्य क्षितितलनिहितदक्षिणकरो विज्ञापयामास—'कुमार, महादेवी विलासवती समाज्ञापयति—इयं खलु कन्यका महाराजेन पूर्वं कुलूतराजधानीमवजित्य कुलूतेश्वरदुहिता पत्रलेखाभिधाना बालिका सती बन्दीजनेन सहानीयान्तःपुरपरिचारिकामध्यमुपनीता। सा मया विगतनाथा राजदुहितेति समुपजातस्नेहया दुहितृनिर्विशेषमियन्तं कालमुपलालिता संवर्धिता च। तदियमिदानीमुचिता भवतस्ताम्बूलकरङ्कवाहिनीति कृत्वा मया प्रेषिता। न चास्यामायुष्मता परिजनसामान्यदृष्टिना भवितव्यम्। स्वचित्तवृत्तिरिव चापलेभ्यो निवारणीया। सुहृदिव सर्वविस्रम्भेष्वभ्यन्तरीकरणीया। दीर्घकालसंवर्धितस्नेहतया स्वसुतायामिव हृदयमस्यामस्ति मे। नियतं स्वयमेवेयमतिविनीततया कतिपयैरेव दिवसैः कुमारमाराधयिष्यति। अविदितशीलश्चास्याः कुमार इति संदिश्यते। सर्वथा तथा कल्याणिना प्रयतितव्यम्, यथेयमतिचिरमुचिता परिचारिका ते भवति' इत्यभिधाय विरतवचसि कैलासे, कृताभिजातप्र-

णामां पत्रलेखामनिमिषलोचनं सुचिरमालोक्य, चन्द्रापीडः 'यथाज्ञापयत्यम्बा' इत्येवमुक्त्वा कञ्चुकिनं प्रेषयामास।

पत्रलेखा तु ततः प्रभृति दर्शनेनैव समुपजातसेवारसा, न दिवा, न रात्रौ, न सुप्तस्य, नासीनस्य, नोत्थितस्य, न भ्रमतः, न राजकुलगतस्य, छायेव राजसूनोः पार्श्वं मुमोच। चन्द्रापीडस्यापि तस्या दर्शनादारभ्य प्रतिक्षणमुपचीयमाना महती प्रीतिरासीत्। आत्महृदयादव्यतिरिक्तामिव चैनां सर्वविस्रम्भेष्वमन्यत।

एवं समतिक्रामत्सु केषुचिद्दिवसेषु, राजा चन्द्रापीडस्य यौवराज्याभिषेकं चिकीर्षुः, प्रतीहारानुपकरणसंभारसंग्रहार्थमादिदेश।

समुपस्थितयौवराज्याभिषेकं च तं कदाचिद्दर्शनार्थमागतमारूढविनयमपि विनीततरमिच्छञ्शुकनासः सविस्तरमुवाच—'तात चन्द्रापीड, विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति। केवलं च निसर्गत एवाभानुभेद्यम्, अप्रदीपप्रभापनेयम्, अतिगहनं तमो यौवनप्रभवम्। अपरिणामोपशमो दारुणो लक्ष्मीमदः। कष्टमनञ्जनवर्तिसाध्यमपरमैश्वर्यतिमिरान्धत्वम् इत्यतो विस्तरेणाभिधीयसे। गर्भेश्वरत्वम्, अभिनवयौवनत्वम्, अप्रतिमरूपत्वम्, अमानुषशक्तित्वं चेति महतीयं खल्वनर्थपरंपरा। सर्वाविनयानामेकैकमप्येषामायतनम्। किमुत समवायः। यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरमात्मेच्छया यौवनसमये पुरुषं प्रकृतिः। नाशयति च दिङ्मोह इवोन्मार्गप्रवर्तकः पुरुषमत्यासङ्गो विषयेषु। भवादृशा एव भवन्ति भाजनान्युपदेशानाम्। अपगतमले हि मनसि, स्फटिकमणाविव रजनि-

करगमस्तयो विशन्ति सुखमुपदेशगुणाः । गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य । इतरस्य तु करिण इव शङ्खाभरणमाननशोभासमुदयमधिकतरमुपजनयति । हरति च सकलमतिमलिनमप्यन्धकारमिव दोषजातं प्रदोषसमयनिशाकर इव गुरूपदेशः । अयमेव चानास्वादितविषयरसस्य ते काल उपदेशस्य । कुसुमशरशरप्रहारजर्जरिते हि हृदये जलमिव गलत्युपदिष्टम् । अकारणं च भवति दुष्प्रकृतेरन्वयः श्रुतं वा विनयस्य । चन्दनप्रभवो न दहति किमनलः ? किंवा प्रशमहेतुनापि न प्रचण्डतरीभवति बडबानलो वारिणा ? गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षममजलं स्नानम्, अनुपजातपलितादिवैरूप्यमजरं वृद्धत्वम्, असुवर्णविरचनमग्राम्यं कर्णाभरणम् । विशेषेण तु राज्ञाम् । विरला हि तेषामुपदेष्टारः । प्रतिशब्दक इव राजवचनमनुगच्छति जनो भयात् । उद्दामदर्पश्वयथुस्थगितश्रवणविवराश्चोपदिश्यमानमपि ते न शृण्वन्ति । शृण्वन्तोऽपि च गजनिमीलितेनावधीरयन्तः, खेदयन्ति हितोपदेशदायिनो गुरून् । अहंकारदाहज्वरमूर्छान्धकारिता विह्वला हि राजप्रकृतिः ।

आलोकयतु तावत्कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम् । इयं हि लक्ष्मीः क्षीरसागरात्, इन्दुशकलादेकान्तवक्रताम्, उच्चैःश्रवसश्चञ्चलताम्, कालकूटान्मोहनशक्तिम्, मदिराया मदम्, कौस्तुभमणेरतिनैष्ठुर्यम्, इत्येतानि सहवासपरिचयवशाद्विरहविनोदचिह्नानि गृहीत्वैवोद्गता । न ह्येवंविधमपरमपरिचितमिह जगति किंचिदस्ति, यथेयमनार्या । लब्धापि खलु दुःखेन परिपाल्यते । दृढगुणपाशसंदाननिस्पन्दीकृतापि नश्यति । न परिचयं रक्षति । नाभिजनमीक्षते ।

न कुलक्रममनुवर्तते । न शीलं पश्यति । न श्रुतमाकर्णयति । न धर्ममनुरुध्यते । न त्यागमाद्रियते । न विशेषज्ञतां विचारयति । गन्धर्वनगरलेखेव पश्यत एव नश्यति । अद्याप्यारूढमन्दरपरिवर्तभ्रान्तिजनितसंस्कारेव परिभ्रमति । पारुष्यमिवोपशिक्षितुमसिधारासु निवसति । दिवसकरगतिरिव प्रकटितविविधसंक्रान्तिः । पातालगुहेव तमोबहुला । प्रावृडिवाचिरद्युतिकारिणी । स्वल्पसत्त्वमुन्मत्तीकरोति । सरस्वतीपरिगृहीतमीर्ष्ययेव नालिङ्गति जनम् । गुणवन्तमपवित्रमिव न स्पृशति । उदारसत्त्वममङ्गलमिव न बहु मन्यते । सुजनमनिमित्तमिव न पश्यति । अभिजातमहिमिव लङ्घयति । शूरं कण्टकमिव परिहरति । दातारं दुःस्वप्नमिव न स्मरति । विनीतं पातकिनमिव नोपसर्पति । मनस्विनमुन्मत्तमिवोपहसति ।

यथा यथा चेयं चपला दीप्यते, तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्वमति । तथाहि—इयं संवर्धनवारिधारा तृष्णाविषवल्लीनाम्, व्याधगीतिरिन्द्रियमृगाणाम्, परामर्शधूमलेखा सच्चरितचित्राणाम्, विभ्रमशय्या मोहदीर्घनिद्राणाम्, आवासदरी दोषाशीविषाणाम्, अकालप्रावृट् गुणकलहंसकानाम्, प्रस्तावना कपटनाटकस्य, राहुजिह्वा धर्मेन्दुमण्डलस्य ।

न हि तं पश्यामि, यो ह्यपरिचितयानया न निर्भरमुपगूढः, यो वा न विप्रलब्धः । नियतमियमालेख्यगतापि चलति, श्रुताप्यभिसंधत्ते, चिन्तितापि वञ्चयति । एवंविधयापि चानया दुराचारया कथमपि दैववशेन परिगृहीता विक्लवा भवन्ति राजानः, सर्वाविनयाधिष्ठानतां च गच्छन्ति । तथाहि—अभिषेकसमय एवैषां मङ्गलकलश-

जलैरिव प्रक्षाल्यते दाक्षिण्यम्। अग्निकार्यधूमेनेव मलिनीभवति हृदयम्। उष्णीषपट्टबन्धेनेवाच्छाद्यते जरागमनस्मरणम्। आतपत्रमण्डलेनेवापवार्यते परलोकदर्शनम्। चामरपवनैरिवापह्रियते सत्यवादिता। वेत्रदण्डैरिवोत्सार्यन्ते गुणाः। तथाहि—केचिद्धनलवलाभावलेपविस्मृतजन्मानः, विविधविषयग्रासलालसैः पञ्चभिरप्यनेकसहस्रसंख्यैरिवेन्द्रियैरायास्यमानाः, प्रकृतिचञ्चलतया लब्धप्रसरेणैकेनापि शतसहस्रतामिवोपगतेन मनसाकुलीक्रियमाणाः, विह्वलतामुपयान्ति। धनोष्मणा पच्यमाना इव विचेष्टन्ते। गाढप्रहाराहता इवाङ्गानि न धारयन्ति। कुलीरा इव तिर्यक्परिभ्रमन्ति। अधर्मभग्नगतयः पङ्गव इव परेण संचार्यन्ते। मृषावादविपाकसंजातमुखरोगा इवातिकृच्छ्रेण जल्पन्ति। आसन्नमृत्यव इव बन्धुजनमपि नाभिजानन्ति। उत्कुपितलोचना इव तेजस्विनो नेक्षन्ते। कालदष्टा इव महामन्त्रैरपि न प्रतिबुध्यन्ते। तृष्णाविषमूर्च्छिताः कनकमयमिव सर्वं पश्यन्ति। इषव इव पानवर्धिततैक्ष्ण्याः परप्रेरिता विनाशयन्ति। श्मशानाग्नय इवातिरौद्रभूतयः। श्रूयमाणा अपि प्रेतपटहा इवोद्वेजयन्ति। चिन्त्यमाना अपि महापातकाध्यवसाया इवोपद्रवमुपजनयन्ति। अनुदिवसमापूर्यमाणाः पापेनेवाध्मातमूर्तयो भवन्ति। तदवस्थाश्च वल्मीकतृणाग्रावस्थिता जलबिन्दव इव पतितमप्यात्मानं नावगच्छन्ति।

अपरे तु स्वार्थनिष्पादनपरैर्धनपिशितग्रासगृध्रैरास्थाननलिनीधूर्तबकैः, द्यूतं विनोद इति, मृगया श्रम इति, पानं विलास इति, गुरुवचनावधीरणम् अपरप्रणेयत्वमिति, परिभवसहत्वं क्षमेति, स्वच्छन्दता प्रभुत्वमिति, देवावमाननं महासत्वतेति, तरलता उत्साह इति,

दोषानपि गुणपक्षमध्यारोपयद्भिरन्तः स्वयमपि विहसद्भिः प्रतारणकुशलै-र्धूर्तैरमानुषोचिताभिः स्तुतिभिः प्रतार्यमाणाः, वित्तमदमत्तचित्ताः, निश्चेतनतया तथैवेत्यात्मन्यारोपितालीकाभिमानाः, मर्त्यधर्माणोऽपि दिव्यांशावतीर्णमिव सदैवतमिवातिमानुषमात्मानमुत्प्रेक्षमाणाः, प्रारब्ध-दिव्योचितचेष्टानुभावाः, सर्वजनस्योपहास्यतामुपयान्ति । आत्मविड-म्बनां चानुजीविना जनेन क्रियमाणामभिनन्दन्ति । मनसा देवता-ध्यारोपणप्रतारणादन्तःप्रविष्टापरभुजद्वयमिवात्मबाहुयुगलं संभावयन्ति । त्वगन्तरिततृतीयलोचनं स्वललाटमाशङ्कन्ते । दर्शनप्रदानमप्यनु-ग्रहं गणयन्ति । दृष्टिपातमप्युपकारपक्षे स्थापयन्ति । संभाष-णमपि संविभागमध्ये कुर्वन्ति । आज्ञामपि वरप्रदानं मन्यन्ते । स्पर्श-मपि पावनमाकलयन्ति । मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः । न पूजयन्ति द्विजातीन् । न मानयन्ति मान्यान् । नाभ्यु-त्तिष्ठन्ति गुरून् । अनर्थकायासान्तरितविषयोपभोग इत्युपहसन्ति विद्व-ज्जनम् । जरावैक्लव्यप्रलपितमिति पश्यन्ति वृद्धजनोपदेशम् । आत्म-प्रज्ञापरिभव इत्यसूयन्ति सचिवोपदेशाय । कुप्यन्ति हितादिने । सर्वथा तमभिनन्दन्ति, तमालपन्ति, तं पार्श्वे कुर्वन्ति, तेन सह सुखमवति-ष्ठन्ते, तस्य वचनं शृण्वन्ति, तत्र वर्षन्ति, योऽहर्निशमनवरत-मुपरचिताञ्जलिरधिदैवतमिव विगतान्यकर्तव्यः स्तौति, यो वा माहा-त्म्यमुद्भावयति ।

किं वा तेषां सांप्रतम्, येषामतिनृशंसप्रायोपदेशनिर्घृणं कौटिल्यशास्त्रं प्रमाणम्, अभिचारक्रियाक्रूरैकप्रकृतयः पुरोधसो गुरवः, पराभिसंधा-नपरा मन्त्रिण उपदेष्टारः, सहजप्रेमार्द्रहृदयानुरक्ता भ्रातर उच्छेद्याः ।

तदेवंप्रायेऽतिकुटिलकष्टचेष्टासहस्रदारुणे राज्यतन्त्रेऽस्मिन्, महामोहकारिणि च यौवने, कुमार, तथा प्रयतेथाः; यथा नोपहस्यसे जनैः, न निन्द्यसे साधुभिः, न धिक्क्रियसे गुरुभिः, नोपालभ्यसे सुहृद्भिः, न शोच्यसे विद्वद्भिः। यथा च न प्रहस्यसे विटैः, न प्रतार्यसे कुशलैः, नावलुप्यसे सेवकवृकैः, न प्रलोभ्यसे वनिताभिः, 'नापह्रियसे सुखेन। कामं भवान्प्रकृत्यैव धीरः, पित्रा च महता प्रयत्नेन समारोपितसंस्कारः। तरलहृदयमप्रतिबुद्धं च मदयन्ति धनानि। तथापि भवद्गुणसंतोषो मामेवं मुखरीकृतवान्। इदमेव च पुनः पुनरभिधीयसे-विद्वांसमपि सचेतनमपि महासत्त्वमप्यभिजातमपि धीरमपि प्रयत्नवन्तमपि पुरुषमियं दुर्विनीता खलीकरोति लक्ष्मीरिति। सर्वथा कल्याणैः पित्रा क्रियमाणमनुभवतु भवान्यौवराज्याभिषेकमङ्गलम्। कुलक्रमागतामुद्वह पूर्वपुरुषैरूढां धुरम्। अवनमय द्विषतां शिरांसि। उन्नमय बन्धुवर्गम्। अभिषेकानन्तरं च प्रारब्धदिग्विजयः परिभ्रमन्विजितामपि तव पित्रा सप्तद्वीपभूषणां पुनर्विजयस्व वसुंधराम्। अयं च ते कालः प्रतापमारोपयितुम्। आरूढप्रतापो हि राजा त्रैलोक्यदर्शीव सिद्धादेशो भवति' इत्येतावदभिधायोपशशाम।

उपशान्तवचसि शुकनासे, चन्द्रापीडस्ताभिरमलाभिरुपदेशवाग्भिः प्रक्षालित इवोन्मीलित इव पवित्रीकृत इवोद्भासित इव प्रीतहृदयो मुहूर्तं स्थित्वा स्वभवनमाजगाम।

ततः कतिपयदिवसापगमे च, राजा स्वयमुत्क्षिप्तमङ्गलकलशः, सह शुकनासेन, पुण्येऽहनि, पुरोधसा संपादिताशेषराज्याभिषेकम-

ङ्गलम् अनेकनरपतिसहस्रपरिवृतः सर्वेभ्यस्तीर्थेभ्यः सर्वाभ्यो नदीभ्यः सर्वेभ्यश्च सागरेभ्यः समाहृतेन सर्वौषधिभिः सर्वफलैः सर्वमृद्भिः सर्वरत्नैश्च परिगृहीतेनानन्दबाष्पजलमिश्रेण मन्त्रपूतेन वारिणा सुतमभिषिषेच। अभिषेकसलिलार्द्रदेहं च तं लतेव पादपान्तरं निजपादपममुञ्चत्यपि तारापीडं तत्क्षणमेव संचक्राम राजलक्ष्मीः। अनन्तरमखिलान्तःपुरपरिवृतया च प्रेमार्द्रहृदयया विलासवत्या स्वयमा पादतलादामोदिना चन्दनेनानुलिप्तमूर्तिः, तत्कालप्रतिपन्नवेत्रदण्डेन पित्रा स्वयं पुरःप्रारब्धसमुत्सारणः, सभामण्डपमुपगम्य, काञ्चनमयं शशीव मेरुशृङ्गं चन्द्रापीडः सिंहासनमारुरोह।

आरूढस्य चास्य कृतयथोचितसकलराजलोकसंमानस्य मुहूर्तं स्थित्वा दिग्विजयप्रयाणशंसी प्रस्थानदुन्दुभिरामन्थरं दध्वान। ततो दुन्दुभिरवमाकर्ण्य 'जय जय' इति च सर्वतः समुद्घुष्यमाणजयशब्दः, सिंहासनात्सह द्विषतां श्रिया संचचाल चन्द्रापीडः। समन्तात्ससंभ्रमोत्थितैरनुगम्यमानो नरपतिसहस्रैः, आस्थानमण्डपान्निरगात्। निर्गत्य च पूर्वारूढया पत्रलेखया समध्यासितामुचितमङ्गल्यालंकारां करेणुकामधिरुह्य, मुक्ताफलजालिना शतशलाकेनातपत्रेण निवार्यमाणातपो निर्गन्तुमारेभे।

विनिर्गतश्च बहुलसिन्दूररेणुपाटलेन क्षितितलदोलायमानस्थूलमुक्ताकलापावचूलेन सितकुसुममालाजालशबलशिरसा संलग्नसंध्यातपेन तिर्यगावर्जितश्वेतगङ्गाप्रवाहेण तारागणदन्तुरितशिखरशिलातलेन मेरुगिरिणेव गन्धमादनेनानुगम्यमानः, कनकालंकारप्रभाकल्मा-

षितावयवेन च समाकृष्यमाणेनेन्द्रायुधेन सनाथीकृतपुरोभागः, शनैः शनैः प्रथममेव शातक्रतवीमाशामभिप्रतस्थे।

उच्चलितस्य चास्य, स्वभवनादुपपादितप्रस्थानमङ्गलः, धवलदुकूलवासाः, सितकुसुमाङ्गरागः, महता बलसमूहेन नरेन्द्रवृन्दैश्चानुगम्यमानः, धृतधवलातपत्रः, द्वितीय इव युवराजः, त्वरितपदसंचारिण्या करिण्या वैशम्पायनः समीपमाजगाम। आगत्य च रजनिकर इव रवेरासन्नवर्ती बभूव। अनन्तरमितश्चेतश्च 'निर्गतो युवराजः' इति समाकर्ण्य प्रधावतां बलानां भरेण तत्क्षणमाचकम्पे मेदिनी। क्षणेन च तुरगमयमिव महीतलम्, कुञ्जरमयमिव दिक्चक्रवालम्, आतपत्रमण्डलमयमिवान्तरिक्षम्, इभमदगन्धमय इव समीरणः, भूपालमयीव प्रजासृष्टिः, आभरणांशुमयीव दृष्टिः, किरीटमय इव दिवसः, जयशब्दमयमिव त्रिभुवनमभवत्।

बलबहुलकोलाहलभीता इव धवलध्वजनिवहनिरन्तरावृता ययुः क्वापि दश दिशः। मलिनावनिरजःसंस्पर्शशङ्कितमिव समदगजघटावचूलसहस्रसंरुद्धमतिदूरमम्बरतलमपससार। प्रबलवेत्रिवेत्रलतासमुत्सार्यमाणा इव तुरगखुररजोधूसरताभीता इवार्ककिरणा मुमुचुः पुरोभागम्। इभकरशीकरनिर्वापणत्रस्त इवातपत्रसंछादितातपो दिवसो ननाश। क्रमेण प्रसर्पतो बलस्य पुरः प्रधावतां जनकदम्बकानां कोलाहलेन, तारतरदीर्घेण च काहलानां निनादेन, खुररवविमिश्रेण च वाजिनां हेषारवेण, अनवरतकर्णतालस्वरसंपृक्तेन च दन्तिनामाडम्बररवेण, मङ्गलशङ्खशब्दसंवर्धितध्वनीनां च प्रयाणपटहानां निना-

देन, मुहुर्मुहुरितस्ततस्ताड्यमानानां डिण्डिमानां च निस्वनेन, जर्जरीकृतश्रवणपुटस्य मूर्च्छेवाभवज्जनस्य ।

क्रमेण च विकचकुवलयवनमिव नवोदकेन गगनतलमवष्टभ्यमानमलक्ष्यत क्षीरोदफेनपाण्डुना क्षितिक्षोदेन । बहुलरजोधूसरितमशिशिरकिरणबिम्बमवचूलचामरमिव निष्प्रभमभवत् । दुकूलपट्टधवला कदलिकेव कलुषतामाजगाम गगनापगा । नरपालबलभरमतिगुरुमसहमाना पुनरिव भारावतारणार्थममरलोकमारुरोह रजोमिषेण मही ।

अथ दन्तिनां दिशि दिशि करविवरविनिःसृतैः शीकरासारैः हेषारवविप्रकीर्णैश्च वाजिनां लालाजललवजालकैरुपशमिते रजसि, पुनरुपजातालोकासु दिक्षु, सागरसलिलादिवोन्मग्नमालोक्य तदपरिमाणं बलम्, उपजातविस्मयः सर्वतो दत्तदृष्टिर्वैशम्पायनश्चन्द्रापीडमाबभाषे—'युवराज, किं न जितं देवेन महाराजाधिराजेन तारापीडेन, यज्जेष्यसि । का दिशो न वशीकृताः, या वशीकरिष्यसि । कानि दुर्गाणि न प्रसाधितानि, यानि प्रसाधयिष्यसि । कानि रत्नानि नोपार्जितानि, यान्युपार्जयिष्यसि । कैर्न विरचितः शिरसि बालकमलकुड्मलकोमलः सेवाञ्जलिः । कैर्न घृष्टाः पादपीठे चूडामणयः । कैर्न प्रतिपन्ना वेत्रलताः । कैर्नोद्धूतानि चामराणि । कैर्नोच्चारिता जयशब्दाः । एते हि दशरथभगीरथभरतदिलीपालर्कमान्धातृप्रतिमाः कुलाभिमानशालिनः सोमपायिनो मूर्धाभिषिक्ताः पृथिव्यां सर्वपार्थिवाश्चूडामणिपल्लवैरुद्वहन्ति मङ्गल्यां भवच्चरणरजःसंहतिम् । एतानि चाप्यमीषामाप्लावितदशदिगन्तरालानि सैन्यानि भवन्तमुपासते । तथाहि—पश्य पश्य यस्यां यस्यां दिशि विक्षिप्यते चक्षुः, तस्यां तस्यां रसातलमि-

वोद्गिरति, वसुधेव सूते, ककुभ इव वमन्ति, गगनमिव वर्षति, दिवस इव सृजति, बलानि। अपरिमितबलभराक्रान्ता, मन्ये, स्मरति महाभारतसमरसंक्षोभस्याद्य क्षितिः। एष शिखरदेशेषु स्खलितमण्डलो ध्वजान् गणयन्निव कुतूहलाद्भ्रमति कदलिकावनान्तरेषु मयूखमाली। सर्वथा चित्रम्, यन्नाद्य विघटितसकलकुलशैलसंधिबन्धा सहस्रशः शकलीभवति बलभरेण धरित्री, यद्वा बलभरपीडितवसुधाधारणविधुरा न चलन्ति फणिनां पत्युः फणाभित्तयः' इति।

एवं वदत एव तस्य युवराजः, तृणमयप्राकारमन्दिरसहस्रसंबाधामुल्लासितधवलपटमण्डपशतशोभिनीमावासभूमिमवाप। तस्यां चावतीर्य राजवत्सर्वाः क्रियाश्चकार। सर्वैश्च तैः समेत्य नरपतिभिरमात्यैश्च विविधाभिः कथाभिर्विनोद्यमानः, तं दिवसमशेषमभिनवपितृवियोगजन्मना शोकावेगेनायास्यमानहृदयः, दुःखेनात्यवाहयत्। अतिवाहितदिवसश्च यामिनीमपि, स्वशयनीयस्य नातिदूरे निहितशयननिषण्णेन वैशम्पायनेन, अन्यतश्च समीपे क्षितितलविन्यस्तकुथप्रसुप्तया पत्रलेखया सह, अन्तरा पितृसक्तम्, अन्तरा मातृसंबद्धम्, अन्तरा शुकनासमयं कुर्वन्नालापम्, नात्युपजातनिद्रः प्रायेण जाग्रदेव निन्ये। प्रत्यूषे चोत्थाय, तेनैव क्रमेणानवरतप्रयाणकैः, प्रतिप्रयाणकमुपचीयमानेन सेनासमुदायेन जर्जरयन्वसुंधराम्, चूर्णयन्काननानि, समीकुर्वन्विषमाणि प्रातिष्ठत। शनैः शनैश्च स्वेच्छया परिभ्रमन्, नमयन्नुन्नतान्, उन्नमयन्नतान्, आश्वासयन्भीतान्, रक्षन् शरणागतान्, उन्मूलयन्विटपकान्, उत्सादयन्कण्टकान्, अभिषिञ्चन्स्थानस्थानेषु राजपुत्रान्, समर्जयन्रत्नानि, प्रतीच्छन्नुपायनानि, गृह्णन्करान्,

आदिशन्देशव्यवस्थाः, स्थापयन्स्वचिह्नानि, कुर्वन्कीर्तनानि, लेखयन् शासनानि, पूजयन्नग्रजन्मनः, प्रणमन्मुनीन्, पालयन्नाश्रमान्, जनयञ्जनानुरागम्, प्रकाशयन्विक्रमम्, आरोपयन्प्रतापम्, उपचिन्वन्यशः, विस्तारयन्गुणान्, प्रख्यापयन्सच्चरितम्, पृथिवीं विचचार। प्रथमं प्राचीम्, ततस्त्रिशङ्कुतिलकाम्, ततो वरुणलाञ्छनाम्, अनन्तरं सप्तर्षिताराशबलां दिशं विजिग्ये। वर्षत्रयेण चात्मीकृताशेषद्वीपान्तरं सकलमेव चतुरम्भोधिखातवलयपरिखाप्रमाणं बभ्राम महीमण्डलम्। ततः क्रमेणावजितसकलभुवनतलः, प्रदक्षिणीकृत्य वसुधां परिभ्रमन्, कदाचित्कैलाससमीपचारिणां हेमकूटधाम्नां किरातानां सुवर्णपुरं नाम निवासस्थानं नातिविप्रकृष्टं पूर्वजलनिधेर्जित्वा जग्राह। तत्र च निखिलधरणितलपर्यटनखिन्नस्य निजबलस्य विश्रामहेतोः कतिपयान्दिवसानतिष्ठत्।

एकदा तु तत्रस्थ एवेन्द्रायुधमारुह्य, मृगयानिर्गतो विचरन्काननम्, शैलशिखरादवतीर्णं यदृच्छया किंनरमिथुनमद्राक्षीत्। अपूर्वदर्शनतया तु समुपजातकुतूहलः कृतग्रहणाभिलाषः, तत्समीपमादरादुपसर्पिततुरंगः समुपसर्पन्, अदृष्टपूर्वपुरुषदर्शनत्रासप्रधावितं च तत्पलायमानमनवरतपार्ष्णिप्रहारद्विगुणीकृतजवेनेन्द्रायुधेनैकाकी निर्गत्य निजबलसमूहात्सुदूरमनुससार। 'अत्र गृह्यते, अत्र गृह्यते, इदं गृहीतम्, इदं गृहीतम्' इत्यतिरभसाकृष्टचेताः, महाजवतया तुरंगमस्य मुहूर्तमात्रेणैकपदमिवासहायस्तस्मात्प्रदेशात्पञ्चदशयोजनमात्रमध्वानं जगाम। तच्चानुबध्यमानं किंनरमिथुनमालोकयत एवास्य संमुखापतितमचलतुङ्गशिखरमारुरोह।

आरूढे च तस्मिन्, शनैः शनैस्तदनुसारिणीं निवर्त्य दृष्टिम्, अचलशिखरप्रस्तरप्रतिहतगतिप्रसरो विधृततुरंगमश्चन्द्रापीडः, तस्मिन् काले, समारूढश्रमस्वेदार्द्रशरीरमिन्द्रायुधमात्मानं चावलोक्य, क्षणमिव विचार्य, स्वयमेव विहस्याचिन्तयत्—"किमिति निरर्थकमयमात्मा मया शिशुनेवायासितः। किमनेन गृहीतेनागृहीतेन वा किंनरयुगलेन प्रयोजनम्। यदि गृहीतमिदम्, ततः किम्। अथ न गृहीतम्, ततोऽपि किम्। अहो मे मूर्खतायाः प्रकारः। अहो यत्किंचनकारितायामादरः। अहो निरर्थकव्यापारेष्वभिनिवेशः। अहो बालिशचरितेष्वासक्तिः। साधुफलं कर्म क्रियमाणं वृथा जातम्। अवश्यकर्तव्या क्रिया प्रस्तुता विफलीभूता। राजधर्मः प्रवर्तितो न निष्पन्नः। गुर्वर्थः प्रारब्धो न परिसमाप्तः। विजिगीषुव्यापारः प्रयत्तो न सिद्धः। 'कस्मादहमाविष्ट इवोत्सृष्टनिजपरिवारः, एतावतीं भूमिमायातः। कस्माच्च मया निष्प्रयोजनमिदमनुसृतमश्वमुखद्वयम्' इति विचार्यमाणे यत्सत्यमयमात्मैव मे पर इव हासमुपजनयति। न जाने—कियताध्वना विच्छिन्नमितो बलमनुयायि मे। महाजवो हीन्द्रायुधो निमेषमात्रेणातिदूरमतिक्रामति। न चागच्छता मया तुरगवेगवशात्किंनरमिथुने बद्धदृष्टिना, अस्मिन्नविरलतरुशतशाखागुल्मलतासंतानगहने निरन्तरपतितशुष्कपर्णावकीर्णतले महावने पन्था निरूपितः, येन प्रतिनिवृत्य यास्यामि। न चास्मिन्प्रदेशे प्रयत्नेनाऽपि परिभ्रमता मर्त्यधर्मा कश्चिदासाद्यते, यः सुवर्णपुरगामिनं पन्थानमुपदेक्ष्यति। श्रुतं हि मया बहुशः कथ्यमानम्—उत्तरेण सुवर्णपुरं सीमान्तलेखा पृथिव्याः सर्वजनपदानाम्, ततः परतो निर्मानुषमरण्यम्, तच्चातिक्रम्य कैलास-

गिरिरिति । अयं च कैलासः । तदिदानीं प्रतिनिवृत्यैकाकिना स्वयमुत्प्रेक्ष्योत्प्रेक्ष्य दक्षिणामाशां केवलमङ्गीकृत्य गन्तव्यम् । आत्मकृतानां हि दोषाणां नियतमनुभवितव्यं फलमात्मनैव" इत्यवधार्य, वामकरतलवलितरश्मिपाशः, तुरंगमं व्यावर्तयामास ।

व्यावर्तिततुरगश्च पुनश्चिन्तितवान्— 'अयमुद्भासितप्रभाभास्वरो भगवान्भानुरधुना दिवसश्रियो रशनामणिरिव नभोमध्यमलंकरोति । परिश्रान्तश्चायमिन्द्रायुधः । तदेनं तावदागृहीतकतिपयदूर्वाप्रवालकबलं कस्मिंश्चित्सरसि स्नातपीतोदकमपनीतश्रमं कृत्वा, स्वयं च सलिलं पीत्वा, कस्यचित्तरोरधश्छायायां मुहूर्तमात्रं विश्रम्य, ततो गमिष्यामि' इति चिन्तयित्वा सलिलमन्वेषयन्मुहुर्मुहुरितस्ततो दत्तदृष्टिः पर्यटन्, नलिनीजलावगाहोत्थितस्याचिरादपक्रान्तस्य च महतो वनगजयूथस्य चरणोत्थापितैः पङ्कपटलैरार्द्रीकृतं मार्गमद्राक्षीत् ।

उपजातजलाशयशङ्कश्च तं प्रतीपमनुसरन्, उद्ग्रीवदृश्यैरुपरि छत्रमण्डलाकारैः सरलसालसल्लकीप्रायैरविरलैरपि निःशाखतया विरलैरिवोपलक्ष्यमाणैः पादपैरुपेतेन गन्धपाषाणपरिमलामोदिना वेत्रलताप्रतानप्ररूढवेणुना कैलासतलेन कंचिदध्वानं गत्वा, तस्यैव कैलासशिखरिणः पूर्वोत्तरे दिग्भागेऽत्यायतं तरुखण्डं ददर्श । तं च कमलमधुपानमत्तानां श्रोत्रहारिभिः कलहंसानां कोलाहलैराहूयमान इव प्रविवेश ।

प्रविश्य च तस्य तरुखण्डस्य मध्यभागे मणिदर्पणमिव त्रैलोक्यलक्ष्म्याः, स्फटिकभूमिगृहमिव वसुंधरादेव्याः, निर्गमनमार्गमिव सागराणाम्, त्रिभुवनपुण्यराशिमिव सरोरूपेणावस्थितम्, वैदूर्यगिरि-

जालमिव सलिलाकारेण परिणतम्, आपूर्णपर्यन्तमप्यन्तःस्पष्टदृष्टसकलवृत्तान्ततया रिक्तमिवोपलक्ष्यमाणम्, प्रतिमानिभेनान्तःप्रविष्टं सकाननशैलनक्षत्रग्रहचक्रवालं त्रिभुवनमुद्भिन्नपङ्कजेनोदरेण नारायणमिव बिभ्राणम्, असकृत्पितामहपरिपूरितकमण्डलुपरिपूतजलम्, अनेकशो वालखिल्यकदम्बककृतसंध्योपासनम्, बहुशः सलिलावतीर्णसावित्रीभग्नदेवतार्चनकमलसहस्रम्, सहस्रशः सप्तर्षिमण्डलस्नानपवित्रीकृतम्, क्वचिद्वरुणहंसोपात्तकमलवनमकरन्दम्, क्वचित्त्र्यम्बकवृषभविषाणकोटिखण्डिततटशिलाखण्डम्, क्वचिद्यममहिषशृङ्गशिखरविक्षिप्तफेनपिण्डम्, क्वचिदैरावतदशनमुसलखण्डितकुमुदखण्डम्, अदृष्टान्तम्, अतिमनोहरम्, आह्लादनं दृष्टेः, अच्छोदं नाम सरो दृष्टवान्।

आलोकमात्रेणैवापगतश्रमो दृष्ट्वा मनस्येवमकरोत् — 'अहो निष्फलमपि मे तुरगमुखमिथुनानुसरणमेतदालोकयतः सरः सफलतामुपगतम्। अद्य परिसमाप्तमीक्षणयुगलस्य द्रष्टव्यदर्शनफलम्। आलोकितः खलु रमणीयानामन्तः। दृष्ट आह्लादनीयानामवधिः। वीक्षिता मनोहराणां सीमान्तलेखा। प्रत्यक्षीकृता प्रीतिजननानां परिसमाप्तिः। विलोकिता दर्शनीयानामवसानभूमिः। इदमुत्पाद्य सरःसलिलममृतरसमुत्पादयता वेधसा पुनरुक्ततामिव नीता स्वसृष्टिः। इदमपि खल्वमृतमिव सर्वेन्द्रियाह्लादनसमर्थम्। अतिविमलतया चक्षुषः प्रीतिमुपजनयति। शिशिरतया स्पर्शसुखमुपहरति। कमलसुगन्धितया घ्राणमाप्याययति। हंसमुखरतया श्रुतिमानन्दयति। स्वादुतया रसनामाह्लादयति। नियतं चास्यैव दर्शनतृष्णया न परित्यजति भगवान्कै-

लासनिवासव्यसनमुमापतिः। न खलु सांप्रतमाचरति जलशयनदोहदं देवो रथाङ्गपाणिः, यदिदममृतरससुरभिसलिलमपहाय, लवणरसपरुषपयस्युदन्वति स्वपिति। नूनं चेदं न प्रथममासीत्सरः, येन प्रलयवराहघोणाभिघातभीता भूतधात्री कलशयोनिपानपरिकलितसकलसलिलं सागरमवतीर्णा; अन्यथा यद्यत्रागाधानेकपातालगम्भीराम्भसि निमग्ना भवेन्महासरसि, किमेकेन महावराहसहस्रैरपि नासादिता भवेत्। नूनं चास्मादेव सलिललेशमादायादाय महाप्रलयेषु प्रलयपयोदाः प्लावयन्ति भुवनान्तराणि। मन्ये च, यत्सृष्टेरर्वाक्सलिलमयं ब्रह्माण्डरूपमादौ भुवनमभूत्, तदिदं पिण्डीभूय सरोव्यपदेशेनावस्थितम्' इति विचारयन्नेव, तस्य शिलाशकलकर्कशवालुकाप्रायम्, विद्याधरोद्धृतसनालकुमुदकलापार्चितानेकचारुसैकतलिङ्गम्, दक्षिणं तीरमासाद्य तुरगादवततार।

अवतीर्य च व्यपनीतपर्याणमिन्द्रायुधमकरोत्। क्षितितललुठितोत्थितं च गृहीतकतिपययवसग्रासं सरोऽवतार्य, पीतसलिलमिच्छया स्नातं चोत्थाप्य, अन्यतमस्य समीपवर्तिनस्तरोर्मूलशाखायामपगतखलीनं हस्तपाशशृङ्खलया कनकमय्या चरणौ बद्ध्वा पुनरपि सलिलमवततार। ततश्च प्रक्षालितकरयुगलश्चातक इव कृत्वा जलमयमाहारं सरःसलिलादुदगात्। प्रत्यग्रभग्नशिशिरैश्च समृणालकैर्जलकणिकाचितैः कमलिनीपलाशैर्लतामण्डपपरिक्षिप्ते शिलातले स्रस्तरमास्तीर्य, निधाय शिरसि पिण्डीकृतमुत्तरीयम्, निषसाद। मुहूर्तं विश्रान्तश्च, तस्य सरस उत्तरे तीरप्रदेशे समुच्चरन्तम्, उन्मुक्तकवलेन निश्चलश्रवणपुटेन तन्मुखीभूतेनोद्ग्रीवेणेन्द्रायुधेन प्रथममाकर्णितम्, श्रुतिसुभगं वीणात-

न्त्रीझंकारमिश्रममानुषं गीतशब्दमशृणोत्। श्रुत्वा च, 'कुतोऽत्र विगतमर्त्यसंपाते प्रदेशे गीतध्वनेः संभूतिः' इति समुपजातकौतुकः, कमलिनीपत्रस्रस्तरादुत्थाय, तामेव गीतसंपातसूचितां दिशं चक्षुः प्राहिणोत्। अतिदवीयस्तया तु तस्य प्रदेशस्य, प्रयत्नव्यापृतलोचनोऽपि विलोकयन्न किंचिद्ददर्श। तमेव केवलमनवरतं गीतशब्दं शुश्राव। कुतूहलवशाच्च गीतध्वनिप्रभवजिज्ञासया कृतगमनबुद्धिः, दत्तपर्याणमिन्द्रायुधमारुह्य, प्रियगीतैः प्रथमप्रस्थितैरप्रार्थितैरपि वनहरिणैरुपदिश्यमानवर्त्मा, पश्चिमया सरस्तीरवनलेखया, निमित्तीकृत्य तं गीतध्वनिमभिप्रतस्थे।

क्रमेण च समुखागतैरच्छनिर्झरजलकणजालजनितजडिमभिः पुण्यैः कैलासमारुतैरभिनन्द्यमानः, गत्वा च तं प्रदेशम्, शुकशतमुखनखशिखरशकलितफलस्फीतैः, जलधरजललुब्धमुग्धचातकध्वानमुखरिततमालखण्डैः, इभकलभकोल्लूनपल्लववेल्लितलवलीवलयैः, अविरलफलनिकरावनतनालिकेरवनैः, अन्तरान्तरा कैलासतरंगिणीतरंगितसिकतिलतलभूमिभागैः पादपैः परिवृतम्, चन्द्रप्रभनाम्नस्तस्य सरसः पश्चिमे तीरे कैलासपादस्य भूतलभागसंनिविष्टं भगवतः शूलपाणेः शून्यं सिद्धायतनमपश्यत्।

तच्च प्रविश्याद्राक्षीत्, चतुःस्तम्भस्फटिकमण्डपिकातलप्रतिष्ठितम्, अमलमुक्ताशिलाघटितलिङ्गम्, अशेषत्रिभुवनवन्दितचरणम्, चराचरगुरुम्, चतुर्मुखम्, भगवन्त त्र्यम्बकम्।

तस्य च दक्षिणां मूर्तिमाश्रित्याभिमुखीमासीनाम्, उपरचितब्रह्मासनाम्, अतिविस्तारिणा सर्वदिङ्मुखप्लावकेनातिदीर्घकालसंचि-

तेन तपोराशिनेव विसर्पता देहप्रभावितानेन सगिरिकाननं दन्तमयमिव तं प्रदेशं कुर्वतीम्, पञ्चमहाभूतमयमपहाय द्रव्यात्मकमङ्गनिष्पादनोपकरणकलापं धवलगुणेनेव केवलेनोत्पादिताम्, क्षीरोदधिदेवतामिव सहवासपरिचितहरचन्द्रलेखोत्कण्ठाकृष्टाम्, त्रयीमिव कलियुगध्वस्तधर्मशोकगृहीतवनवासाम्, श्वेतद्वीपलक्ष्मीमिवान्यद्वीपावलोकनकुतूहलागताम्, धर्महृदयादिव निर्गताम्, शङ्खादिवोत्कीर्णाम्, मुक्ताफलादिवाकृष्टाम्, इयत्तामिव धवलिम्नः, जटापाशग्रथितमुत्तमाङ्गेन मणिमयं नामाङ्कमीश्वरचरणद्वयमुद्वहन्तीम्, अयुग्मलोचनसकाशात्प्रसादलब्धेन चूडामणिचन्द्रमयूखजालेनेव मण्डलीकृतेन ब्रह्मसूत्रेण पवित्रीकृतकायाम्, उत्सङ्गगतां च स्वसुतामिव सूक्ष्मशङ्खखण्डिकाङ्गुलीयकपूरिताङ्गुलिना त्रिपुण्ड्रकावशेषभस्मपाण्डुरेण प्रकोष्ठबद्धशङ्खखण्डकेन दन्तमयीं दक्षिणकरेण वीणामास्फालयन्तीम्, सुमधुरया च गीत्या देवं विरूपाक्षमुपवीणयन्तीम्, प्रत्यक्षामिव गन्धर्वविद्याम्, निर्ममाम्, निरहंकाराम्, निर्मत्सराम्, अमानुषाकृतिम्, दिव्यत्वादपरिज्ञायमानवयःप्रमाणामप्यष्टादशवर्षदेशीयामिवोपलक्ष्यमाणाम्, प्रतिपन्नपाशुपतव्रतां कन्यकां ददर्श ।

ततोऽवतीर्य, तरुशाखायां बद्ध्वा तुरंगम्, उपसृत्य भगवते भक्त्या प्रणम्य त्रिलोचनाय, तामेव दिव्ययोपितमनिमेषपक्ष्मणा निश्चलनिबद्धलक्ष्येण चक्षुषा पुनर्निरूपयामास। उदपादि चास्य तस्या रूपसंपदा कान्त्या प्रशान्त्या चाविर्भूतविस्मयस्य मनसि — 'अहो जगति जन्तूनामसमर्थितोपनतान्यापतन्ति वृत्तान्तान्तराणि। तथा हि—मया मृगयायां यदृच्छया निरर्थकमनुबध्नता तुरंगमुखमिथुनम्,

अयमतिमनोहरो मानवानामगम्यो दिव्यजनसंचरणोचितः प्रदेशो वीक्षितः। अत्र च सलिलमन्वेषयता हृदयहारि सिद्धजनोपस्पृष्टजलं सरो दृष्टम्। तत्तीरलेखाविश्रान्तेन चामानुषं गीतमाकर्णितम्। तच्चानुसरता मानुषदुर्लभदर्शना दिव्यकन्यकेयमालोकिता। न हि मे संशीतिरस्या दिव्यतां प्रति। आकृतिरेवानुमापयत्यमानुषताम्। कुतश्च मर्त्यलोके संभूतिरेवंविधानां गन्धर्वध्वनिविशेषाणाम्। तद्यदि मे सहसा दर्शनपथान्नापयाति, नारोहति वा कैलासशिखरम्, नोत्पतति वा गगनतलम्, ततः 'का त्वम्, किमभिधाना वा, किमर्थं प्रथमे वयसि प्रतिपन्ना व्रतम्?' इति सर्वमेतदेनामुपसृत्य पृच्छामि। अतिमहानयमवकाश आश्चर्याणाम्' इत्यवधार्य तस्यामेव स्फटिकमण्डपिकायामन्यतमं स्तम्भमाश्रित्य समुपविष्टः, गीतसमाप्त्यवसरं प्रतीक्षमाणस्तस्थौ।

अथ गीतावसाने सा कन्यका समुत्थाय प्रदक्षिणीकृत्य कृतहरप्रणामा, परिवृत्य चन्द्रापीडमाबभाषे—'स्वागतमतिथये। कथमिमां भूमिमनुप्राप्तो महाभागः। तदुत्तिष्ठ। आगम्यताम्, अनुभूयतामतिथिसत्कारः' इति। एवमुक्तस्तु तया संभाषणमात्रेणैवानुगृहीतमात्मानं मन्यमानः, उत्थाय भक्त्या कृतप्रणामः, 'भगवति, यथाज्ञापयसि' इत्यभिधाय दर्शितविनयः शिष्य इव तां व्रजन्तीमनुवव्राज। व्रजंश्च समर्थयामास—'हन्त, तावन्नेयं मां दृष्ट्वा तिरोभूता। कृतं हि मे कुतूहलेन प्रश्नाशया हृदि पदम्। यथा चेयमस्यास्तपस्विजनदुर्लभदिव्यरूपाया अपि दाक्षिण्यातिशया प्रतिपत्तिरभिजाता विभाव्यते, तथा संभावयामि नियतमियमखिलमात्मोदन्तमभ्यर्थ्य-

माना मया कथयिष्यति' इत्येवं च कृतमतिः पदशतमात्रमिव गत्वा, अन्तःस्थापितमणिकमण्डलुमण्डलाम्, एकान्तावलम्बितयोगपट्टिकाम्, त्रिशाखिकाशिखरनिबद्धनालिकेरीफलवल्कलमयधौतोपानद्युगोपेताम्, शङ्खमयेन भिक्षाकपालेनाधिष्ठिताम्, संनिहितभस्मालाबुकां गुहामद्राक्षीत्। तस्याश्च द्वारि शिलातले समुपविष्टः, वल्कलशयनशिरोभागविन्यस्तवीणां ततः पर्णपुटेन निर्झरादागृहीतमर्घसलिलमादाय तां कन्यकां समुपस्थिताम्, 'अलमतियन्त्रणया। कृतमतिप्रसादेन। भगवति, प्रसीद। विमुच्यतामयमत्यादरः। त्वदीयमालोकनमपि सर्वपापप्रशमनमघमर्षणमिव पवित्रीकरणायालम्। आस्यताम्' इत्यब्रवीत्। अनुबध्यमानश्च तया, तां सर्वामतिथिसपर्यामतिदूरावनतेन शिरसा सप्रश्रयं प्रतिजग्राह।

कृतातिथ्यया च तया द्वितीयशिलातलोपविष्टया क्षणमिव तूष्णीं स्थित्वा क्रमेण परिपृष्टः, दिग्विजयादारभ्य किंनरमिथुनानुसरणप्रसङ्गेनागमनमात्मनः सर्वमाचचक्षे। विदितसकलवृत्तान्ता चोत्थाय सा कन्यका, भिक्षाकपालमादाय तेषामायतनतरूणां तलेषु विचचार। अचिरेण तस्याः स्वयंपतितैः फलैरपूर्यत भिक्षाभाजनम्। आगत्य च तेषां फलानामुपयोगाय नियुक्तवती चन्द्रापीडम्। आसीच्च तस्य चेतसि — 'नास्ति खल्वसाध्यं नाम तपसाम्। किमतः परमाश्चर्यम्, यदत्र व्यपगतचेतना अपि सचेतना इवास्यै भगवत्यै समतिसृजन्तः फलान्यात्मानुग्रहमुपपादयन्ति वनस्पतयः। चित्रमिदमालोकितमस्माभिरदृष्टपूर्वम्' इत्यधिकतरोपजातविस्मयश्चोत्थाय, तमेव प्रदेशमिन्द्रायुधमानीय, व्यपनीतपर्याणं नातिदूरे संयम्य, निर्झरजलनि-

र्वर्तितस्नानविधिः, तान्यमृतरसस्वादून्युपभुज्य फलानि, पीत्वा च तुषारशिशिरं प्रस्रवणजलम्, उपस्पृश्यैकान्ते तावदवतस्थे, यावत्तयापि कन्यकया कृतो जलफलमूलमयेष्वाहारेषु प्रणयः।

अथ परिसमापिताहारां निर्वर्तितसंध्योचिताचारा शिलातले विस्रब्धमुपविष्टां निभृतमुपसृत्य, नातिदूरे समुपविश्य, मुहूर्तमिव स्थित्वा, चन्द्रापीडः सविनयमवादीत्—'भगवति, त्वत्प्रसादप्राप्तिप्रोत्साहितेन कुतूहलेनाकुलीक्रियमाणो मानुषतासुलभो लघिमा बलादनिच्छन्तमपि मां प्रश्नकर्मणि नियोजयति। जनयति हि प्रभुप्रसादलवोऽपि प्रागल्भ्यमधीरप्रकृतेः। स्वल्पाप्येकदेशावस्थाने कालकला परिचयमुत्पादयति। अणुरप्युपचारपरिग्रहः प्रणयमारोपयति। तद्यदि नातिखेदकरमिव, ततः कथनेनात्मानमनुग्राह्यमिच्छामि। अतिमहत्खलु भवद्दर्शनात्प्रभृति मे कौतुकमस्मिन्विषये। कतरन्मरुतामृषीणां गन्धर्वाणां गुह्यकानामप्सरसां वा कुलमनुगृहीतं भगवत्या जन्मना। किमर्थं वास्मिन्कुसुमसुकुमारे नवे वयसि व्रतग्रहणम्। क्वेदं वयः। क्वेयमाकृतिः। क्व चायं लावण्यातिशयः। क्वेयमिन्द्रियाणामुपशान्तिः। तदद्भुतमिव मे प्रतिभाति। किंनिमित्तं वानेकसिद्धसाध्यसंबाधानि सुरलोकसुलभान्यपहाय दिव्याश्रमपदानि, एकाकिनी वनमिदममानुषमधिवससि। कश्चायं प्रकारः, यत्तैरेव पञ्चभिर्महाभूतैरारब्धमीदृशीं धवलतां धत्ते शरीरम्। नेदमस्माभिरन्यत्र दृष्टश्रुतपूर्वम्। अपनयतु नः कौतुकम्। आवेदयतु भवती सर्वम्' इत्येवमभिहिता सा, किमप्यन्तर्ध्यायन्ती, तूष्णीं मुहूर्तमिव स्थित्वा, निःश्वस्य, स्थूलस्थूलैरनुबद्धबिन्दुभिरश्रुभिरामीलितलोचना निःशब्दं रोदितुमारेभे।

तां च प्ररुदितां दृष्ट्वा चन्द्रापीडस्तत्क्षणमचिन्तयत् — 'अहो दुर्निवारता व्यसनोपनिपातानाम्, यदीदृशीमप्याकृतिमनभिभवनीयामात्मीयां कुर्वन्ति। सर्वथा न हि कंचन न स्पृशन्ति शरीरधर्माणमुपतापाः। बलवती हि द्वंद्वानां प्रवृत्तिः। इदमपरमधिकतरमुपजनितमतिमहन्मनसि मे कौतुकमस्या बाष्पसलिलपातेन। न ह्यल्पीयसा शोककारणेन क्षेत्रीक्रियन्ते एवंविधा मूर्तयः। न हि क्षुद्रनिर्घातपाताभिहता चलति वसुधा' इति संवर्धितकुतूहलश्च शोकस्मरणहेतुतामुपगतमपराधिनमिवात्मानमवगच्छन्, उत्थाय प्रस्रवणादञ्जलिना मुखप्रक्षालनोदकमुपनिन्ये। सा तु तदनुरोधादविच्छिन्नबाष्पजलधारासंतानापि किंचित्कषायितोदरे प्रक्षाल्य लोचने, वल्कलोपान्तेन वदनमपमृज्य, दीर्घमुष्णं च निःश्वस्य, शनैः प्रत्यवादीत्–'राजपुत्र, किमनेनातिनिर्घृणहृदयाया मम मन्दभाग्यायाः पापाया जन्मन. प्रभृति वैराग्यवृत्तान्तेनाश्रवणीयेन श्रुतेन। तथापि यदि महत्कुतूहलम्, तत्कथयामि। श्रूयताम्—

एतत्प्रायेण कल्याणाभिनिवेशिनः श्रुतिविषयतामापतितमेव— यथा विबुधसद्मन्यप्सरसो नाम कन्यकाः सन्ति। तासां चतुर्दश कुलानि। एकं भगवतः कमलयोनेर्मनसः समुत्पन्नम्। अन्यद्वेदेभ्यः संभूतम्। अन्यदग्नेरुद्भूतम्। अन्यत्पवनात्प्रसूतम्। अन्यदमृतान्मथ्यमानादुत्थितम्। अन्यज्जलाज्जातम्। अन्यदर्ककिरणेभ्यो निर्गतम्। अन्यत्सोमरश्मिभ्यो निष्पतितम्। अन्यद्भूमेरुद्भूतम्। अन्यत्सौदामनीभ्यः प्रवृत्तम्। अन्यन्मृत्युना निर्मितम्। अपरं मकरकेतुना समुत्पादितम्। अन्यत्तु, दक्षस्य प्रजापतेरतिप्रभूतानां कन्यकानां मध्ये द्वे सुते मुनि-

ररिष्टा च बभूवतुः, ताभ्यां गन्धर्वैः सह कुलद्वयं जातम्। एवमेतान्येकत्र चतुर्दश कुलानि। गन्धर्वाणां तु दक्षात्मजाद्वितयसंभवं तदेव कुलद्वयं जातम्। तत्र मुनेस्तनयश्चित्रसेनादीनां पञ्चदशानां भ्रातॄणामधिको गुणैः षोडशश्चित्ररथो नाम। स किल सर्वेषां गन्धर्वाणामाधिपत्यं शैशव एवासवान्। इतश्च नातिदूरे तस्यास्माद्भारतवर्षादुत्तरेणानन्तरे किंपुरुषनाम्नि वर्षे वर्षपर्वतो हेमकूटो नाम निवासः। तत्र च तद्भुजयुगपरिपालितान्यनेकानि गन्धर्वशतसहस्राणि प्रतिवसन्ति। तेनैव चेदं चैत्ररथं नामातिमनोहरं काननं निर्मितम्। इदं चाच्छोदाभिधानमतिमहत्सरः खानितम्। अयं च भवानीपतिरुपरचितो भगवान्। अरिष्टायास्तु पुत्रस्तुम्बुरुप्रभृतीनां सोदर्याणां षण्णां ज्येष्ठो हंसो नाम जगद्विदितो गन्धर्वः, तस्मिन्द्वितीये गन्धर्वकुले गन्धर्वराजेन चित्ररथेनैवाभिषिक्तो बाल एव राज्यपदमासादितवान्। अपरिमितगन्धर्वबलपरिवारस्य तस्यापि स एव गिरिरधिवासः। यत्तु तत्सोममयूखसंभूतानामप्सरसां कुलम्, तस्मात्किरणजालानुसारगलितेन सकलेनेव रजनिकरकलाकलापलावण्येन निर्मिता त्रिभुवननयनाभिरामा भगवती द्वितीयेव गौरी गौरीतिनाम्ना हिमकरकिरणावदातवर्णा कन्यका प्रसूता। तां च द्वितीयगन्धर्वकुलाधिपतिर्हंसः प्रणयिनीमकरोत्। सा तु हंसेन संयोजिता सदृशसमागमोपजनितामतिमहतीं मुदमुपगतवती। निखिलान्तःपुरस्वामिनी च तस्याभवत्।

तयोश्च तादृशयोर्महात्मनोरहमीदृशी विगतलक्षणा शोकाय केवलमनेकदुःखसहस्रभाजनमेकैवात्मजा समुत्पन्ना। तातस्त्वनपत्यतया सुतजन्मातिरिक्तेन महोत्सवेन मज्जन्माभिनन्दितवान्। अवाप्ते

च दशमेऽहनि कृतयथोचितसमाचारो महाश्वेतेति यथार्थमेव नाम कृतवान् । साहं पितृभवने बालतया कलमधुरप्रलापिनी वीणेव गन्धर्वाणामङ्कादङ्कं संचरन्ती, अविदितस्नेहशोकायासमनोहरं शैशवमतिनीतवती । क्रमेण च कृतं मे वपुषि वसन्त इव मधुमासेन, मधुमास इव नवपल्लवेन, नवपल्लव इव कुसुमेन, कुसुम इव मधुकरेण, मधुकर इव मदेन, नवयौवनेन पदम् ।

अथ विजृम्भमाणनवनलिनवनेषु सकलजीवलोकहृदयानन्ददायकेषु मधुमासदिवसेषु, एकदाहमम्बया सह मधुमासविस्तारितशोभं प्रोत्फुल्लनवनलिनकुमुदकुवलयकह्लारमिदमच्छोदं सरः स्नातुमभ्यागमम् । अत्र च बहुलकुसुमरजःपटलमग्नकलहंसपदलेखमतिरमणीयमिदं तीरतरुतलमिति स्निग्धमनोहरतरोद्देशदर्शनलोभाक्षिप्तहृदया सह सखीजनेन व्यचरम् ।

एकस्मिंश्च प्रदेशे झटिति वनानिलेनोपनीतं निर्भरविकसितेऽपि काननेऽभिभूतान्यकुसुमपरिमलम्, विसर्पन्तम्, अहमहमिकया मधुकरकुलैरनुबध्यमानम्, अनाघ्रातपूर्वममानुपलोकोचितं कुसुमगन्धमभ्यजिघ्रम् । 'कुतोऽयम्' इत्युपारूढकुतूहला चाहं मुकुलितलोचना तेन कुसुमगन्धेन मधुकरीवाकृष्यमाणा कतिचित्पदानि गत्वा, हरहुताशनेन्धनीकृतमदनशोकविधुरं वसन्तमिव तपस्यन्तम्, अतितेजस्वितया प्रचलतडिल्लतापञ्जरमध्यगतमिव विभाव्यमानम्, एकेन सनालबकुलफलाकारं कमण्डलुम्, अपरेण च स्फटिकाक्षमालिकां करेण कलयन्तम्, आत्मतेजसा विजित्य सवितारमागृहीतेन परिवेषमण्डलेनेव मौञ्जमेखलागुणेन परिक्षिप्तजघनभागम्, अलंकारमिव ब्रह्मचर्यस्य,

यौवनमिव धर्मस्य, विलासमिव सरस्वत्याः, स्वयंवरपतिमिव सर्वविद्यानाम्, संकेतस्थानमिव सर्वश्रुतानाम्, आत्मानुरूपेण सवयसा परेण देवतार्चनकुसुमान्युच्चिन्वता तापसकुमारेणानुगतम्, अतिमनोहरं स्नानार्थमागतं मुनिकुमारकमपश्यम्।

तेन च कर्णावतंसीकृतां कृत्तिकातारास्तबकानुकारिणीमदृष्टपूर्वां कुसुममञ्जरीमद्राक्षम्। अस्याः परिभूतान्यकुसुमामोदो नन्वयं परिमल इति मनसा निश्चित्य तं तपोधनयुवानमीक्षमाणाहमचिन्तयम्—'अहो रूपातिशयनिष्पादनोपकरणकोशस्याक्षीणता विधातुः। यत्त्रिभुवनाद्भुतरूपसंभारं भगवन्तं कुसुमायुधमुत्पाद्य, तदाकारातिरिक्तरूपराशिरयमपरो मुनिमायामयो मकरकेतुरुत्पादितः। मन्ये च, सकलजगन्नयनानन्दकरं शशिबिम्बं विरचयता, लक्ष्मीलीलावासभवनानि कमलानि सृजता, प्रजापतिना प्रथममेतदाननाकारकरणकौशलाभ्यास एव कृतः। अन्यथा किमिव हि सदृशवस्तुविरचनायाः कारणम्। अलीकं चेदम्, यथा किल-सकलाः कलाः कलावतो बहुलपक्षे क्षीयमाणस्य सुषुम्नानाम्ना रश्मिना रविरापिबतीति। मन्ये—ताः खल्वस्य गभस्तयः समस्ता वपुरिदमाविशन्तीति। कुतोऽन्यथा रूपापहारिणि क्लेशबहुले तपसि वर्तमानस्येदं लावण्यम्' इति विचिन्तयन्तीमेव मामविचारितगुणदोषविशेषो रूपैकपक्षपाती नवयौवनसुलभः कुसुमायुधः परवशामकरोत्।

उच्छ्वसितैः सह विस्मृतनिमेषेण किंचिदामुकुलितपक्ष्मणा दक्षिणेन चक्षुषा सस्पृहमापिबन्तीव, किमपि याचमानेव, हाहा किमिदमसांप्रतमतिह्रेपणमकुलकुमारीजनोचितमिदं मया प्रस्तुतमिति जाना-

नाप्यप्रभवन्ती करणानाम्, स्तम्भितेव, लिखितेव, केनापि विधृतेव, निस्पन्दसकलावयवा तमतिचिरं व्यलोकयम्। अनन्तरं च मेऽन्तर्मर्दनावकाशमिव दातुमाहितसंताना निरीयुः श्वासमरुतः। स्वेदसलिललवलेखाक्षालितेवागलल्लज्जा।

आसीच्च मम मनसि—'शान्तात्मनि दूरीकृतविषयव्यतिकरेऽस्मिञ्जने मां निक्षिपता किमिदमनार्येणासदृशमारब्धं मनसिजेन। एवं च नामातिमूढं हृदयमङ्गनाजनस्य। यदयमनुरागविषययोग्यतामपि विचारयितुं नालम्। क्वेदमतिभास्वरं धाम तेजसां तपसां च। क्व च प्राकृतजनाभिनन्दितानि मन्मथपरिस्पन्दितानि। नियतमयं मामेवं मकरलाञ्छनेन विडम्ब्यमानामुपहसति मनसा। चित्रं चेदम्—यदहमेवमवगच्छन्त्यपि न शक्नोम्यात्मनो विकारमुपसंहर्तुम्। कथमनेन क्षणेनाकारमात्रालोकनाकुलीभूतमेवमस्वतन्त्रतामुपैत्यन्तःकरणम्। यावदेव सचेतनास्मि, यावदेव च न परिस्फुटमनेन विभाव्यते मे मदनदुश्चेष्टितलाघवमेतत्, तावदेवास्मात्प्रदेशादपसर्पणं श्रेयः। कदाचिदनभिमतस्मरविकारदर्शनकुपितोऽयं शापाभिज्ञां करोति माम्। अदूरकोपा हि मुनिजनप्रकृतिः' इत्यवधार्य, अपसर्पणाभिलाषिण्यहमभवम्। अशेषजनपूजनीया चेयं जातिरिति कृत्वा तस्मै प्रणाममकरवम्।

अथ कृतप्रणामायां मयि, दुर्लङ्घ्यशासनतया भगवतो मनोभुवः, अविनयबहुलतया चाभिनवयौवनस्य, चपलतया च मनोवृत्तेः, तथाभवितव्यतया च तस्य तस्य वस्तुनः, किं बहुना, मम मन्दभाग्यदौरात्म्यात्, अस्य चेदृशस्य क्लेशस्य विहितत्वात्, तमपि मद्विकारदर्शनापहृतधैर्यं प्रदीपमिव पवनस्तरलतामनयदनङ्गः। तया तु तस्याति-

प्रकटया विकृत्या द्विगुणीकृतमदनावशा, तत्क्षणमहमवर्णनयोग्यां काामप्यवस्थामन्वभवम्।

प्राप्तप्रसरा चोपसृत्य तं द्वितीयमस्य सहचरं मुनिबालकं प्रणामपूर्वकमपृच्छम्—'भगवन्, किमभिधानः? कस्य चायं तपोधनयुवा? किंनाम्नस्तरोरियमनेनावतंसीकृता कुसुममञ्जरी? जनयति हि मे मनसि महत्कौतुकमस्याः समुत्सर्पन्नसाधारणसौरभोऽयमनाघ्रातपूर्वो गन्धः' इति। स तु मार्मीषद्विहस्याब्रवीत्—"बाले, किमनेन पृष्टेन प्रयोजनम्। अथ कौतुकमावेदयामि। श्रूयताम्—

अस्ति खलु सकलत्रिभुवनप्रख्यातकीर्तिः, महामुनिर्दिव्यलोकनिवासी श्वेतकेतुर्नाम। तस्य च कदाचिद्देवतार्चनकमलान्युद्धर्तुं मन्दाकिनीमवतरतस्त्रिभुवनसुन्दरं रूपमास्वादयन्त्या मन्मथविकृताया विकचपुण्डरीकोपविष्टाया देव्या लक्ष्म्याः सद्य एव कुमार एष समुदपादि। ततस्तमुत्सङ्गेनादाय सा 'भगवन्, गृहाण, तवायमात्मजः' इत्युक्त्वा तस्मै श्वेतकेतवे ददौ। असावपि बालजनोचिताः सर्वाः क्रियाः कृत्वा, तस्य पुण्डरीकसंभवतया तदेव पुण्डरीक इति नाम चक्रे। प्रतिपादितव्रतं च तमागृहीतसकलविद्याकलापमकार्षीत्। सोऽयम्।

इयं च, सुरासुरैर्मथ्यमानात्क्षीरसागरादुद्गतो यः पारिजातनामा पादपः, तस्य मञ्जरी। यथा चैषा व्रतविरुद्धमस्य श्रवणसंसर्गमासादितवती, तदपि कथयामि। अद्य चतुर्दशीति भगवन्तमम्बिकापतिं कैलासगतमुपासितुममरलोकान्मया सह नन्दनवनसमीपेनायमनुसरन्, निर्गत्य साक्षान्नन्दनवनदेवतया पारिजातकुसुममञ्जरीमिमामादाय, प्रणम्याभिहितः—'भगवन्, इयमवतंसविलासदुर्ललिता समारो-

प्यतां श्रवणशिखरम् । व्रजतु सफलतां जन्म पारिजातस्य' इत्येवमभिदधानां तामनुयान्तीमालोक्य, 'को दोषः सखे, 'क्रियतामस्याः प्रणयपरिग्रहः' इत्यभिधाय बलादियमनिच्छतोऽप्यस्य मया कर्णपूरीकृता । तदेतत्कार्त्स्न्येन, योऽयम्, या चेयम्, यथा चास्य श्रवणशिखरं समारूढा, तत्सर्वमावेदितम्'' इत्युक्तवति तस्मिन्, स तपोधनयुवा किंचिदुपदर्शितस्मितो मामवादीत्—अयि कुतूहलिनि, किमनेन प्रश्नायासेन । यदि रुचितसुरभिपरिमला, गृह्यतामियम्' इत्युक्त्वा समुपसृत्य, आत्मीयाच्छ्रवणादपनीय मदीये श्रवणपुटे तामकरोत् । स च मत्कपोलस्पर्शतरलीकृताङ्गुलिजालकात्करतलादक्षमालां लज्जया सह गलितामपि नाज्ञासीत् । अथाहं तामसंप्राप्तामेव भूतलमक्षमालां गृहीत्वा, सलीलं कण्ठाभरणतामनयम् ।

इत्थंभूते च व्यतिकरे छत्रग्राहिणी मामवोचत् — 'भर्तृदारिके, स्नाता देवी । प्रत्यासीदति गृहगमनकालः । तत्क्रियतां मज्जनविधिः' इति । अहं तु तेन तस्या वचनेन नवगृहा करिणीव प्रथमाङ्कुशपातेनानिच्छया कथंकथमपि समाकृष्यमाणा, तन्मुखादतिकृच्छ्रेण दृष्टिमाकृष्य, स्नातुमुदचलम् ।

उच्चलितायां च मयि द्वितीयो मुनिदारकस्तथाविधं तस्य धैर्यस्खलितमालोक्य किंचित्प्रकटितप्रणयकोप इवावादीत्—'सखे पुण्डरीक, नैतदनुरूपं भवतः । क्षुद्रजनक्षुण्ण एष मार्गः । धैर्यधना हि साधवः । किं यः कश्चित्प्राकृत इव विक्लबीभवन्तमात्मानं न रुणत्सि । कुतस्तवापूर्वोऽयमद्येन्द्रियोपप्लवः, येनास्येवंकृतः । क्व ते तद्धैर्यम् । क्वासाविन्द्रियजयः । क्व सा प्रशान्तिः । क्व तत्कुलक्रमागतं ब्रह्म-

चर्यम्। क्व ते गुरूपदेशाः। क्व तानि श्रुतानि। क्व ता वैराग्यबुद्धयः। क्वासौ तपस्यभिनिवेशः। क्व तद्यौवनानुशासनम्। सर्वथा निष्फला प्रज्ञा। निर्गुणो धर्मशास्त्राभ्यासः। निरर्थकः संस्कारः। निरुपकारको गुरूपदेशविवेकः। निष्प्रयोजना प्रबुद्धता। निष्कारणं ज्ञानम्। यदत्र भवादृशा अपि रागाभिषङ्गैः कलुषीक्रियन्ते, प्रमादैश्चाभिभूयन्ते। कथं करतलाद्गलितामपहृतामक्षमालामपि न लक्षयसि। अहो विगतचेतनत्वम्। अपहृता नामेयम्। इदमपि तावदपह्रियमाणमनयानार्यया निवार्यतां हृदयम्'।

इत्येवमभिधीयमानश्च तेन किंचिदुपजातलज्ज इव प्रत्यवादीत्—'सखे कपिञ्जल, किं मामन्यथा संभावयसि। नाहमेवमस्या दुर्विनीतकन्यकाया मर्षयाम्यक्षमालाग्रहणापराधमिमम्' इत्यभिधाय, अलीककोपकान्तेन मुखेन्दुना मामवदत्—'चपले, प्रदेशादस्मादिमामक्षमालामदत्त्वा पदात्पदमपि न गन्तव्यम्' इति। तच्च श्रुत्वा, अहमात्मकण्ठादुन्मुच्यैकावलीम्, 'भगवन्, गृह्यतामक्षमाला' इति मन्मुखासक्तदृष्टेः शून्यहृदयस्यास्य प्रसारिते पाणौ निधाय, स्नातुमवातरम्। उत्थाय च कथमपि प्रयत्नेन निम्नगेव प्रतीपं नीयमाना सखीजनेन बलादम्बया सह तमेव चिन्तयन्ती स्वभवनमयासिषम्।

गत्वा च प्रविश्य कन्यकान्तःपुरम्, ततः प्रभृति तद्विरहविधुरा, किमागतास्मि, किं तत्रैव स्थितास्मि, किमेकाकिन्यस्मि, किं परिवृतास्मि, किं तूष्णीमस्मि, किं प्रस्तुतालापास्मि, किं जागर्मि, किं सुप्तास्मि, कानि रम्याणि, कान्यरम्याणीति सर्वमेव नावागच्छम्। अविज्ञातमदनवृत्तान्ता च, क्व गच्छामि, किं करोमि, किं शृणोमि.

किं पश्यामि, किमालपामि, कस्य कथयामि, कोऽस्य प्रतीकार इति सर्वं च नाज्ञासिषम् । केवलमारुह्य कुमारीपुरप्रासादम्, विसर्ज्य च सखीजनम्, द्वारि निवारिताशेषपरिजनप्रवेशा, सर्वव्यापारानुत्सृज्य, एकाकिनी मणिजालगवाक्षनिक्षिप्तमुखी, तामेव दिशं तत्सनाथतया प्रसाधितामिव पूर्णचन्द्रोदयालंकृतामिव दर्शनसुभगामीक्षमाणा, तस्माद्दिगन्तरादागच्छन्तमनिलमपि वनकुसुमपरिमलमपि शकुनिध्वनिमपि तद्वार्तां प्रष्टुमीहमाना, तद्वल्लभतया तपःक्लेशायापि स्पृहयन्ती, तत्परिग्रहान्मुनिवेषस्याग्राम्यतां तच्छ्रवणसंपर्कात्पारिजातकुसुमस्य मनोहरतां तन्निवासात्सुरलोकस्य रम्यतामध्यारोपयन्ती, दूरस्थस्यापि कमलिनीव सवितुस्तस्यैवाभिमुखी, तथैव तामक्षावलीं कण्ठेनोद्वहन्ती, तथैव च तया कर्णलग्नया पारिजातमञ्जर्या कण्टकितैककपोलफलका, निस्पन्दमतिष्ठम् ।

अथ ताम्बूलकरङ्कवाहिनी मदीया तरलिका नाम मयैव सह गता स्नातुमासीत् । सा च पश्चाच्चिरादिवागत्य, तथावस्थितां शनैर्मामवादीत् — 'भर्तृदारिके, यौ तौ तापसकुमारकौ दिव्याकारावस्माभिरच्छोदसरस्तीरे दृष्टौ, तयोरेकः, येन भर्तृदुहितुरियमवतंसीकृता सुरतरुकुसुममञ्जरी, स तस्माद्द्वितीयादात्मनो रक्षन् दर्शनम्, अतिनिभृतपदः, कुसुमितलतासंतानगहनान्तरेणोपसृत्य मामागच्छन्तीं पृष्ठतः, भर्तृदारिकामुद्दिश्याप्राक्षीत्—'बालिके, केयं कन्यका, कस्य वापत्यम्, किमभिधाना, क्व गच्छति' इति । मयोक्तम्—'एषा खलु गन्धर्वाधिपतेर्हंसस्य दुहिता महाश्वेता नाम गन्धर्वाधिवासं हेमकूटाचलमभिप्रस्थिता' इति कथिते च मया, किमपि चिन्तयन्मुहूर्त-

मिव तूष्णीं स्थित्वा, विगतनिमेषेण चक्षुषा चिरमभिवीक्षमाणो माम्, सानुनयमर्थितामिव दर्शयन्पुनराह — 'बालिके, कल्याणिनी तवाविसंवादिन्यचपला बालभावेऽप्याकृतिरियम्। तत्करोपि मे वचनमेकमभ्यर्थ्यमाना' इति। ततो मया सविनयमुपरचिताञ्जलिपुटया दर्शितादरमभिहित: — 'भगवन्, कस्मादेवमभिधत्से। काहम्। महात्मान: सकलत्रिभुवनपूजनीयास्त्वादृशा: पुण्यैर्विना निखिलकल्मषापहारिणीमस्मद्विधेषु दृष्टिमपि न पातयन्ति, किं पुनराज्ञाम्। तद्विस्रब्धमादिश्यतां कर्तव्यम्। अनुगृह्यतामयं जन:' इत्येवमुक्तश्च मया सस्नेहया, सखीमिवोपकारिणीमिव प्राणप्रदामिव दृष्ट्या मामभिनन्द्य, निकटवर्तिनस्तमालपादपात्पल्लवमादाय, निष्पीड्य शिलातले, तेन रसेनोत्तरीयवल्कलैकदेशाद्विपाट्य पट्टिकां स्वहस्तकमलकनिष्ठिकानखशिखरेणाभिलिख्य, 'इयं पत्रिका त्वया तस्यै कन्यकायै प्रच्छन्नमेकाकिन्यै देया' इत्यभिधायार्पितवान्' इत्युक्त्वा च सा, ताम्बूलभाजनादाकृष्य तामदर्शयत्। अहं तु तस्या: करतलादादाय तां वल्कलपट्टिकां तस्यामिमामभिलिखितामार्यामपश्यम्—

दूरं मुक्तालतया बिससितया विप्रलोभ्यमानो मे।
हंस इव दर्शिताशो मानसजन्मा त्वया नीत: ॥

अनया च मे दृष्ट्या दोषविकारोपचय: सुतरामक्रियत मनस:, येनाकुलीक्रियमाणा सरिदिव पूरेण विह्वलतामभ्यागमम्। तां च द्वितीयदर्शनेन समासादितत्रैलोक्यराज्याभिषेकामिव मन्यमाना, कपोलयोरलकलताभङ्गेषु च सांपग्रहं स्पृशन्ती, विपरीतमिव परिजनस्वामिसंबन्धमुपदर्शयन्ती, 'तरलिके, कथय कथं स त्वया दृष्ट:,

किं किमभिहितासि तेन, कियन्तं कालमवस्थितासि तत्र, कियदनुसरन्नस्मानसावागतः' इति पुनः पर्यपृच्छम्। अनयैव च कथया तया सह तमिन्नेव प्रासादे तथैव प्रतिषिद्धाशेषपरिजनप्रवेशा दिवसमत्यवाहयम् ।

अथ लोहितायति गगनतलोपान्तावलम्बिनि रविबिम्बे, मुकुलितरक्तपङ्कजपुटप्रविष्टमधुकरावलीषु रविविरहमूर्च्छान्धकारितहृदयास्विव प्रारब्धनिमीलनासु पद्मिनीषु, सा छत्रग्राहिणी समागत्याकथयत्—'भर्तृदारिके, तयोर्मुनिकुमारयोरन्यतरो द्वारि तिष्ठति, कथयति च—अक्षमालामुपयाचितुमागतोऽस्मीति'।

अहं तु मुनिकुमारनामग्रहणादेव स्थानस्थितापि गतेव द्वारदेशम्, समुपजाततदागमनाशङ्का समाहूयान्यतमं कञ्चुकिनम् 'गच्छ, प्रवेशयताम्' इत्यादिश्य प्राहिणवम् ।

अथ मुहूर्तादिव तं तस्य मकरकेतनस्येव वसन्तसमयम्, वसन्तसमयस्येव दक्षिणानिलम्, अनुरूपं सखायमृषिकुमारकं कपिञ्जलनामानमागच्छन्तमपश्यम्। अन्तिकमुपगतस्य चास्य पर्याकुलमिव शून्यमिवाकारमलक्षयम्। उत्थाय च कृतप्रणामा सादरं स्वयमासनमुपाहरम्। उपविष्टस्य च बलादनिच्छतोऽपि प्रक्षाल्य चरणौ उपमृज्योत्तरीयांशुकपल्लवेन, अव्यवधानायां भूमावेव तस्यान्तिके समुपाविशम्। अथ मुहूर्तमिव स्थित्वा किमपि विवक्षुरिव, स तस्यां मत्समीपोपविष्टायां तरलिकायां चक्षुरपातयत्। अहं तु विदिताभिप्राया दृष्ट्वैव 'भगवन्, अव्यतिरिक्तेयमस्मच्छरीरात्। अशङ्कितमभिधीयताम्' इत्यवोचम् ।

एवमुक्तश्च मया कपिञ्जलः प्रत्यवादीत् — "राजपुत्रि, किं ब्रवीमि । वागेव मे नाभिधेयविषयमवतरति त्रपया । क्व कन्दमूलफलाशी शान्तो वननिरतो मुनिजनः । क्वायमनुपशान्तजनोचितो विषयोपभोगाभिलाषकलुषो रागप्रायः प्रपञ्चः । सर्वमेवानुपपन्नम् । आलोकय, किमारब्धं दैवेन । अयत्नेनैव खलूपहासास्पदतामीश्वरो नयति जनम् । न जाने किमिदं वल्कलानां सदृशम् । उताहो जटानां समुचितम् । किं तपसोऽनुरूपम् । आहोस्विद्धर्मोपदेशाङ्गमिदम् । अपूर्वेयं विडम्बना । केवलमवश्यकथनीयमिदम् । अपर उपायो न दृश्यते । अन्या प्रतिक्रिया नोपलभ्यते । अन्यच्छरणं नालोक्यते । अन्या गतिर्नास्ति । अकथ्यमाने च, महाननर्थोपनिपातो जायते । प्राणपरित्यागेनापि रक्षणीयाः सुहृदसव इति कथयामि ।

अस्ति — भवत्याः समक्षमेव स मया तथा निष्ठुरमुपदर्शितकोपेनाभिहितः । तथा चाभिधाय परित्यज्य तम्, तस्मात्प्रदेशादुपजातमन्युः, उत्सृष्टकुसुमावचयः, अन्यं प्रदेशमगमम् । अपयातायां भवत्यां मुहूर्तमिव स्थित्वा, 'एकाकी किमयमिदानीमाचरति' इति संजातवितर्कः, प्रतिनिवृत्य, विटपान्तरितविग्रहः, तं प्रदेशं व्यलोकयम् । यावत्तत्र तं नाद्राक्षम्, आसीच्च मे मनस्येवम्—'किंनु मदनपरायत्तचित्तवृत्तिस्तामेवानुसरन्गतो भवेत् ? गतायां च तस्यां लब्धचेतनो लज्जमानो न शक्नोति मे दर्शनपथमुपगन्तुम् । आहोस्वित्कुपितः परित्यज्य मां मतः? उतान्वेषयन्मामेव प्रदेशमन्यमितः समाश्रितः स्यात्'' इत्येवं विकल्पयन्, कंचित्कालमतिष्ठम् । तेन तु जन्मनः प्रभृत्यनभ्यस्तेन तस्य क्षणमप्यदर्शनेन दूयमानः पुनरचिन्तयम्—

'स कदाचिद्धैर्यस्खलनविलक्षः किंचिदनिष्टमपि समाचरेत्। न हि किंचिन्न क्रियते ह्रिया। तन्न युक्तमेनमेकाकिनं कर्तुम्' इत्यवधार्य, अन्वेष्टुमादरमकरवम्। अन्वेषयंश्च यथा यथा नापश्यं तम्, तथा तथा सुहृत्स्नेहकातरेण मनसा तत्तदशोभनमाशङ्कमानः, तरुलतागहनानि चन्दनवीथिकालतामण्डपान् सरःकूलानि च वीक्षमाणः, निपुणमितस्ततो दत्तदृष्टिः, सुचिरं व्यचरम्।

अथैकस्मिन्सरःसमीपवर्तिनि निरन्तरतया कुसुममय इव मधुकरमय इव परभृतमय इव मयूरमय इवातिमनोहरे वसन्तजन्मभूमिभूते लतागहने कृतावस्थानम्, उत्सृष्टसकलव्यापारतया लिखितमिव उत्कीर्णमिव स्तम्भितमिव उपरतमिव प्रसुप्तमिव योगसमाधिस्थमिव निश्चलमपि स्ववृत्ताच्चलितम्, शापप्रदानभयादिवादत्तदर्शनेन कुसुमायुधेन संताप्यमानम्, अतिनिस्पन्दतया हृदयनिवासिनीं प्रियां द्रष्टुमन्तः प्रविष्टैरिवासह्यसंतापसंत्रासप्रलीनैरिव मनःक्षोभप्रकुपितैरिवोन्मुच्य गतैरिन्द्रियैः शून्यीकृतशरीरम्, निस्पन्दनिमीलितेनेक्षणयुगलेन बाष्पजलदुर्दिनमुत्सृजन्तम्, अलिनिवहनिपीयमानपरिमलैरुपरि पतद्भिश्चम्पककुड्मलैस्तप्तशरशल्यकैरिव सधूमैः कुसुमशरेण ताड्यमानम्, प्रभातचन्द्रमिव पाण्डुतया परिगृहीतम्, निदाघगङ्गाप्रवाहमिव कृशिमानमागतम्, अन्तर्गतानलं चन्दनविटपमिव म्लायन्तम्, अन्यमिव, अदृष्टपूर्वमिव, अपरिचितमिव, जन्मान्तरमिवोपगतम्, परां कोटिमधिरूढं मन्मथावेशस्य, अनभिज्ञेयपूर्वाकारं तमहमद्राक्षम्।

अपगतनिमेषेण चक्षुषा तदवस्थं चिरमुद्वीक्ष्य समुपजातविषादो वेपमानेन हृदयेनाचिन्तयम् — 'एवं नामायमतिदुर्विषहवे-

गो मकरकेतुः। येनानेन क्षणेनायमीदृशमवस्थान्तरमप्रतीकारमुपनीतः। कथमेवमेकपदे व्यर्थीभवेदेवंविधो ज्ञानराशिः। अहो बत महच्चित्रम्। तथा नामायमा शैशवाद्धीरप्रकृतिरस्खलितवृत्तिर्मम चान्येषां च मुनिकुमारकाणां स्पृहणीयचरित आसीत्। अद्य त्वितर इव परिभूय ज्ञानम्, अविगणय्य तपःप्रभावम्, उन्मूल्य गाम्भीर्यम्, मन्मथेन जडीकृतः। सर्वथा दुर्लभं यौवनमस्खलितम्' इति। उपसृत्य च तस्मिन्नेव शिलातलैकपार्श्वे समुपविश्य, अंसदेशावसक्तपाणिः, तमनुन्मीलितलोचनमेव 'सखे पुण्डरीक, कथय किमिदम्' इत्यपृच्छम्।

अथ सुचिरसंमीलनाल्लग्नमिव कथमपि प्रयत्नेनानवरतरोदनवशादुपजातारुणभावमश्रुजलपटलपूरप्लावितमुत्कुपितमिव सवेदनमिव स्वच्छांशुकान्तरितरक्तकमलवनच्छायं चक्षुरुन्मील्य, मन्थरया दृष्ट्या सुचिरं विलोक्य माम्, आयततरं निश्वस्य, लज्जाविशीर्यमाणविरलाक्षरम्, 'सखे कपिञ्जल, विदितवृत्तान्तोऽपि किं मां पृच्छसि' इति कृच्छ्रेण शनैः शनैरवदत्। अहं तु तदाकर्ण्य, तदवस्थयैव, 'अप्रतीकारविकारोऽयम्, तथापि सुहृदा सुहृदसन्मार्गप्रवृत्तो यावच्छक्तितः सर्वात्मना निवारणीयः' इति मनसावधार्य, अब्रवम्—'सखे पुण्डरीक, सुविदितमेतन्मम। केवलमिदमेव पृच्छामि। यदेतदारब्धं भवता, किमिदं गुरुभिरुपदिष्टम्? उत धर्मशास्त्रेषु पठितम्? उत धर्मार्जनोपायोऽयम्? उतापरस्तपसां प्रकारः? उत स्वर्गगमनमार्गोऽयम्? उत व्रतरहस्यमिदम्? उत मोक्षप्राप्तियुक्तिरियम्? आहोस्विदन्यो नियमप्रकारः? कथमेतद्युक्तं भवतो मनसापि चिन्तयितुम्, किं पुनराख्यातुमीक्षितुं वा। किमप्रबुद्ध इवानेन मन्मथहतकेनोपहासास्पदतां नीयमानमात्मानं नाव-

बुध्यसे। मूढो हि मदनेनायास्यते। का वा सुखाशा साधुजननिन्दितेष्वेवंविधेषु प्राकृतजनबहुमतेषु भवतः। स खलु धर्मबुद्ध्या विषलतावनं सिञ्चति, कुवलयमालेति निस्त्रिंशलतामालिङ्गति, कृष्णागरुधूमलेखेति कृष्णसर्पमवगूहते, रत्नमिति ज्वलन्तमङ्गारमभिस्पृशति, मूढो विषयोपभोगेष्वनिष्टानुबन्धिषु यः सुखबुद्धिमारोपयति। अधिगतविषयतत्त्वोऽपि कस्मात्खद्योत इव ज्योतिर्निर्वीर्यमिदं ज्ञानमुद्वहसि। यतो न निवारयसि प्रबलरजःप्रसरकलुषितानि स्रोतांसीवोन्मार्गप्रस्थितानीन्द्रियाणि, न नियमयसि च क्षुभितं मनः। कोऽयमनङ्गो नाम। धैर्यमवलम्ब्य निर्भर्त्स्यतामयं दुराचारः' इत्येवं वदत एव मे वचनमाक्षिप्य, प्रतिपक्ष्मान्तरालप्रवृत्तबाष्पवेणिकं प्रमृज्य चक्षुः, करतलेन पाणौ मामवलम्ब्य, अवोचत्—'सखे, किं बहुनोक्तेन। सर्वथा स्वस्थोऽसि। आशीविषविषवेगविषमाणामेतेषां कुसुमचापसायकानां पतितोऽसि न गोचरे। सुखमुपदिश्यते परस्य। यस्य चेन्द्रियाणि सन्ति, मनो वा विद्यते, यः पश्यति वा, शृणोति वा, श्रुतमवधारयति वा, यो वा शुभमिदं न शुभमिदमिति विवेक्तुमलम्, स खलूपदेशमर्हति। मम तु सर्वमेवेदमतिदूरापतम्। कथमप्येवमेवायत्तविधृतास्तिष्ठन्त्यसवः। दूरातीतः खलूपदेशकालः। समतिक्रान्तो धैर्यावसरः। गता प्रतिसंख्यानवेला। अतीतो ज्ञानावष्टम्भसमयः। केन वान्येनास्मिन्समये भवन्तमपहायोपदेष्टव्यम्, उन्मार्गप्रवृत्तिनिवारणं वा करणीयम्। कस्यान्यस्य वा वचसि मया स्थातव्यम्। को वापरस्त्वत्समो मे जगति बन्धुः। किं करोमि, यन्न शक्नोमि निवारयितुमात्मानम्। इयमनेनैव क्षणेन भवता दृष्टा दुष्टावस्था। तद्गत इदानीमुपदेशकालः।

यावत्प्राणिमि, तावदस्य मदनसंतापस्य प्रतिक्रियां क्रियमाणामिच्छामि। पच्यन्त इव मेऽङ्गानि। उत्क्वथ्यत इव हृदयम्। प्लुष्यत इव दृष्टिः। ज्वलतीव शरीरम्। अत्र यत्प्राप्तकालम्, तत्करोतु भवान्' इत्यभिधाय तूष्णीमभवत्।

एवमुक्तोऽप्यहमेनं प्राबोधयं पुनः पुनः। यदा शास्त्रोपदेशविशदैः सनिदर्शनैः सेतिहासैश्च वचोभिः सानुनयं सोपग्रहं चाभिधीयमानोऽपि नाकरोत्कर्णे, तदाहमचिन्तयम्— 'अतिभूमिमयं गतो न शक्यते निवर्तयितुम्। इदानीं निरर्थकाः खलूपदेशाः। तत्प्राणपरिरक्षणेऽपि तावदस्य यत्नमाचरामि' इति कृतमतेः, मुहुर्मुहुरन्यदन्यनलिनदलशयनमुपकल्पयतः, मुहुर्मुहुश्चन्दनचर्चामारचयतः, मुहुर्मुहुश्च स्वेदप्रतिक्रियां कुर्वतः, कदलीदलेनानवरतं वीजयतः, समुदभून्मे मनसि चिन्ता—'नास्ति खल्वसाध्यं नाम भगवतो मनोभुवः। क्वायं हरिण इव वनवासनिरतः स्वभावमुग्धो जनः। क्व च विविधविलासरसराशिर्गन्धर्वराजपुत्री महाश्वेता। सर्वथा न हि किंचिदस्य दुर्घटं दुष्करमनायत्तमकर्तव्यं वा जगति। दुरुपपादेष्वप्यर्थेष्वयमवज्ञया विचरति। नायं केनापि प्रतिकूलयितुं शक्यते। का वा गणना सचेतनेषु। अपगतचेतनान्यपि संघटयितुमलम्। यद्यस्मै रोचते, कुमुदिन्यपि दिनकरकरानुरागिणी भवति। कमलिन्यपि शशिकरद्वेषमुज्झति। निशापि वासरेण सह मिश्रतामेति। ज्योत्स्नाप्यन्धकारमनुवर्तते। किं वा तस्य दुःसाधमपरम्। एवंविधो येनायमगाधगाम्भीर्यसागरस्तृणवल्लघुतामुपनीतः। क्व तत्तपः। क्वेयमवस्था। सर्वथा निष्प्रतीकारेयमापदुपस्थिता। किमिदानीं कर्तव्यम्। किं वा चेष्टितव्यम्। कां

दिशं गन्तव्यम्। किं शरणम्। को वोपायः। कः सहायः। कः प्रकारः। का युक्तिः। कः समाश्रयः। येनास्यासवः संधार्यन्ते। केन वा कौशलेन, कतमया वा युक्त्या, कतरेण वा प्रकारेण, केन वावष्टम्भेन, कया वा प्रज्ञया, कतमेन वा समाश्वासनेन, अयं जीवेत्' इत्येते चान्ये च मे विषण्णहृदयस्य संकल्पाः प्रादुरासन्।

पुनश्चाचिन्तयम्– 'किमनया ध्यातया निष्प्रयोजनया चिन्तया। प्राणास्तावदस्य येन केनचिदुपायेन शुभेनाशुभेन वा रक्षणीयाः। तेषां च तत्समागममेकमपहाय नास्त्यपरः संरक्षणोपायः। बालभावादप्रगल्भतया च तपोविरुद्धमनुचितमुपहासमिवात्मनो मदनव्यतिकरं मन्यमानो नियतमेकोच्छ्वासावशेषजीवितोऽपि नायं तस्याः स्वयमभिगमनेन पूरयति मनोरथम्। अकालान्तरक्षमश्चायमस्य मदनविकारः। सततमतिगर्हितेनाकृत्येनापि रक्षणीयान्मन्यन्ते सुहृदसून्साधवः। तदतिह्रेपणमकर्तव्यमप्येतदस्माकमवश्यकर्तव्यतामापतितम्। किं चान्यत्क्रियते। का चान्या गतिः। सर्वथा प्रयामि तस्याः सकाशम्। आवेदयाम्येतामवस्थाम्' इति चिन्तयित्वा, कदाचिदनुचितव्यापारप्रवृत्तं मां विज्ञाय संजातलज्जो निवारयेदित्यनिवेद्यैव तस्मै, तत्प्रदेशात्सव्याजमुत्थायागतोऽहम्। तदेवमवस्थिते यदत्रावसरप्राप्तम्, ईदृशस्य चानुरागस्य सदृशम्, अस्मदागमनस्य चानुरूपम्, आत्मनो वा समुचितम्, तत्र प्रभवति भवती' इत्यभिधाय, किमियं वक्ष्यतीति मन्मुखासक्तदृष्टिस्तूष्णीमासीत्।

अहं तु तदाकर्ण्य, सुखामृतमये हृद इव निमग्ना, सर्वानन्दानामुपरि वर्तमाना, सर्वमनोरथानामग्रमिवाधिरूढा, तत्कालोपजातया

लज्जया किंचिदवनम्यमानवदनत्वादस्पृष्टकपोलोदरैरानन्दबाष्पजलबिन्दुभिः स्रवद्भिरावेद्यमानप्रहर्षप्रसङ्गा तत्क्षणमचिन्तयम् — 'दिष्ट्या तावदयमनङ्गो मामिव तमप्यनुबध्नाति। यत्सत्यमेतेन मे संतापयताप्यंशेन दर्शितानुकूलता। यदि च सत्यमेव तस्येदृशी दशा वर्तते, ततः किमिव नोपकृतमनेन। किं वा नोपपादितम्। को वानेनापरः समानो बन्धुः। कथं वा कपिञ्जलस्य स्वप्नेऽपि वितथा भारती प्रशान्ताकृतेरस्माद्वदनान्निष्क्रामति। इत्थंभूते किं मयापि प्रतिपत्तव्यम्। तस्य वा पुरः किमभिधातव्यम्' इत्येवं विचारयन्तीमेव प्रविश्य ससंभ्रमा प्रतीहारी मामकथयत् — 'भर्तृदारिके, त्वमस्वस्थशरीरेति परिजनादुपलभ्य महादेवी प्राप्ता' इति। तच्च श्रुत्वा कपिञ्जलो महाजनसंमर्दभीरुः सत्वरमुत्थाय, 'राजपुत्रि, महानयमुपस्थितः कालातिपातः। भगवांश्च भुवनत्रयचूडामणिरस्तमुपगच्छति दिवसकरः। तद्गच्छामि। सर्वथाभिमतसुहृत्प्राणरक्षादक्षिणार्थमयमुपरचितोऽञ्जलिः। एष मे परमो विभवः' इत्यभिधाय, प्रतिवचनकालमप्रतीक्ष्यैव, पुरोयायिनाम्बायाः परिजनेन सर्वतः संरुद्धे द्वारदेशे कथमप्यवाप्तनिर्गमः प्रययौ। अम्बा तु मत्समीपमागत्य सुचिरं स्थित्वा स्वभवनमयासीत्। तया तु तत्रागत्य किं कृतम्, किमभिहितम्, किमाचेष्टितम्, इति शून्यहृदया सर्वं नालक्षयम्।

गतायां च तस्याम्, अस्तमुपगते भगवति सवितरि, तिमिरेणावष्टभ्यमाने जीवलोके, किंकर्तव्यतामूढा तामेव तरलिकामपृच्छम्— 'अयि तरलिके, कथं न पश्यसि—दृढमाकुलं मे हृदयम्। अप्रतिपत्तिविह्वलानि चेन्द्रियाणि। न स्वयमण्वपि कर्तव्यमलमस्मि ज्ञातुम्।

उपदिशतु मे भवती, यदत्र साम्प्रतम् । अयमेवं त्वत्समक्षमेवाभिधाय गतः कपिञ्जलः । यदि तावदितरकन्यकेव विहाय लज्जाम्, उत्सृज्य धैर्यम्, अवमुच्य विनयम्, अचिन्तयित्वा जनापवादम्, अतिक्रम्य सदाचारम्, उल्लङ्घ्य शीलम्, अवगणय्य कुलम्, अङ्गीकृत्यायशः, रागान्धवृत्तिः, अननुज्ञाता पित्रा, अननुमोदिता मात्रा स्वयमुपगम्य ग्राहयामि पाणिम् । एवं गुरुजनातिक्रमादधर्मो महान् । अथ धर्मानुरोधादितरपक्षावलम्बनद्वारेण मृत्युमङ्गीकरोमि, एवमपि प्रथमं तावत् — स्वयमागतस्य प्रथमप्रणयिनस्तत्रभवतः कपिञ्जलस्य प्रणयप्रसरभङ्गः । पुनरपरम्–यदि कदाचित्तस्य जनस्य मत्कृतादाशाभङ्गात्प्राणविपत्तिरुपजायते, तदपि मुनिजनवधजनितं महदेनो भवेत्' इत्येवमुच्चारयन्त्यामेव मयि, आसन्नचन्द्रोदयजन्मना विरलविरलेनालोकेन धूसरतां वासवीदिगयासीत् ।

ततः शशिकेसरिकरविदार्यमाणतमःकरिकुम्भसंभवेन मुक्ताफलक्षोदेनेव धवलतामुपनीयमानं पश्चिमेतरदिन्दुधाम्ना दिगन्तरमदृश्यत । शनैः शनैश्चन्द्रदर्शनान्मन्दमन्दस्मिताया दशनप्रभेव ज्योत्स्ना निष्पतन्ती निशाया मुखशोभामकरोत् । तदनु रसातलादवनीमवदार्योद्गच्छता शेषफणामण्डलेनेव रजनिकरबिम्बेनाराजत रजनी ।

अथ तं प्रत्यासन्नसमुद्रविद्रुमप्रभापाटलितमिवाभिनवोदयरागलोहितं रजनिकरमुदितं विलोकयन्तीम्, अन्धकारितहृदयाम्, तरलिकोत्सङ्गविधृतशरीराम्, मूर्च्छा मां निमीलितलोचनामकार्षीत् । अचिरेण च संभ्रान्ततरलिकोपनीताभिश्चन्दनचर्चाभिस्तालवृन्तानिलैश्चोपलब्धसंज्ञा, तामेवाकुलाकुलां रुदतीं तरलिकामपश्यम् । उन्मीलितलोचनां

च मां सा कृतपादप्रणामा बद्धाञ्जलिरवादीत्—भर्तृदारिके, किं लज्जया गुरुजनापेक्षया वा। प्रसीद। प्रेषय माम्। आनयामि ते हृदयदयितं जनम्। उत्तिष्ठ, स्वयं वा तत्र गम्यताम्' इत्येवंवादिनीं ताम् 'उत्तिष्ठ, यथाकथंचिदनुद्गतजीविता संभावयामि हृदयदयितं जनम्' इत्यभिदधाना, कथंचिदवलम्ब्य तामेवोदतिष्ठम्। उच्चलितायाश्च मे दुर्निमित्तनिवेदकमस्पन्दत दक्षिणं लोचनम्। उपजातशङ्का चाचिन्तयम्—'इदमपरं किमप्युपक्षिप्तं दैवेन' इति।

अथ नातिदूरोद्गतेन चन्दनरसनिर्झरनिकरानिव क्षरता अमृतसागरपूरानिवोद्गिरता चन्द्रमण्डलेन प्लाव्यमाने ज्योत्स्नया भुवनान्तराले, महावराहदंष्ट्रामण्डलनिभेन शशिना क्षीरसागरोदरादिवोद्ध्रियमाणे महीमण्डले, चन्द्रोदयानन्दनिर्भरे विलासमय इव प्रीतिमय इव जीवलोके, प्रदोषसमये, गृहीतविविधकुसुमताम्बूलाङ्गरागपटवासचूर्णया तरलिकयानुगम्यमाना, रक्तांशुकेन कृतशिरोवगुण्ठना, केनचिदात्मीयेनापि परिजनेनानुपलक्ष्यमाणा, तस्मात्प्रासादशिखरादवातरम्।

अवतीर्य च प्रमदवनपक्षद्वारेण निर्गत्य तत्कालोचितैरालापैस्तया सह तमुद्देशमभ्युपागमम्। तत्र च मार्गलताकुसुमरजोधूसरं चरणयुगलं कैलासतटाक्चन्द्रोदयप्रस्रुतचन्द्रकान्तमणिप्रस्रवणे प्रक्षालयन्ती, यस्मिन्प्रदेशे स आस्ते, तस्मिन्नेव चास्य सरसः पश्चिमे तटे, पुरुषस्येव रुदितध्वनिं विप्रकर्षान्नातिव्यक्तमुपालक्षयम्। दक्षिणेक्षणस्फुरणेन च प्रथममेव मनस्याहितशङ्का, तेन सुतरामवदीर्णहृदयेव, किमप्यनिष्टमन्तः कथयतेव विषण्णेनान्तरात्मना 'तरलिके,

किमिदम्' इति सभयमभिदधाना वेपमानगात्रयष्टिः, तदभिमुखमतित्वरितमगच्छम् ।

अथ निशीथप्रभावाद्दूरादेव विभाव्यमानस्वरमुन्मुक्तार्तनादम् 'हा हतोऽस्मि। हा दग्धोऽस्मि। हा वञ्चितोऽस्मि। हा किमिदमापतितम्। उत्सन्नोऽस्मि। दुरात्मन् मदनपिशाच पाप निर्घृण, किमिदमकृत्यमनुष्ठितम्। आः पापे दुष्कृतकारिणि दुर्विनीते महाश्वेते, किमनेन तेऽपकृतम्। आः पाप दुश्चरित चन्द्रचाण्डाल, कृतार्थोऽसीदानीम्। अपगतदाक्षिण्य दक्षिणानिलहतक, पूर्णास्ते मनोरथाः; कृतं कर्तव्यम्; वहेदानीं यथेष्टम्। हा भगवन् श्वेतकेतो पुत्रवत्सल, न वेत्सि मुषितमात्मानम्। हा धर्म, निष्परिग्रहोऽसि। हा तपः, निराश्रयमसि। हा सरस्वति, विधवासि। हा सत्य, अनाथमसि। हा सुरलोक, शून्योऽसि। सखे, प्रतिपालय माम्। अहमपि भवन्तमनुयास्यामि। न शक्नोमि भवता विना क्षणमप्यवस्थातुमेकाकी। कथमपरिचित इवादृष्टपूर्व इवाद्य मामेकपदे उत्सृज्य प्रयासि। कुतस्तवेयमतिनिष्ठुरता। कथय त्वत् ऋते क्व गच्छामि। कं याचे। कं शरणमुपैमि। अन्धोऽस्मि संवृत्तः। शून्या मे दिशो जाताः। निरर्थकं जीवितम्। अप्रयोजनं तपः। निःसुखाश्च लोकाः। केन सह परिभ्रमामि। कमालपामि। उत्तिष्ठ, देहि मे प्रतिवचनम्। क्व तन्ममोपरि सुहृत्प्रेम? क्व सा स्मितपूर्वाभिभाषिता च' इत्येतानि चान्यानि च विलपन्तं कपिञ्जलमश्रौषम्।

तच्च श्रुत्वा, पतितैरिव प्राणैर्दूरादेव मुक्तैकताराक्रन्दा, सरस्तीरलतासक्तित्रुट्यमानांशुकोत्तरीया, यथाशक्ति त्वरितैरज्ञातसम-

विषमभूमिभागविन्यस्तैः पादप्रक्षेपैः प्रस्खलन्ती पदे पदे, केनाप्युत्क्षिप्य नीयमानेव तं प्रदेशं गत्वा, सरस्तीरसमीपवर्तिनि शशिमणिशिलातले विरचितं मृणालमयं शयनमधिशयानम्, अतिनिस्पन्दतया मत्पदशब्दमिवाकर्णयन्तम्, मनःक्षोभप्रायश्चित्तप्राणायामावस्थितमिव, 'मत्तः प्रियतरस्तवापरो जनो जातः' इति कुपितेनेव जीवितेन परित्यक्तम्, 'कठिनहृदये, दर्शनमात्रकेणापि न पुनरनुगृहीतोऽयमनुगतो जनः' इति सप्रणयं मामुपालभमानमिव चक्षुषा, किंचिद्विवृताधरतया जीवितमपहर्तुमन्तःप्रविष्टैरिवेन्दुकिरणैर्निर्गच्छद्भिर्दशनांशुभिर्धवलितपुरोभागम्, मन्मथव्यथाविघटमानहृदयनिहितेन वामेन पाणिना 'प्रसीद, प्राणैः समं प्राणसमे, न गन्तव्यम्' इति हृदयस्थितां मामिव धारयन्तम्, अन्तिकस्थितेन चाचिरोद्गतजीवितमार्गमिवोर्ध्वेन विलोकयता तपःसुहृदा कमण्डलुना समुपेतम्, कपिञ्जलेन मद्दर्शनात् 'अब्रह्मण्यम्' इत्यूर्ध्वहस्तेन द्विगुणीभूतबाष्पोद्गमेनाक्रोशता कण्ठे परिष्वक्तम्, तत्क्षणविगतजीवितं तमहं पापकारिणी मन्दभाग्या महाभागमद्राक्षम् ।

उद्भूतमूर्छान्धकारा च पातालतलमिवावतीर्णा, तदा 'क्वाहमगमम्, किमकरवम्, किं व्यलपम्, इति सर्वमेव नाज्ञासिषम्। असवश्च मे तस्मिन्क्षणे किमतिकठिनतयास्य मूढहृदयस्य, किमनेकदुःखसहस्रसहिष्णुतया हतशरीरकस्य, किं विहिततया दीर्घशोकस्य, किं भाजनतया जन्मान्तरोपात्तस्य दुष्कृतस्य, किं दुःखदाननिपुणतया दग्धदैवस्य, किमेकान्तवामतया दुरात्मनो मन्मथहतकस्य, केन हेतुना, नोदगच्छन्ति स्म; तदपि न ज्ञातवती। केवलमतिचिराल्लब्ध-

चेतना दुःखभागिनी, वह्नाविव पतितमसह्यशोकदह्यमानमात्मानमवनौ विचेष्टमानमपश्यम्। अश्रद्दधाना चासंभावनीयं तत्तस्य मरणम् आत्मनश्च जीवितम्, उत्थाय 'हा हा किमिदमुपनतम्' इति मुक्तार्तनादा, 'हा अम्ब, हा तात, हा सख्यः, इति व्याहरन्ती, 'हा नाथ जीवितनिबन्धन, आचक्ष्व—क्व मामेकाकिनीमशरणामकरुण, विमुच्य यासि। पृच्छ तरलिकां त्वत्कृते मया यानुभूतावस्था। युगसहस्रायमाणः कृच्छ्रेण नीतो दिवसः। प्रसीद। सकृदप्यालप। दर्शय भक्तवत्सलताम्। ईषदपि विलोकय। पूरय मे मनोरथम्। आर्तास्मि। भक्तास्मि। अनुरक्तास्मि। अनाथास्मि। बालास्मि। अगतिकास्मि। दुःखितास्मि। अनन्यशरणास्मि। मदनपरिभूतास्मि। किमिति न करोषि दयाम्। कथय, किमपराद्धम्। किं वा नानुष्ठितं मया। कस्यां वा नाज्ञायामादृतम्। कस्मिन्वा त्वदनुकूले नाभिरतम्। येन कुपितो दासजनमकारणात्परित्यज्य व्रजन्न बिभेषि कौलीनात्। अलीकानुरागप्रतारणकुशलया किं वा मया वामया पापया, याहमद्यापि प्राणिमि। हा, हतास्मि मन्दभागिनी। कथं न त्वं जातः, न विनयः, न बन्धुवर्गः, न परलोकः। धिङ्मां दुष्कृतकारिणीम्, यस्याः कृते तवेयमीदृशी दशा वर्तते। नास्ति मत्सदृशी नृशंसहृदया, याहमेवंविधं भवन्तमुत्सृज्य गृहं गतवती। किं मे गृहेण, किमम्बया, किं वा तातेन, किं बन्धुभिः, किं परिजनेन। हा, कमुपयामि शरणम्। अयि दैव, दर्शय दयाम्। विज्ञापयामि त्वाम्। देहि दयितदक्षिणाम्। भगवति भवितव्यते, कुरु कृपाम्। पाहि वनितामनाथाम्। भगवत्यो वनदेवताः, प्रसीदत, प्रयच्छतास्य प्राणान्। अव वसुंधरे। सकललोकानु-

ग्रहजननि रजनि, किमर्थं नानुकम्पसे। तात कैलास, शरणागतास्मि ते। दर्शय दयालुताम्' इत्येतानि चान्यानि च व्याक्रोशन्ती, कियद्वा स्मरामि, ग्रहगृहीतेवोन्मत्तेव व्यलपम्।

उपर्युपरिपतितनयनजलधारानिकरच्छलेन विलीयमानेव, तर्जाग्नितायेवात्ममरणाय स्पृहयन्ती, करतलेन कपोलयोर्ललाटे अंसयोर्हृदये च परामृशन्ती, 'पुण्डरीक, निष्ठुरोऽसि। एवमप्यार्तां न गणयसि माम्' इत्युपालभमाना, मुहुर्मुहुरेनमन्वनयम्। मुहुर्मुहुः कण्ठे गृहीत्वा व्याक्रोशम्। 'अयि भगवन्, प्रसीद, प्रत्युज्जीवयैनम्' इति मुहुर्मुहुः कपिञ्जलस्य पादयोरपतम्। मुहुर्मुहुश्च तरलिकां कण्ठे गृहीत्वा प्रारुदम्' इत्येवमात्मवृत्तान्तमावेदयन्त्या एव तस्याः समतिक्रान्तं कष्टमप्यतिकष्टमवस्थान्तरमनुभवन्त्या इव चेतनां जहार मूर्छा। वेगान्निपतन्तीं च शिलातले तां ससंभ्रमं प्रसारितकरः परिजन इव जातपीडश्चन्द्रापीडो विधृतवान्। अश्रुजलार्द्रेण च तदीयेनैवोत्तरीयवल्कलप्रान्तेन शनैः शनैर्वीजयन्, संज्ञां ग्राहितवान्। उपजातकारुण्यश्च बाष्पसलिलोत्पीडेन प्रक्षाल्यमानकपोलयुगलो लब्धचेतनामवादीत्—'भगवति, मया पापेन तवायं पुनरभिनवतामुपनीतः शोकः, येनेदृशीं दशामुपनीतासि। तदलमनया कथया। संह्रियतामियम्। अहमप्यसमर्थः श्रोतुम्। अतिक्रान्तान्यपि हि संकीर्त्यमानानि प्रियजनविश्वासवचनान्यनुभवसमां वेदनामुपजनयन्ति सुहृज्जनस्य दुःखानि। तन्नार्हसि कथंकथमपि विधृतानिमानसुलभानसून्पुनःपुनः स्मरणशोकानलेन्धनतामुपनेतुम्' इति।

एवमुक्त्वा दीर्घमुष्णं च निश्वस्य, बाष्पायमाणलोचना सनि-

वेदमवादीत् — 'राजपुत्र, या तदा तस्यामतिदारुणायां हतनिशायामेभिरतिनृशंसैरसुभिर्न परित्यक्ता, ते मामिदानीं परित्यजन्तीति दूरापेतम्। नूनमपुण्योपहतायाःपापाया मम भगवानन्तकोऽपि परिहरति दर्शनम्। कुतश्च मे कठिनहृदयायाः शोकः। सर्वमिदमलीकमस्य दुरात्मनः शठहृदयस्य। सर्वथाहमनेन त्यक्तत्रपेण निरपत्रपाणामग्रेसरी कृता। यया वज्रमय्येवेदमनुभूतम्, तस्याः का गणना कथनं प्रति। किं वा परमतः कष्टतरमाख्येयमन्यद्भविष्यति, यन्न शक्यते श्रोतुमाख्यातुं वा। केवलमस्य वज्रपातस्यानन्तरमाश्चर्यं यदभूत्, तदावेदयामि। आत्मनश्च प्राणधारणकारणलव इवाव्यक्तो यः समुत्पन्नः, तं च कथयामि। यया दुराशामृगतृष्णिकया गृहीताहमिदमुपरतकल्पं परकीयमिव भारभूतमप्रयोजनमकृतज्ञं च हतशरीरं वहामि, तदलं श्रूयताम्। ततश्च तथाभूते तस्मिन्नवस्थान्तरे, मरणैकनिश्चया तत्तद्बहु विलप्य तरलिकामब्रवम् — 'अयि उत्तिष्ठ निष्ठुरहृदये, कियद्रोदिषि। काष्ठान्याहृत्य विरचय चिताम्। अनुसरामि जीवितेश्वरम्' इति।

अत्रान्तरे, झटिति, चन्द्रमण्डलविनिर्गतो गगनादवतीर्य, धवलदुकूलपल्लवकल्पितोष्णीषग्रन्थिः, कुमुदधवलदेहः, महाप्रमाणः पुरुषो महापुरुषलक्षणोपेतो दिव्याकृतिः, बाहुभ्यां मृणालधवलाङ्गुलिभ्यामतिशीतलस्पर्शाभ्यां तमुपरतमुत्क्षिपन्, दुन्दुभिनादगम्भीरेण स्वरेण 'वत्से महाश्वेते, न परित्याज्यास्त्वया प्राणाः। पुनरपि तवानेन सह भविष्यति समागमः' इत्येवमादृतः पितेवाभिधाय, सहैवानेन गगनतलमुदपतत्। अहं तु तेन व्यतिकरेण सभया सविस्मया सकौतुका

चोन्मुखी 'किमिदम्' इति कपिञ्जलमपृच्छम्। असौ तु ससंभ्रममदत्त्वैवोत्तरमुदतिष्ठत्। 'दुरात्मन्, क्व मे वयस्यमपहृत्य गच्छसि' इत्यभिधाय, उन्मुखः संजातकोपो बध्नन्सवेगमुत्तरीयवल्कलेन परिकरम्, उत्पतन्तं तमेवानुसरन्नन्तरिक्षमुदगात्। पश्यन्त्या एव च मे सर्व एव ते तारागणमध्यमविशन्।

मम तु तेन द्वितीयेनेव प्रियतममरणेन कपिञ्जलगमनेन द्विगुणीकृतशोकायाः, सुतरामदीर्यत हृदयम्। किंकर्तव्यतामूढा च तरलिकामब्रवम्—'अयि, न जानासि—किमेतत्' इति। सा तु तदवलोक्य, स्त्रीस्वभावकातरा, तस्मिन्क्षणे शोकाभिभाविना भयेनाभिभूता, वेपमानाङ्गयष्टिः, मम मरणशङ्कया च वराकी विषण्णहृदया सकरुणमवादीत्—"भर्तृदारिके, न जानामि पापकारिणी। किं तु महदिदमाश्चर्यम्। अमानुषाकृतिरेष पुरुषः। समाश्वासिता चानेन गच्छता सानुकम्पं पित्रेव भर्तृदारिका। प्रायेण चैवंविधा दिव्याः स्वप्नेऽप्यविसंवादिन्यो भवन्त्याकृतयः। किमुत साक्षात्। न चाल्पमपि विचारयन्ती कारणमस्य मिथ्याभिधाने पश्यामि। अतो युक्तं विचार्यात्मानमस्मात्प्राणपरित्यागव्यवसायान्निवर्तयितुम्। अतिमहत्खल्विदमाश्वासस्थानमस्यामवस्थायाम्। अपि च तमनुसरन्गत एव कपिञ्जलः। तस्माच्च 'कुतोऽयम्? को वायम्? किमर्थं वानेनायमपगतासुरुत्क्षिप्य नीतः? क्व वा नीतः? कस्माच्चासंभावनीयेनामुना पुनः समागमाशाप्रदानेन भर्तृदारिका समाश्वासिता?' इति सर्वमुपलभ्य, जीवितं वा मरणं वा समाचरिष्यसि। अदुर्लभं हि मरणमध्यवसितम्। पश्चादप्येतद्भविष्यति। न च जीवन्कपिञ्जलो भर्तृदारिकामदृष्ट्वा स्था-

स्यति। तेन तत्प्रत्यागमनकालावधयोऽपि तावद्ध्रियन्ताममी प्राणा:" इत्यभिदधाना पादयोर्मे न्यपतत्। अहं तु सकललोकदुर्लङ्घतया जीविततृष्णाया:, क्षुद्रतया च स्त्रीस्वभावस्य, तया च तद्वचनोपनीतया दुराशामृगतृष्णिकया, कपिञ्जलप्रत्यागमनकाङ्क्षया च, तस्मिन्काले तदेव युक्तं मन्यमाना, नोत्सृष्टवती जीवितम्। आशया हि किमिव न क्रियते। तां च पापकारिणीं कालरात्रिप्रतिमां वर्षसहस्रायमाणां नरकमयीमिवाग्निमयीमिव उत्सन्ननिद्रा, तथैव क्षितितले विचेष्टमाना, तस्मिन्नेव सरस्तीरे तरलिकाद्वितीया क्षपां क्षपितवती।

प्रत्युषसि तूत्थाय तस्मिन्नेव सरसि स्नात्वा, कृतनिश्चया, तत्प्रीत्या तमेव कमण्डलुमादाय, तान्येव च वल्कलानि तामेव चाक्षमालां गृहीत्वा, बुद्ध्वा नि:सारतां संसारस्य, दृष्ट्वा च निष्ठुरतां दैवस्य, चिन्तयित्वा चातिबहुलदु:खतां स्नेहस्य, अवधार्य चाकाण्डभङ्गुरतां सर्वसुखानाम्, अविगणय्य तातमम्बां च, परित्यज्य सह परिजनेन सकलबन्धुवर्गम्, निवर्त्य विषयसुखेभ्यो मन:, संयम्येन्द्रियाणि, गृहीतब्रह्मचर्या, तस्य जनस्याश्रुमोक्षमात्रेण किल कृतज्ञतां दर्शयन्ती, तदनुरागकृशमिदमपुण्यबहुलमस्तमितलज्जममङ्गलभूतमनेकक्लेशायाससहस्रनिवासं दग्धशरीरकं बहुविधैर्नियमशतै: शोषयन्ती, वन्यैश्च फलमूलवारिभिर्वर्तमाना, त्रिसंध्यमत्र सरसि स्नानमुपस्पृशन्ती शरणार्थिनी प्रतिदिनमर्चयन्ती देवमनाथशरणं त्र्यम्बकम्, अस्यामेव गुहायां तरलिकया सह दीर्घशोकमनुभवन्ती चिरमवसम्। साहमेवंविधा पापकारिणी, निर्लक्षणा, निर्लज्जा, नि:स्नेहा च, नृशंसा च, गर्हणीया, निष्प्रयोजनोत्पन्ना, निष्फलजीविता, निरवलम्बना, नि:सुखा

च। किं मया दृष्टया पृष्टया वा कृतब्राह्मणवधमहापातकया करोति महाभागः'' इत्युक्त्वा पाण्डुना वल्कलोपान्तेन शशिनमिव शरन्मेघशकलेनाच्छाद्य वदनम्, दुर्निवारबाष्पवेगमपारयन्ती निवारयितुम्, उन्मुक्तकण्ठमतिचिरमुच्चैः प्रारोदीत्।

चन्द्रापीडस्तु प्रथममेव तस्या रूपेण, विनयेन, दाक्षिण्येन, मधुरालापतया, निःसङ्गतया च, अतितपस्वितया च, शुचितया च, उपारूढगौरवोऽभूत्। तदानीं तु तेनापरेण दर्शितसद्भावेन स्ववृत्तान्तकथनेन तया च कृतज्ञतया हृतहृदयः सुतरामारोपितप्रीतिरभवत्। आर्द्रीकृतहृदयश्च शनैःशनैरेनामभाषत — 'भगवति, क्लेशभीरुरकृतज्ञः सुखासङ्गलुब्धो लोकः, स्नेहसदृशं कर्मानुष्ठातुमशक्तः, निष्फलेनाश्रुपातमात्रेण स्नेहमुपदर्शयन् रोदिति। त्वया तु कर्मणैव सर्वमाचरन्त्या किमिव न प्रेमोचितमाचेष्टितम्, येन रोदिषि। तदर्थं च जन्मनः प्रभृति समुपचितपरिचयः प्रेयानसंस्तुत इव परित्यक्तो बान्धवजनः। संनिहिता अपि तृणावज्ञयावधीरिता विषयाः। मुक्तान्यतिशयितशुनासीरसमृद्धीन्यैश्वर्यसुखानि। मृणालिनीवातितनीयस्यपि नितरां तनिमानमनुचितैः संक्लेशैरुपनीता तनुः। गृहीतं ब्रह्मचर्यम्। आयोजितस्तपसि महत्यात्मा। वनिताजनदुष्करमप्यङ्गीकृतमरण्यावस्थानम्। अपि चानायासेनैवात्मा दुःखाभिहतैः परित्यज्यते। महीयसा तु यत्नेन गरीयसि क्लेशे निक्षिप्यते केवलम्। यदेतदनुमरणं नाम, तदतिनिष्फलम्। अविद्वज्जनाचरित एष मार्गः। मोहविलसितमेतत्। अज्ञानपद्धतिरियम्। रभसाचरितमिदम्। क्षुद्रदृष्टिरेषा। मौर्ख्यस्खलितमिदम्, यदुपरते पितरि भ्रातरि सुहृदि भर्तरि वा प्राणाः

परित्यज्यन्ते। स्वयं चेन्न जहति, न परित्याज्याः। अत्र हि विचार्यमाणे, स्वार्थ एव प्राणपरित्यागोऽयमसह्यशोकवेदनाप्रतीकारत्वादात्मनः। उपरतस्य तु न कमपि गुणमावहति। न तावत्तस्यायं प्रत्युज्जीवनोपायः। न धर्मोपचयकारणम्। न शुभलोकोपार्जनहेतुः। न निरयपातप्रतीकारः। न दर्शनोपायः। न परस्परसमागमनिमित्तम्। अन्यामेव स्वकर्मफलपरिपाकोपचितामसाववशो नीयते कर्मभूमिम्। असावप्यात्मघातिनः केवलमेनसा संयुज्यते। जीवंस्तु जलाञ्जलिदानादिना बहूपकरोत्युपरतस्यात्मनश्च। मृतस्तु नोभयस्यापि। स्मर तावत्प्रियामेकपत्नीं रतिं भर्तरि मकरकेतौ सकलाबलाजनहृदहारिणि हरनयनहुताशनदग्धेऽप्यविरहितामसुभिः; उत्तरां च विराटदुहितरं बालां बालशशिनीव नयनानन्दहेतौ विनयवति विक्रान्ते च पञ्चत्वमभिमन्यावुपगतेऽपि धृतदेहाम्।

प्रोन्मुच्येतापि जीवितम्, संदिग्धोऽप्यस्य समागमो यदि स्यात्। भगवत्या तु ततः पुनः स्वयमेव समागमसरस्वती समाकर्णिता। अनुभवे च को विकल्पः। कथं च तादृशानामप्रकृताकृतीनां महात्मनामवितथगिरां गरीयसापि कारणेन गिरि वैतथ्यमास्पदं कुर्यात्। उपरतेन च सह जीवन्त्याः कीदृशी समागतिः। अतो निःसंशयमसावुपजातकारुण्यो महात्मा पुनः प्रत्युज्जीवनार्थमेवैनमुत्क्षिप्य सुरलोकं नीतवान्। अचिन्त्यो हि महात्मनां प्रभावः। बहुप्रकाराश्च संसारवृत्तयः। चित्रं च दैवम्। आश्चर्यातिशययुक्ताश्च तपःसिद्धयः। अनेकविधाश्च कर्मणां शक्तयः। अपि च सुनिपुणमपि विमृशद्भिः किमिवान्यत्तदपहरणे कारणमाशङ्क्यते जीवितप्रदानादृते। न चासंभाव्य-

मिदमवगन्तव्यं भगवत्या। चिरप्रवृत्त एष पन्थाः। तथा हि— अर्जुनमश्वमेधतुरगानुसारिणम्, आत्मजेन बभ्रुवाहननाम्ना समरशिरसि शरापहृतप्राणम्, उलूपी नाम नागकन्यका सोच्छ्वासमकरोत्। अभिमन्युतनयं च परीक्षितमश्वत्थामास्त्रपावकपरिप्लुष्टम्, उदरादुपरतमेव निर्गतम्, उत्तराप्रलापोपजनितकृपो भगवान्वासुदेवो दुर्लभानसून्प्रापितवान्। अत्रापि कथंचिदेवमेव भविष्यति। तथापि किं क्रियते। क उपालभ्यते। प्रभवति हि भगवान्विधिः। बलवती च नियतिः। आत्मेच्छया न शक्यमुच्छ्वसितुमपि। अतिपिशुनानि चास्यैकान्तनिष्ठुरस्य दैवहतकस्य विलसितानि न क्षमन्ते दीर्घकालमव्याजरमणीयं प्रेम। प्रायेण च निसर्गत एवानायतस्वभावभङ्गुराणि सुखानि। आयतस्वभावानि च दुःखानि। तथा हि — कथमप्येकस्मिञ्जन्मनि समागमः, जन्मान्तरसहस्राणि च विरहः प्राणिनाम्। अतो नार्हस्यनिन्द्यमात्मानं निन्दितुम्। आपतन्ति हि संसारपथमतिगहनमवतीर्णानामेते वृत्तान्ताः। धीरा हि तरन्त्यापदम्' इत्येवंविधैरन्यैश्च मृदुभिरुपसान्त्वनैः संस्थाप्य ताम्, पुनरपि निर्झरजलेनाञ्जलिपुटोपनीतेन अनिच्छन्तीमपि बलात्प्रक्षालितमुखीमकारयत्।

अत्रान्तरे च श्रुतमहाश्वेतावृत्तान्तोपजातशोक इव समुत्सृष्टदिवसव्यापारो रविरपि भगवानधोमुखतामयासीत्। अथ क्षीणे दिवसे, महाश्वेता मन्दं मन्दमुत्थाय, भगवतीमुपास्य पश्चिमां संध्याम्, कमण्डलुजलेन प्रक्षालितचरणा, वल्कलशयनीये सखेदमुष्णं च निःश्वस्य निषसाद। चन्द्रापीडोऽप्युत्थाय कृतसंध्याप्रणामः, तस्मिन्द्वितीये शिलातले मृदुभिर्लतापल्लवैः शय्यामकल्पयत्। उपविष्टश्च तस्याम्,

पुनःपुनस्तमेव मनसा महाश्वेतावृत्तान्तमन्वभावयत् । पुनः पप्रच्छ चैनाम् — 'भगवति, सा तव परिचारिका वनवासव्यसनमित्रं दुःखसब्रह्मचारिणी तरलिका क्व गता' इति ।

अथ साकथयत् — "महाभाग, यत्तन्मया कथितममृतसंभवमप्सरसां कुलम्, तस्मान्मदिरेति नाम्ना मदिरायतेक्षणा कन्यकाभूत् । तस्याश्चासौ देवश्चित्ररथः पाणिमग्रहीत् । तयोश्च दुहितृरत्नमुदपादि कादम्बरीति नाम्ना । सा च मे जन्मनः प्रभृति एकासनशयनपानाशना परं प्रेमस्थानमखिलविस्रम्भधाम द्वितीयमिव हृदयं बालमित्रम् । एकत्र तया मया च नृत्यगीतादिकलासु कृताः परिचयाः । शिशुजनोचिताभिश्च क्रीडाभिरनियन्त्रणनिर्भरमपनीतो बालभावः । सा चामुनैव मदीयेन हतवृत्तान्तेन समुपजातशोका निश्चयमकार्षीत् — 'नाहं कथंचिदपि सशोकायां महाश्वेतायाम्, आत्मनः पाणिं ग्राहयिष्यामि' इति । सखीजनस्य पुरतः सशपथमभिहितवती च — 'यदि कथमपि मामनिच्छन्तीमपि बलात्तातः कदाचित्कस्मैचिद्दातुमिच्छति, तदाहमनशनेन वा हुताशनेन वा रज्ज्वा वा विषेण वा नियतमात्मानमुत्स्रक्ष्यामि' इति । सर्वं च तदात्मदुहितुर्निश्चलभाषितं कर्णपरंपरया गन्धर्वराजश्चित्ररथः स्वयमशृणोत् । गच्छति काले, समुपारूढनिर्भरयौवनामालोक्य स ताम्, बलवदुपतापपरवशः क्षणमपि न धृतिमलभत । एकापत्यतया च अतिप्रियतया च न शक्तः किंचिदपि तामभिधातुम्, अपश्यंश्चान्यदुपायान्तरम्, 'इदमत्र प्राप्तकालम्' इति मत्वा, तया महादेव्या मदिरया सहावधार्य, क्षीरोदनामानं कञ्चुकिनम् 'वत्से महाश्वेत, त्वद्व्यतिरेकेणैव दग्धहृदयानामिदमपरमस्माकमुपस्थि-

तम्। इदानीं तु कादम्बरीमनुनेतुं त्वं शरणम्' इति संदिश्य मत्समीपमद्यैव प्रत्युषसि प्रेषितवान्। ततो मया गुरुवचनगौरवेण सखीप्रेम्णा च क्षीरोदेन सार्धं सा तरलिका 'सखि कादम्बरि, किं दुःखितमपि जनमतितरां दुःखयसि। जीवन्तीमिच्छसि चेन्माम्, तत्कुरु गुरुवचनमवितथम्' इति संदिश्य विसर्जिता। नातिचिरं गतायां च तस्याम्, अनन्तरमेवेमां भूमिमनुप्राप्तो महाभागः" इत्यभिधाय तूष्णीमभवत्।

अत्रान्तरे लाञ्छनच्छलेन विडम्बयन्निव शोकानलदग्धमध्यं महाश्वेताहृदयम्, उद्वहन्निव कुमारवधमहापातकम्, उदगात्तारकाराजः। क्रमेण चोद्गते शशाङ्कमण्डले, चन्द्रापीडः सुप्तामालोक्य महाश्वेताम्, पल्लवशयने शनैः शनैः समुपाविशत्। 'अस्यां वेलायां किं नु खलु मामन्तरेण चिन्तयति वैशम्पायनः, किं वा वराकी पत्रलेखा, किं वा राजपुत्रलोकः' इति चिन्तयन्नेव निद्रां ययौ।

अथ क्षीणायां क्षपायाम्, उषसि संध्यामुपास्य शिलातलोपविष्टायां पवित्राण्यघमर्षणानि जपन्त्यां महाश्वेतायाम्, निर्वर्तितप्राभातिकविधौ चन्द्रापीडे, तरलिका षोडशवर्षवयसा सावष्टम्भाकृतिना गन्धर्वदारकेण केयूरकनाम्नानुगम्यमाना प्रत्युपस्येव प्रादुरासीत्। आगत्य च 'कोऽयम्' इत्युपजातकुतूहला चन्द्रापीडं सुचिरमालोक्य, महाश्वेतायाः समीपमुपसृत्य, कृतप्रणामा सविनयमुपाविशत्। अनन्तरं चातिदूरानतेनोत्तमाङ्गेन प्रणम्य, केयूरकोऽपि महाश्वेतादृष्टिनिसृष्टं नातिसमीपवर्ति शिलातलं भेजे। समुपविष्टश्च तत्र तमदृष्टपूर्वं रूपातिशयं चन्द्रपीडस्य दृष्ट्वा विस्मयमापेदे।

परिसमाप्तजपा तु महाश्वेता पप्रच्छ तरलिकाम् — 'किं त्वया

दृष्टा प्रियसखी कादम्बरी कुशलिनी। करिष्यति वा तदस्मद्वचनम्' इति। अथ सा तरलिका विनयावनतमौलिः, ईषदालम्बितकर्णपाशम्, अतिमधुरया गिरा व्यजिज्ञपत्—'भर्तृदारिके, दृष्टा खलु मया भर्तृदारिका कादम्बरी। सर्वतः कुशलिनी। विज्ञापिता च निखिलं भर्तृदुहितुः संदेशम्। आकर्ण्य च यत्तया संततमुक्तस्थूलाश्रुबिन्दुवर्षं रुदित्वा प्रतिसंदिष्टम्, तदेष तयैव विसर्जितः, तस्या एव वीणावाहकः केयूरकः कथयिष्यति' इत्युक्त्वा विरराम। विरतवचसि तस्यां केयूरकोऽब्रवीत्—'भर्तृदारिके महाश्वेते, देवी कादम्बरी दृढदत्तकण्ठग्रहा त्वा विज्ञापयति—यदियमागत्य मामवदत्तरलिका, तत्कथय, किमयं गुरुजनवचनानुरोधः, किमिदं मच्चित्तपरीक्षणम्, किं गृहनिवासापराधनिपुणोपालम्भः, किं प्रेमविच्छेदाभिलाषः, किं भक्तजनपरित्यागोपायः, किं वा प्रकोपः। जानास्येव मे सहजप्रेमनिस्यन्दनिर्भरं हृदयम्। एवमतिनिष्ठुरं संदिशन्ती कथमसि न लज्जिता। तथा मधुरभाषिणी केनासि शिक्षिता वक्तुमप्रियम्। स्वस्थोऽपि तावत्क इव सहृदयः कनीयस्यवसानविरसे कर्मणीदृशे मतिमुपसर्पयेत्। किमुतातिदुःखाभिहतहृदयोऽस्मद्विधो जनः। सुहृद्दुःखखेदिते हि मनसि कैव सुखाशा, कैव निर्वृतिः, कीदृशा भोगाः, कानि वा हसितानि। येनेदृशीं दशामुपनीता प्रियसखी, कथमतिदारुणं तमहं विषमिवाप्रियकारिणं कामं सकामं कुर्याम्। दिवसकरास्तमयविधुरासु नलिनीषु सहवासपरिचयाच्चक्रवाकयुवतिरपि पतिसमागमसुखानि परित्यजति। किमुत नार्यः। अपि च, यत्र भर्तृविरहविधुरा परिहृतपरपुरुषदर्शना दिवानिशं निवसति प्रियसखी, कथमिव तन्मम हृदयमपरः प्रविशेज्जनः। यत्र च

भर्तृविरहविधुरा तीव्रव्रतकर्शिताङ्गी प्रियसखी महत्कृच्छ्रमनुभवति, तत्राहमवगणय्यैतत्, कथमात्मसुखार्थिनी पाणिं ग्राहयिष्यामि। कथं वा मम सुखं भविष्यति। त्वत्प्रेम्णा चास्मिन्वस्तुनि मया कुमारिकाजनविरुद्धं स्वातन्त्र्यमालम्ब्य, अङ्गीकृतमयशः, समवधीरितो विनयः, गुरुवचनमतिक्रान्तम्, न गणितो लोकापवादः, वनिताजनस्य सहजमाभरणमुत्सृष्टा लज्जा। सा, कथय, कथमिव पुनरत्र प्रवर्तते। तदयमञ्जलिरुपरचितः, प्रणामोऽयम्, इदं च पादग्रहणम्। अनुगृहाण माम्, वनमितो गतासि मे जीवितेन सह। मा कृथाः स्वप्नेऽपि पुनरिममर्थं मनसि' इत्यभिधाय तूष्णीमभूत्।

महाश्वेता तु तच्छ्रुत्वा, सुचिरं विचार्य, 'गच्छ, स्वयमेवाहमागत्य यथार्हमाचरिष्यामि' इत्युक्त्वा केयूरकं प्राहिणोत्। गते च केयूरके, चन्द्रापीडमुवाच—'राजपुत्र, रमणीयो हेमकूटः। चित्रा च चित्ररथराजधानी। बहुकुतूहलः किंपुरुषविषयः। पेशलो गन्धर्वलोकः। सरलहृदया महानुभावा च कादम्बरी। यदि नातिखेदकरमिव गमनं कलयसि, नावसीदति वा गुरु प्रयोजनम्, अदृष्टचरविषयकुतूहलि वा चेतः, मद्वचनमनुरुध्यते वा भवान्, ततो नार्हसि निष्फलां कर्तुमभ्यर्थनामिमाम्। इतो मयैव सह गत्वा हेमकूटमतिरमणीयतानिधानम्, तत्र दृष्ट्वा च मन्निर्विशेषां कादम्बरीम्, अपनीय तस्याः कुमतिमनोमोहविलसितम्, एकमहो विश्रम्य, श्वोभूते प्रत्यागमिष्यसि। मम हि निष्कारणबान्धवं भवन्तमालोक्यैव दुःखान्धकारभाराक्रान्तेन महतः कालादुच्छ्वसितमिव चेतसा। श्रावयित्वा स्ववृत्तान्तमिमं सह्यतामिव गतः शोकः। दुःखितमपि जनं रमयन्ति सज्जन-

समागमाः। परसुखोपपादनपराधीनश्च भवादृशां गुणोदयः' इत्युक्तवतीं च चन्द्रापीडः 'भगवति, दर्शनात्प्रभृति परवानयं जनः। कर्तव्येषु यथेष्टमशङ्किततया नियुज्यताम्' इत्यभिधाय तया सहैवोदचलत्।

क्रमेण च गत्वा हेमकूटम्, आसाद्य गन्धर्वराजकुलम्, समतीत्य काञ्चनतोरणानि सप्त कक्षान्तराणि, कन्यान्तःपुरद्वारमवाप। महाश्वेतादर्शनप्रधावितेन दूरादेव कृतप्रणामेन कनकवेत्रलताहस्तेन प्रतीहारजनेनोपदिश्यमानमार्गः प्रविश्य, असंख्येयनारीशतसहस्रसंबाधम्, इयत्तां ग्रहीतुमेकत्र त्रैलोक्यस्त्रैणमिव संहृतम्, अपुरुषमिव सर्गान्तरम्, अनेककल्पकल्पनार्थमुत्पाद्यस्थापितमिवाङ्गनाकोशम्, शृङ्गारमयमिव सौन्दर्यमयमिव कुतूहलमयमिव कुमारः कुमारीपुराभ्यन्तरं ददर्श।

यत्र च कन्यकाजनस्य लोचनान्येव कर्णोत्पलानि, निःश्वासा एवाधिवासगन्धयुक्तयः, आलापा एव तन्त्रीनिनादाः, करतलान्येव लीलाकमलानि, निजदेहप्रभैवांशुकावगुण्ठनम्, कोमलाङ्गुलिराग एव चरणालक्तकरसः। यत्र चालक्तकरसोऽपि चरणातिभारः, अवतंसकुसुमधारणमपि श्रमः, सखीदर्शनेष्वकृतहस्तावलम्बनमुत्थानम् अतिसाहसम्, कुसुमावचयेषु द्वितीयकुसुमग्रहणमप्ययुवतिजनोचितम्, कन्यकाविज्ञानेषु माल्यग्रथनम् असुकुमारजनव्यापारः।

तस्य चैवंविधस्य किंचिदभ्यन्तरमतिक्रम्य, इतश्चेतश्च परिभ्रमतः कादम्बरीप्रत्यासन्नस्य परिजनस्य तांस्तानतिमनोहरानालापान् शृण्वन्नेव, कादम्बरीभवनसमीपमुपययौ।

पुलिनायमानमुपवनलतागलितकुसुमरेणुपटलैः, काञ्चनद्वीपायमानं चम्पकदलोपहारैः, सेवार्थमागतेनोभयत ऊर्ध्वस्थितेन स्त्रीज-

नेन प्राकारेणेव लावण्यमयेन कृतदीर्घरथ्यामुखाकारं मार्गमद्राक्षीत्। तेन चान्तर्निपतितमाभरणकिरणालोकं संपिण्डितं नदीवेणिकाजलप्रवाहमिव वहन्तमपश्यत्। तन्मध्ये च प्रतिस्रोत इव गत्वा प्रतिहारीमण्डलाधिष्ठितपुरोभागं श्रीमण्डपं ददर्श।

तत्र च मध्यभागे, पर्यन्तरचितमण्डलोपविष्टेन चानेकसहस्रसंख्येन परिस्फुरदाभरणसमूहेन कल्पलतानिवहेनेव कन्यकाजनेन परिवृताम्, नीलांशुकप्रच्छदपटप्रावृतस्य नातिमहतः पर्यङ्कस्योपाश्रये धवलोपधानन्यस्तद्विगुणभुजलतावष्टम्भेनावस्थिताम्, निपतितप्रतिबिम्बतयाधस्तान्मणिकुट्टिमेषु नागैरिवापह्रियमाणाम्, उपान्ते च रत्नभित्तिषु दिक्पालैरिव नीयमानाम्, उपरि मणिमण्डपेष्वमरैरिवोत्क्षिप्यमाणाम्, अकृतपुण्यमिव मुञ्चन्तीं बालभावम्, पादाभरणरत्नांशुलेखासंदेहदायिनीभिरतिकोमलतया नखविवरेण वमन्तीभिरिव रुधिरधारावर्षमङ्गुलिभिरुपेताभ्यां विद्रुमरसनदीमिव चरणाभ्यां प्रवर्तयन्तीम्, प्रजापतिकरदृढनिष्पीडितमध्यभागगलितं जघनशिलातलप्रतिघाताल्लावण्यजलस्रोत इव द्विधागतमूरुद्वयं दधानाम्, सर्वतः प्रसारितदीर्घमयूखमण्डलेनेर्ष्यया परपुरुषदर्शनमिव निरुन्धता काञ्चीदाम्ना ,नितम्बबिम्बस्य विरचितपरिवेषाम्, प्रजापतेः स्पृशतः सौकुमार्यादङ्गुलिमुद्रामिव निमग्नां नाभिमण्डलीमावर्तिनीमुद्वहन्तीम्, नखकिरणविसरवर्षिणा च माणिक्यवलयगौरवश्रमवशात्स्वेदजलधाराजालकमिव मुञ्चता करयुगलेन समुद्भासिताम्, अभिनवयौवनपवनक्षोभितस्य रागसागरस्य तरङ्गाभ्यामिवोद्गताभ्यां विद्रुमलतालोहिताभ्यामधराभ्यां रक्तावदातस्वच्छकान्तिना च मदिरारसपूर्णमाणिक्यशुक्तिसंपुटच्छविना कपोलयुगलेन

रतिपरिवादिनीरत्नकोणचारुणा च नासावंशेन गतिप्रसरनिरोधिश्रवणकोपादिव किंचिदारक्तापाङ्गेन लोचनयुगलेन च विराजमानाम्, उन्मदयौवनकुञ्जरमदराजिभ्यां भ्रूलताभ्यां मनःशिलापङ्कलिखितेन च वदनलग्नेन तिलकबिन्दुना विद्योतितललाटपट्टाम्, उत्कृष्टहेमतालीपट्टाभरणमयं कर्णपाशं दोलायमानमरकतमाणिक्यकुण्डलं दधतीम्, पाटलीकृतललाटेन सीमन्तचुम्बिनश्चूडामणेः क्षरतांशुजालेन प्रक्षाल्यमानदीर्घकेशकलापाम्, रजनिजागरखिन्नस्य परिचितचक्रवाकमिथुनस्य स्वप्तुं क्रीडानदिकासु कमलधूलिवालुकाभिर्बालपुलिनानि कारयन्तीम्, आत्मसंवर्धितलताप्रथमकुसुमनिर्गमनिवेदनागतामुद्यानपालीमशेषाभरणदानेन संमानयन्तीम्, उपनीतविविधवनकुसुमफलपूर्णपत्रपुटामविज्ञायमानालापतया हासहेतुं पुनःपुनः क्रीडापर्वतपत्रशबरीमालापयन्तीम्, गौरीमिव श्वेतांशुकरचितोत्तमाङ्गाभरणाम्, दिनमुखलक्ष्मीमिव भास्वन्मुक्तांशुभिन्नपद्मरागप्रमाधनाम्, कल्पतरुलतामिव कामफलप्रदाम्, पुरः समीपे संमुखोपविष्टम् 'कोऽसौ? कस्य वापत्यम्? किमभिधानो वा? कीदृशमस्य रूपम्? कियद्वा वयः? किमभिधत्ते? भवता किमभिहितः? कियच्चिरं दृष्टस्त्वया? कथं चास्य महाश्वेतया सह परिचय उपजातः? किमयमत्रागमिष्यति?' इति मुहुर्मुहुश्चन्द्रापीडसंबद्धालापं तद्रूपवर्णनामुखरं केयूरकं पृच्छन्तीं कादम्बरीं ददर्श ।

तस्य तु दृष्टकादम्बरीवदनचन्द्रलेखालक्ष्मीकस्य सागरस्येवामृतमुल्ललास हृदयम्। आसीच्चास्य मनसि—'शेषेन्द्रियाण्यपि मे वेधसा किमिति लोचनमयान्येव न कृतानि । किं वानेन कृतमवदातं कर्म चक्षुषा, यदनिवारितमेनां पश्यति। अहो चित्रमेतदुत्पादितं वेधसा

सर्वरमणीयानामेकं धाम । कुत एते रूपातिशयपरमाणवः समासादिताः । तन्नूनमेनामुत्पादयतो विधेः करतलपरामर्शक्लेशेन ये विगलिता लोचनयुगलादश्रुबिन्दवः, तेभ्य एतानि जगति कुमुदकमलकुवलयसौगन्धिकवनान्युत्पन्नानि' इत्येवं चिन्तयत एवास्य तस्या नयनयुगले निपपात चक्षुः । तदा तस्या अपि 'नूनमयं स केयूरकेणावेदितः' इति चिन्तयन्त्या रूपातिशयविलोकनविस्मयस्मेरं निश्चलनिबद्धलक्षं चक्षुस्तस्मिन्सुचिरं पपात । दृष्ट्वा च प्रथमं रोमोद्गमः, ततो भूषणरवः, तदनु कादम्बरी समुत्तस्थौ । अथ तस्याः कुसुमायुध एव स्वेदमजनयत्; ससंभ्रमोत्थानश्रमो व्यपदेशोऽभवत् । ऊरुकम्प एव गतिं रुरोध; नूपुररवाकृष्टहंसमण्डलमपयशो लेभे । निश्वासप्रवृत्तिरेवांशुकं चलं चकार; चामरानिलो निमित्ततां ययौ । आनन्द एवाश्रुजलमपातयत्; चलितकर्णावतंसकुसुमरजो व्याज आसीत् । लज्जैव वक्तुं न ददौ; मुखकमलपरिमलागतालिबृन्दं द्वारतामगात् ।

कादम्बरी तु कृच्छ्रादिव दत्तकतिपयपदा महाश्वेतां स्नेहनिर्भरं चिरदर्शनजातोत्कण्ठां सोत्कण्ठं कण्ठे जग्राह । महाश्वेतापि दृढतरदत्तकण्ठग्रहा तामवादीत् — 'सखि कादम्बरि, भारते वर्षे राजा रक्षितप्रजापीडस्तारापीडो नाम । तस्यायं निजभुजशिलास्तम्भविश्रान्तविश्वविश्वंभरापीडश्चन्द्रापीडो नाम सूनुर्दिग्विजयप्रसङ्गेनानुगतो भूमिमिमाम् । एष च दर्शनात्प्रभृति प्रकृत्या मे निष्कारणबन्धुतां गतः । परित्यक्तसकलसङ्गनिष्ठुरामपि मे सविशेषैः स्वभावसरलैर्गुणैराकृष्य चित्तवृत्तिं वर्तते । दुर्लभो हि दाक्षिण्यपरवशो निर्निमित्तमित्रमकृ-

त्रिमहृदयो विदग्धजनः। यतो दृष्ट्वेममहमिव त्वमपि निर्माणकौशलं प्रजापतेः, निःसपत्नतां च रूपस्य, स्थानाभिनिवेशित्वं च लक्ष्म्याः, सद्वृत्ततासुखं च पृथिव्याः, सुरलोकातिरिक्ततां च मर्त्यलोकस्य, सफलतां च मानुषीलोचनानाम्, एकस्थानसमागमं च सर्वकलानां ज्ञास्यसीति बलादानीतोऽयम्। कथिता चास्य मया बहुप्रकारं प्रियसखी। तदपूर्वदर्शनोऽयमिति विमुच्य लज्जाम्, अनुपजातपरिचय इत्युत्सृज्याविस्रम्भताम्, अविज्ञातशील इत्यपहाय शङ्काम्, यथा मयि, तथात्रापि वर्तितव्यम्। एष ते मित्रं च, बान्धवश्च, परिजनश्च' इत्यावेदिते तया, चन्द्रापीडः प्रणाममकरोत्।

कादम्बरी तु सविभ्रमकृतप्रणामा महाश्वेतया सह पर्यङ्के निषसाद। ससंभ्रमं परिजनोपनीतायां च हेमपादाङ्कितायां पीठिकायां चन्द्रापीडः समुपाविशत्। महाश्वेतानुरोधेन च विदितकादम्बरीचित्ताभिप्रायाः संवृतमुखैन्यस्तहस्तदत्तशब्दनिवारणसंज्ञाः प्रतिहार्यः, वेणुरवान्वीणाघोषान्गीतध्वनीन्मागधीजयशब्दांश्च सर्वतो निवारयांचक्रुः। त्वरितपरिजनोपनीतेन च सलिलेन कादम्बरी स्वयमुत्थाय महाश्वेतायाश्चरणौ प्रक्षाल्य, उत्तरीयांशुकेनापमृज्य, पुनः पर्यङ्कमारुरोह। चन्द्रापीडस्यापि कादम्बर्याः सखी रूपानुरूपा जीवितनिर्विशेषा सर्वविस्रम्भभूमिर्मदलेखेति नाम्ना बलादनिच्छतोऽपि प्रक्षालितवती चरणौ। महाश्वेता तु कर्णाभरणप्रभावर्षिण्यंसदेशे सप्रेम पणिना स्पृशन्ती, चामरपवनविधुतिपर्यस्तां चालकवल्लरीमनुव्रजमाना कादम्बरीमनामयं पप्रच्छ। सा तु सखीप्रेम्णा गृहनिवासेन कृतापराधेवानामयेनैव लज्जमाना कृच्छ्रादिव कुशलमाचचक्षे। मुहूर्तापगमे च

ताम्बूलदानोद्यतां महाश्वेता तामभाषत—सखि कादम्बरि, संप्रतिपन्नमेव सर्वाभिरस्माभिरयमभिनवागतश्चन्द्रापीड आराधनीयः। तदस्मै तावद्दीयताम्' इत्युक्ता च किंचिद्विवर्तितावनमितमुखी शनैरव्यक्तमिव 'प्रियसखि, लज्जेऽहमनुपजातपरिचया प्रागल्भ्येनानेन। गृहाण, त्वमेवास्मै प्रयच्छ' इत्युवाच सा ताम्। पुनः पुनरभिधीयमाना च तया कथमपि ग्राम्येव चिराद्दानाभिमुखं मनश्चक्रे। महाश्वेतामुखादनाकृष्टदृष्टिरेव साध्वसपरवशा पतामीति लगितुमिव कृतप्रयत्ना प्रसारयामास ताम्बूलगर्भं हस्तपल्लवम्। चन्द्रापीडस्तु जयकुञ्जरकुम्भस्थलास्फालनसंक्रान्तसिन्दूरमिव स्वभावपाटलं प्रसारितवान्पाणिम्। तत्र च सा तेनानिबद्धलक्षशून्यप्रसारितेन हस्तेन स्वेदसलिलपातपूर्वकम् 'गृह्यतामयं मन्मथेन दत्तो दासजनः' इत्यात्मानमिव प्रतिग्राहयन्ती ताम्बूलमदात्। गृहीत्वा चापरं ताम्बूलं महाश्वेतायै प्रायच्छत्।

अथ सहसैव त्वरितगतिः, त्रिवर्णरागमिन्द्रायुधमिव कुण्डलीकृतं कण्ठेन वहता मन्थरगतेन शुकेनानुबध्यमाना, शारिका सक्रोधमवादीत् — 'भर्तृदारिके कादम्बरि, कस्मान्न निवारयस्येनमलीकसुभगाभिमानिनमतिदुर्विनीतं मामनुबध्नन्तं विहंगापशदम्। यदि मामनेन परिभूयमानामुपेक्षसे, ततोऽहं नियतमात्मानमुत्सृजामि। सत्यं शपामि ते पादपङ्कजस्पर्शेन' इत्येवमभिहिता तया कादम्बरी स्मितमकरोत्। अविदितवृत्तान्ता तु महाश्वेता 'किमियं वदति' इति मदलेखां पप्रच्छ। सा चाकथयत्—'एषा भर्तृदुहितुः सखी कादम्बर्याः कालिन्दीति नाम्ना शारिका। इयमस्य च परिहासनाम्नः शुक-

स्य भर्तृदारिकयैव पाणिग्रहणपूर्वकं जायापदं ग्राहिता। अद्य चाय-मनया प्रत्युषसि कादम्बर्यास्ताम्बूलकरङ्कवाहिनीमिमां तमालिकामेका-किनीं किमपि पाठयन्दृष्टो यतः, ततः प्रभृति, संजातेर्ष्या कोपप-राङ्मुखी नैनमुपसर्पति, नालपति, न स्पृशति, न विलोकयति, सर्वा-भिरस्माभिः प्रसाद्यमानापि न प्रसीदति' इति। एतदाकर्ण्य, स्फुट-स्फुरितकपोलोदरश्चन्द्रापीडो मन्दं मन्दं विहस्याब्रवीत् — 'अस्त्येषा कथा, श्रूयत एवैतद्राजकुले कर्णपरंपरया, परिजनोऽप्येवमामन्त्रयते, बहिरपि जनाः कथयन्त्येवम्, दिगन्तरेष्वप्ययमालापो वर्तत एव, अस्माभिरप्येतदाकर्णितमेव; यथा किल देव्याः कादम्बर्यास्ताम्बूल-वाहिनीं तमालिकां कामयमानः परिहासनामा शुको मदनपरवशो गतान्यपि दिनानि न वेत्तीति। तदयमास्तां तावद्ग्रामाचारः परित्यक्त-निजकलत्रो निस्त्रपोऽनया सह। देव्यास्तु कादम्बर्याः कथमेतद्युक्तम्— यन्न निवारयतीमां चपलां दुष्टदासीम्। अथवा देव्यापि कथितैव निःस्नेहता प्रथममेव वराकीमिमां कलिन्दीमीदृशाय दुर्विनीताय विहं-गाय प्रयच्छन्त्या। किमिदानीमियं करोतु? यदेतत्सापत्न्यकरणं नारीणां प्रधानं कोपकारणम्, अग्रणीर्विरागहेतुः, परं परिभवस्थानम्। इयमेव केवलमतिधीरा, यदनयानेन दौर्भाग्यगरिम्णा जातवैराग्यया विषं वा नास्वादितम्, अनलो वा नासादितः, अनशनं वा नाङ्गी-कृतम्। न ह्येवंविधमपरमस्ति योषितां लघिम्नः कारणम्। यदि चेयमीदृशेऽप्यपराधेऽनुनीयमानानेन प्रत्यासत्तिमेष्यति, तदा धिगिमाम्। अलमनया, दूरतो वर्जनीयेयमभिभवनिरस्या। क एनां पुनरालाप-यिष्यति, को वावलोकयिष्यति, को वास्या नाम गृहीष्यति' इत्येव-

मभिहितवति तस्मिन्, सर्वास्ताः सह कादम्बर्या क्रीडालापभाविता जहसुरङ्गनाः ।

परिहासस्तु तस्य नर्मभाषितमाकर्ण्य जगाद — 'धूर्त राजपुत्र, निपुणेयम्। न त्वयान्येन वा लोलापि प्रतारयितुं शक्यते। एषापि बुध्यत एवैतावतीर्वक्रोक्तीः। इयमपि जानात्येव परिहासजल्पितानि। अस्या अपि राजकुलसंपर्कचतुरा मतिः। विरम्यताम्। अभूमिरेषा भुजंगभङ्गिभाषितानाम्। इयमेव हि वेत्ति मञ्जुभाषिणी कालं च कारणं च प्रमाणं च विषयं च प्रस्तावं च कोपप्रसादयोः' इति ।

अत्रान्तरे चागत्य कञ्चुकी महाश्वेतामवोचत् — 'आयुष्मति, देवश्चित्ररथो देवी च मदिरा त्वां द्रष्टुमाह्वयतः' इत्येवमभिहिता च गन्तुकामा 'सखि, चन्द्रापीडः क्वास्ताम्' इति कादम्बरीमपृच्छत्। असौ तु 'ननु पर्याप्तमेवानेकस्त्रीहृदयसहस्रावस्थानमनेन' इति मनसा विहस्य प्रकाशमवदत् — 'सखि महाश्वेते, किं त्वमेवमभिदधासि। दर्शनादारभ्य शरीरस्याप्ययमेव प्रभुः, किमुत भवनस्य, विभवस्य, परिजनस्य वा। यत्रास्मै रोचते, प्रियसखीहृदयाय वा, तत्रायमास्ताम्' इति। तच्छ्रुत्वा महाश्वेता 'तदत्रैव त्वत्प्रासादसमीपवर्तिनि प्रमदवने क्रीडापर्वतकमणिवेश्मन्यास्ताम्' इत्यभिधाय, गन्धर्वराजं द्रष्टुं ययौ ।

चन्द्रापीडोऽपि तयैव सह निर्गत्य, विनोदार्थं वीणावादिनीभिश्च वेणुवाद्यनिपुणाभिश्च सुभाषितपाठिकाभिश्च कादम्बरीसमादिष्टप्रतीहारीप्रेषिताभिः कन्याभिरनुगम्यमानः, पूर्वदृष्टेन केयूरकेणोपदिश्यमानमार्गः,

क्रीडापर्वतमणिमन्दिरमगात्। गते च तस्मिन्गन्धर्वराजपुत्री विसर्ज्य सकलं सखीजनं परिजनं च, परिमितपरिचारिकाभिरनुगम्यमाना, प्रासादमारुरोह। तत्र च शयनीये निपत्य दूरस्थिताभिर्विनयनिभृताभिः परिचारिकाभिर्विनोद्यमाना कुतोऽपि प्रत्यागतचेतना चैकाकिनी तस्मिन्काले 'चपले, किमिदमारब्धम्' इति निगृहीतेव लज्जया, 'गन्धर्वराजपुत्रि, कथमेतद्युक्तम्' इत्युपालब्धेव विनयेन, 'भीरु, नायं कुलकन्यकानां क्रमः' इति गर्हितेव महत्त्वेन, 'दुर्विनीते, रक्षाविनयम्' इति तर्जितेवाचारेण, 'मूढे मदनेन लघुतां नीतासि' इत्यनुशासितेवाभिजात्येन, 'कुतस्तवेयं तरलहृदयता' इति धिक्कृतेव धैर्येण, 'स्वच्छन्दचारिणि, अप्रमाणीकृताहं त्वया' इति निन्दितेव कुलस्थित्या, अतिगुर्वी लज्जामुवाह।

समचिन्तयच्चैवम्—'अगणितसर्वशङ्कया तरलहृदयतां दर्शयन्त्याद्य मया किं कृतमिदं मोहान्धया हताशया। तथा हि— 'अदृष्टपूर्वोऽयम्' इति साहसिकया मया न शङ्कितम्। 'लघुहृदयां मां लोकः कलयिष्यति' इति निर्ह्रीकया नाकलितम्। 'कास्य चित्तवृत्तिः' इति मूढया न परीक्षितम्। 'दर्शनानुकूलाहमस्य न वा' इति तरलया न कृतो विचारक्रमः। प्रत्याख्यानवैलक्ष्यान्न भीतम्। गुरुजनान्न त्रस्तम्। लोकापवादान्नोद्विग्नम्। तथा च 'महाश्वेता दुःखिता' इति निर्दाक्षिण्यया नापेक्षितम्। 'आसन्नवर्ती सखीजनोऽप्युपलक्षयति' इति मन्दया न लक्षितम्। 'पार्श्वस्थितः परिजनः पश्यति' इति नष्टचेतनया न दृष्टम्। स्थूलबुद्धयोऽपि तादृशीं विनयच्युतिं विभावयेयुः, किमुतानुभूतमदनवृत्तान्ता महाश्वेता, सकलकलाकुशलाः

सख्यो वा, राजकुलसंचारचतुरो वा नित्यमिङ्गितज्ञः परिजनः। ईदृशोऽत्यतिनिपुणतरदृष्टयोऽन्तःपुरदास्यः। सर्वथा हतास्मि मन्दपुण्या। मरणं मेऽद्य श्रेयः, न लज्जाकरं जीवितम्। श्रुत्वैतं वृत्तान्तं किं वक्ष्यत्यम्बा तातो वा गन्धर्वलोको वा। किं करोमि। कोऽत्र प्रतीकारः। केनोपायेन स्खलितमिदं प्रच्छादयामि। कस्य वा चापलमिदमेतेषां दुर्विनीतानामिन्द्रियाणां कथयामि। क्व वानेन दग्धहृदयेन गृहीता गच्छामि। तथा महाश्वेताव्यतिकरेण प्रतिज्ञा कृता। तथा प्रियसखीनां पुरो मन्त्रितम्। तथा च केयूरकस्य हस्ते संदिष्टम्। न खलु जानामि मन्दभागिनी—शठविधिना वा पूर्वकृतापुण्यसंचयेन वा मृत्युहतकेन वान्येन वा केनाप्ययमानीतो मम विप्रलम्भकश्चन्द्रापीडः। कोऽपि वा, न कदाचिद्दृष्टो नानुभूतो न च श्रुतो न चिन्तितो नोत्प्रेक्षितो मां विडम्बयितुमुपागतः; यस्य दर्शनमात्रेणैव संयम्य दत्तेवेन्द्रियैः, गृहीतगुणपणेन विक्रीतेव हृदयेनोपकरणीभूतास्मि। न मे कार्यं तेन चपलेन' इति क्षणमिव संकल्पमकरोत्। कृतसंकल्पा तत्परित्यागसंकल्पसमकालप्रस्थितेन कण्ठलग्नेन पृष्टेव जीवितेन, 'अविशेषज्ञे, पुनरपि प्रक्षालितलोचनया दृश्यतामसौ जनः प्रत्याख्यानयोग्यो न वा' इति तत्कालागतेनाभिहितेव बाष्पेण, पुनरपि तथैव चन्द्रापीडाभिमुखहृदया बभूव। तदेवमस्तमितप्रतिसमाधानबला जालवातायनेन तमेव क्रीडापर्वतमवलोकयन्त्यतिष्ठत्। तत्रस्था च सा तमानन्दजलव्यवधानोद्विग्नेव स्मृत्या ददर्श, न चक्षुषा। अङ्गुलीगलितस्वेदपरामर्शभीतेव चिन्तया लिलेख, न चित्रतूलिकया। तत्संगमकालातिपातासहेव मनो गमनाय नियुक्तवती, न परिजनम्।

चन्द्रापीडोऽपि प्रविश्य मणिगृहम्, शिलातलास्तीर्णायाम् उभयत उपर्युपरिनिवेशितबहूपधानायां कुथायां निपत्य केयूरकेणोत्सङ्गे गृहीतचरणयुगलः, ताभिर्यथादिष्टेषु भूमिभागेषूपविष्टाभिः कन्यकाभिः परिवृतः, दोलायमानेन चेतसा चिन्तां विवेश—'किं तावदस्या गन्धर्वराजदुहितुः कादम्बर्याः सहभुव एते विलासा एवंदृशाः सकललोकहृदयहारिणः। आहोस्विदनाराधितप्रसन्नेन भगवता मकरकेतुना मयि नियुक्ताः। येन मां सास्रेण सरागेण कूणितत्रिभागेण चक्षुषा तिर्यग्विलोकयति। मद्विलोकिता च धवलेन स्मितालोकेन दुकूलेनेव लज्जयात्मानमावृणोति। पुनश्चाचिन्तयत् — 'प्रायेण मानुष्यकसुलभा लघुता मिथ्यासंकल्पसहस्रैरेवं मां विप्रलभते। लुप्तविवेको यौवनमदो मदयति मदनो वा। यतस्तिमिरोपहतेव यूनां दृष्टिरल्पमपि कालुष्यं महत्पश्यति। स्नेहलवोऽपि वारिणेव यौवनमदेन दूरं विस्तार्यते। स्वयमुत्पादितानेकचिन्ताशताकुला कविमतिरिव तरलता न किंचिन्नोत्प्रेक्षते। निपुणमन्मथगृहीता चित्रवर्तिकेव तरुणचित्तवृत्तिर्न किंचिन्नालिखति। संजातरूपाभिमाना कुलटेवात्मसंभावना न क्वचिन्नात्मानमर्पयति। स्वप्न इवाननुभूतमपि मनोरथो दर्शयति। इन्द्रजालपिच्छिकेवासंभाव्यमपि प्रत्याशा पुरः स्थापयति'। भूयश्च चिन्तितवान् — 'किमनेन वृथैव मनसा खेदितेन। यदि सत्यमेवेयं धवलेक्षणा मय्येवं जातचित्तवृत्तिः, तदा नचिरात्स एवैनामप्रार्थितानुकूलो मन्मथः प्रकटीकरिष्यति। स एवास्य संशयस्य च्छेत्ता भविष्यति' इत्यवधार्योत्थायोपविश्य च, ताभिः कन्यकाभिः सहाक्षैर्गेयैश्च विपञ्चीवाद्यैश्च स्वरसंदेहविवादैश्च सुभाषितगोष्ठीभिश्चान्यैश्च तैस्तैरालापैः

सुकुमारैः कलाविलासैः क्रीडन्नासांचक्रे। मुहूर्तं च स्थित्वा निर्गम्योपवनालोकनकुतूहलाक्षिप्तचित्तः, क्रीडापर्वतकशिखरमारुरोह।

कादम्बरी तु तं दृष्ट्वा, 'चिरयति' इति महाश्वेतायाः किल वर्त्मावलोकयितुं विमुच्य तं गवाक्षम्, अनङ्गाक्षिप्तचित्ता सौधस्योपरितनं तलं कैलासशिखरमिव गौर्यारुरोह। तत्र च विरलपरिजना सकलशशिमण्डलपाण्डुरेणातपत्रेण हेमदण्डेन निवार्यमाणातपा, चतुर्भिर्बालव्यजनैश्च फेनशुचिभिरुद्धूयमानैरुपवीज्यमाना, मुहुश्चामरशिखां समासज्य, मुहुश्छत्रदण्डमवलम्ब्य, मुहुस्तमालिकास्कन्धे करौ विन्यस्य, मुहुर्मदलेखां सखीं परिष्वज्य, मुहुः परिजनान्तरितसकलदेहा नेत्रत्रिभागेणावलोक्य, मुहुर्निश्चलकरविधृतामधरपल्लवे वीटिकां विनिवेश्य, मुहुरुद्गीर्णोत्पलप्रहारपलायमानपरिजनानुसरणदत्तकतिपयपदा, विहस्य तं विलोकयन्ती, तेन च विलोक्यमाना, महान्तमपि कालमतिक्रान्तं नाज्ञासीत्। आरुह्य च प्रतीहार्या निवेदितमहाश्वेताप्रत्यागमना, तस्मादवततार। स्नानादिषु मन्दादरापि महाश्वेतानुरोधेन दिवसव्यापारमकरोत्। चन्द्रापीडोऽपि तस्मादवतीर्य, प्रथमविसर्जितेनैव कादम्बरीपरिजनेन निर्वर्तितस्नानविधिः, निरुपहतशिलार्चिताभिमतदैवतः, क्रीडापर्वतक एव सर्वमाहारादिकमहःकर्म चक्रे।

क्रमेण च कृताहारः, क्रीडापर्वतकप्राग्भागभाजि मनोहारिणि मरकतशिलातले समुपविष्टः, दृष्टवान्सहसैवातिबहुलधाम्ना धवलेनालोकेन विलिप्यमानमम्बरतलम्।

कुतूहलाच्चालोकानुसारप्रहितचक्षुः, अद्राक्षीत् अनल्पकन्यकाकदम्बपरिवृताम्, ध्रियमाणधवलातपत्राम्, उद्धूयमानचामरद्वयाम्,

कादम्बरीप्रतीहार्या वामपाणिना वेत्रलतागर्भेणार्द्रवस्त्रशकलावच्छन्नमुखं चन्दनानुलेपनसनाथं नालिकेरसमुद्गकमुद्वहन्त्या दक्षिणकरेण दत्तहस्तावलम्बाम्, केयूरकेण च निश्वासहार्ये निर्मोकशुचिनी धौत कल्पलतादुकूले दधता निवेद्यमानमार्गाम्, मालतीकुसुमदामाधिष्ठितकरतलया च तमालिकयानुगम्यमानामागच्छन्तीं मदलेखाम्; तस्याश्च समीपे तरलिकाम्; तया च सितांशुकोपच्छदे पटलके गृहीतम्, सहभुवमिव चन्द्रमसः, हासमिव श्रियः, प्रतिमातारागणमिव जलनिधिजलादुद्गतम्, यशोराशिमिवैकत्र घटितं सर्वसागराणाम्, शरच्छशिनमिव घनमुक्तांशुनिवहधवलितदिङ्मुखम्, प्रभावर्षिणमतितारं हारम् ।

दृष्ट्वा चायमस्य चन्द्रापीडश्चन्द्रातपद्युतिमुषो धवलिम्नः कारणमिति मनसा निश्चित्य, दूरादेव प्रत्युत्थानादिना समुचितेनोपचारक्रमेण मदलेखामापतन्तीं प्रतिजग्राह। सा तु तस्मिन्नेव मरकतग्रावणि मुहूर्तमुपविश्य, स्वयमुत्थाय, तेन चन्दनाङ्गरागेणानुलिप्य, ते च द्वे दुकूले परिधाप्य, तैश्च मालतीकुसुमदामभिरारचितशेखरं कृत्वा, तं हारमादाय, चन्द्रपीडमुवाच — 'कुमार, तवेयमपहस्तिताहंकारकान्ता पेशलता प्रीतिपरवशं जनं किमिव न कारयति। प्रश्रय एव ते ददात्यवकाशमेवंविधानाम्। अनया चाकृत्या कस्यासि न जीवितस्वामी। अनेन चाकारणाविष्कृतवात्सल्येन चरितेन कस्य न बन्धुत्वमध्यारोपयसि। एषा च ते प्रकृतिमधुरा व्यवहृतिः कस्य न वयस्यतामुत्पादयति। कं वा न समाश्वासयन्त्यमी स्वभावसुकुमारवृत्तयो भवद्गुणाः। त्वन्मूर्तिरेवात्रोपालम्भमर्हति, या प्रथमदर्शन एव विस्रम्भमुपजनयति। इतरथा हि त्वद्विधे सकलभुवनप्रथितमहिम्नि प्रयुज्यमानं सर्वमेवानुचितमिवा-

भाति। तथा हि—संभाषणमप्यधःकरणमिवापतति। आदरोऽपि प्रभुताभिमानमिवानुमापयति। स्तुतिरप्यात्मोत्सेकमिव सूचयति। उपचारोऽपि चपलतामिव प्रकाशयति। प्रीतिरप्यनात्मज्ञतामिव ज्ञापयति। विज्ञापनापि प्रागल्भ्यमिव ज्ञायते। सेवापि चापलमिव दृश्यते। दानमपि परिभव इव भवति। अपि च, स्वयंगृहीतहृदयाय किं दीयते। जीवितेश्वराय किं प्रतिपाद्यते। प्रथमकृतागमनमहोपकारस्य का ते प्रत्युपक्रिया। दर्शनदत्तजीवितफलस्य सफलमागमनं केन ते क्रियते। प्रणयितां चानेन व्यपदेशेन दर्शयति कादम्बरी, न विभवम्। अप्रतिपाद्या हि परस्वता सज्जनविभवानाम्। आस्तां तावद्विभवः। भवादृशस्य दास्यमप्यङ्गीकुर्वाणा नाकार्यकारिणीति नियुज्यते। दत्त्वात्मानमपि वञ्चिता न भवति। जीवितमप्यर्पयित्वा न पश्चात्तप्यते। प्रणयिजनप्रत्याख्यानपराङ्मुखी च दाक्षिण्यपरवती महत्ता सताम्। न च तादृशी भवति याचमानानाम्, यादृशी ददता लज्जा। यत्सत्यममुना व्यतिकरेण कृतापराधमिव त्वय्यात्मानमवगच्छति कादम्बरी। तदयममृतमथनसमुद्भूतानां सर्वरत्नानामेकः शेष इति शेषनामा हारोऽमुनैव हेतुना बहुमतो भगवताम्भसां पत्या गृहमुपगताय प्रचेतसे दत्तः, पाशभृतापि गन्धर्वराजाय, गन्धर्वराजेनापि कादम्बर्यै, तयापि त्वद्वपुरस्यानुरूपमाभरणस्येति विभावयन्त्या, नभःस्थलमेवोचितं सुधासूतेर्धाम न धरेत्यवधार्यानुप्रेषितः। यद्यपि निजगुणगणाभरणभूषिताङ्गयष्टयो भवादृशाः क्लेशहेतुमितरजनबहुमतमाभरणभारमङ्गेषु नारोपयन्ति, तथापि कादम्बरीप्रीतिरत्र कारणम्। किं न कृतमुरसि शिलाशकलं कौस्तुभाभिधानं लक्ष्म्याः सहज-

मिति बहुमानमाविष्कुर्वता भगवता शार्ङ्गपाणिना। न च नारायणोऽत्रभवन्तमतिरिच्यते। नापि कौस्तुभमणिरणुनापि गुणलवेन शेषमतिशेते। न चापि कादम्बरीमाकारानुकृतिकलयाप्यल्पीयस्या लक्ष्मीरनुगन्तुमलम्। अतोऽर्हतीयमिमं बहुमानं त्वत्तः। न चाभूमिरेषा प्रीतिप्रसरस्य। नियतं च भवतो भग्नप्रणया महाश्वेतामुपालम्भसहस्रैः खेदयित्वा स्वात्मानमुत्स्रक्ष्यति। अत एव महाश्वेता तरलिकामपीमं हारमादाय त्वत्सकाशं प्रेषितवती। तयापि कुमारस्य संदिष्टमेव — न खलु महाभागेन मनसापि कार्यः कादम्बर्याः प्रथमप्रणयप्रसरभङ्गः' इत्युक्त्वा, तं तस्य वक्षःस्थले बबन्ध।

चन्द्रापीडस्तु विस्मयमानः प्रत्यवादीत् — 'मदलेखे, किमुच्यते। निपुणासि। जानासि ग्राहयितुम्। उत्तरावकाशमपहरन्त्या कृतं वचसि कौशलम्। अयि मुग्धे, के वयमात्मनः। के वा वयं ग्रहणस्याग्रहणस्य वा। गता खल्वियमस्तं कथा। सौजन्यशालिनीभिर्भवतीभिरुपकरणीकृतोऽयं जनो यथेष्टमिष्टेष्वनिष्टेषु वा व्यापारेषु विनियुज्यताम्। अतिदक्षिणायाः खलु देव्याः कादम्बर्या निर्दाक्षिण्यमपि गुणा न कंचिन्न दासीकुर्वन्ति' इत्युक्त्वा च, कादम्बरीसंबद्धाभिरेव कथाभिः सुचिरं स्थित्वा, विसर्जयांबभूव मदलेखाम्। अनतिदूरं गतायां च तस्याम्, क्रीडापर्वतकगतमुदयगिरिगतमिव चन्द्रमसं चन्दनदुकूलहारधवलं चन्द्रापीडं द्रष्टुमुत्सारितवेत्रच्छत्रचामरचिह्ना निषिद्धाशेषपरिजनानुगमना, तमालिकाद्वितीया, चित्ररथसुता पुनरपि तदेव सौधशिखरमारुरोह। तत्रस्था च पुनस्तथैव विविधविलासतरङ्गितैर्विकारिविलोकितैर्जहारास्य मनः।

अथ शनैःशनैरदर्शनमुपगते भगवति गभस्तिमालिनि, जातायां चादर्शनक्षमायां वेलायाम्, सौधशिखरादवततार कादम्बरी, क्रीडापर्वतकनितम्बाच्च चन्द्रापीडः। उच्छ्रिते च ततो नचिरादिव कुसुमायुधाधिराज्यैकातपत्रे श्वेतभानौ, चन्द्रापीडो गृहकुमुदिन्यास्तीरे हरिचन्दनरसैः प्रक्षालितं कादम्बरीपरिजनोपदिष्टं मुक्ताशिलापट्टं चन्द्रशीतलमधिशिश्ये। तत्रस्थस्य चास्यागत्याकथयत्केयूरकः—'देवी कादम्बरी देवं द्रष्टुमागता' इति।

अथ चन्द्रापीडः ससंभ्रममुत्थाय, आगच्छन्तीम्, अल्पसखीजनपरिवृताम्, अपनीताशेषराजचिह्नाम्, इतरामिवैकावलीमात्राभरणाम्, मदलेखया दत्तहस्तावलम्बा कादम्बरीमपश्यत्। आगत्य च प्रीतिपेशलतां दर्शयन्ती प्राकृतेव परिजनोचिते भूतले सा समुपाविशत्। चन्द्रापीडोऽपि "कुमार, अध्यास्यतां शिलातलमेव' इत्यसकृदनुबध्यमानोऽपि मदलेखया भूमिमेवाभजत। सर्वासु चासीनासु मुहूर्तमिव स्थित्वा, वक्तुमुपचक्रमे चन्द्रापीडः — 'देवि, दृष्टिपातमात्रप्रीते दासजने संभाषणादिकस्यापि प्रसादस्य नास्त्यवकाशः। किमुतैतावतोऽनुग्रहस्य। न खलु चिन्तयन्नपि निपुणं तमात्मनो गुणलवमवलोकयामि, यस्यायमनुरूपोऽनुग्रहातिरेकः। अतिसरलता तवेयमपगताभिमानमधुरा च सुजनता, यदभिनवसेवकजनेऽप्येवमनुरुध्यते। प्रायेण मामुपचारहार्यमदक्षिणं देवी मन्यते। धन्यः खलु परिजनस्ते, यस्योपरि नियन्त्रणा स्यात्। आज्ञासंविभागकरणोचिते भृत्यजने क इवादरः। परोपकारोपकरणं शरीरम्। तृणलवलघु च जीवितम्। अपत्रपे त्वत्प्रतिपत्तिमिरुपायनीकर्तुमेवमागतायास्ते। वयमेते, शरीर-

मिदम्, एतज्जीवितम्, एतानीन्द्रियाणि; एतेषामन्यतरदारोपय परिग्रहेण गरीयस्त्वम्' इति। अथैवंवादिनोऽस्य वचनमाक्षिप्य मदलेखा सस्मितमवादीत्—'कुमार, भवतु, अतियन्त्रणया खिद्यते खलु सखी कादम्बरी। किमर्थं चैवमुच्यते। सर्वमिदमन्तरेणापि वचनमनया परिगृहीतम्। किं पुनरमुनोपचारफल्गुना वचसा संदेहदोलामारोप्यते' इति।

स्थित्वा च कंचित्कालं कृतप्रस्तावा, 'कथं राजा तारापीडः, कथं देवी विलासवती, कथमार्यः शुकनासः, कीदृशी चोज्जयिनी, कियत्यध्वनि सा च, कीदृग्भारतं वर्षम्, रमणीयो वा मर्त्यलोकः' इत्यशेषं पप्रच्छ। एवंविधाभिश्च कथाभिः सुचिरं स्थित्वोत्थाय, कादम्बरी केयूरकं चन्द्रापीडसमीपशायिनं समादिश्य परिजनं च, शयनसौधशिखरमारुरोह। तत्र च सितदुकूलवितानतलास्तीर्णं शयनीयमलंचकार। चन्द्रापीडोऽपि तस्मिन्नेव शिलातले निरभिमानतामभिरूपतामतिगम्भीरतां च कादम्बर्याः, निष्कारणवत्सलतां च महाश्वेतायाः, सुजनतां च मदलेखायाः, महानुभावतां च परिजनस्य, अतिसमृद्धिं च गन्धर्वराजलोकस्य, रम्यतां च किंपुरुषदेशस्य मनसा भावयन्, केयूरकेण संवाह्यमानचरणः क्षणादिव क्षणदां क्षपितवान्।

अथ समुद्गते सवितरि, शिलातलादुत्थाय चन्द्रापीडः प्रक्षालितमुखकमलः कृतसंध्यानमस्कृतिः, गृहीतताम्बूलः 'केयूरक, विलोकय, देवी कादम्बरी प्रबुद्धा न वा। क्व वा तिष्ठति' इत्यवोचत्। गतप्रतिनिवृत्तेन च तेन 'देव, मन्दरप्रासादस्याधस्तादङ्गणसौधवेदिकायां महाश्वेतया सहावतिष्ठते' इत्यावेदिते, गन्धर्वराजतनयामालोकयितुमाजगाम। ददर्श च जटाजिनमौञ्जीवल्कलाषाढधारिणीभिर्वर्णिचि-

द्नाभिस्तापसीभिरुपास्यमानाम् अन्तःपुराभ्यर्हिताश्च सादरं नमस्कारै-रामाषणैरभ्युत्थानैरासन्नवेत्रासनदानैश्च संमानयन्तीं महाश्वेताम्, पृष्ठतश्च समुपविष्टेन किंनरमिथुनेन मधुकरमधुराभ्यां वंशाभ्यां दत्ते ताने, कलगिरा गायन्त्या नारददुहित्रा पठ्यमाने च सर्वमङ्गलमहीयसि महाभारते दत्तावधानां कादम्बरीम्। समुपसृत्य कृतनमस्कारः, तस्यामेव सुधावेदिकायां विन्यस्तमासनं भेजे। स्थित्वा च कंचित्कालम्, महाश्वेताया वदनं विलोक्य, स्फुरितकपोलोदरं मन्दस्मितमकरोत्। असौ तु तावतैव विदिताभिप्राया कादम्बरीमब्रवीत्—'सखि, भवत्या गुणैश्चन्द्रापीडश्चन्द्रकान्त इव चन्द्रमयूखैरार्द्रीकृतो न शक्नोति वक्तुम्। जिगमिषति खलु कुमारः। पृष्ठतो दुःखमविदितवृत्तान्तं राजचक्रमास्ते। अपि च, युवयोर्दूरस्थितयोरपि स्थितेयमिदानीं कमलिनीकमलबान्धवयोरिव कुमुदिनीकुमुदनाथयोरिव प्रीतिरा प्रलयात्। अतोऽभ्यनुजानातु भवती' इति।

अथ कादम्बरी 'सखि, स्वाधीनोऽयं सपरिजनो जनः कुमारस्य स्व इवान्तरात्मा। क इवात्रानुरोधः' इत्यभिधाय, गन्धर्वकुमारानाहूय 'प्रापयत कुमारं स्वां भूमिम्' इत्यादिदेश। चन्द्रापीडोऽभ्युत्थाय प्रणम्य प्रथमं महाश्वेताम्, ततः कादम्बरीम्, तस्याश्च प्रेमस्निग्धेन चक्षुषा मनसा च गृह्यमाणः, 'देवि, किं ब्रवीमि। बहुभाषिणो न श्रद्दधाति लोकः। स्मर्तव्योऽस्मि परिजनकथासु' इत्यभिधाय, कन्यकान्तःपुरान्निर्जगाम। कादम्बरीवर्जमशेषकन्यकाजनो गुणगौरवाकृष्टः परवश इव तं व्रजन्तमा बहिस्तोरणादनुवव्राज। निवृत्ते च कन्यकाजने, केयूरकेणोपनीतं वाजिनमारुह्य, गन्धर्वकुमारकै-

स्तैरनुगम्यमानः, हेमकूटात्प्रवृत्तो गन्तुम्। गच्छतश्चास्य चित्ररथतनया न केवलमन्तः, बहिरपि सैव सर्वाशानिबन्धनमासीत्। क्रमेण च प्राप्य महाश्वेताश्रमम्, अच्छोदसरस्तीरे संनिविष्टमिन्द्रायुधखुरपुटानुसारेणैवागतमात्मस्कन्धावारमपश्यत्। निवर्तिताशेषगन्धर्वकुमारश्च, सानन्देन सकुतूहलेन सविस्मयेन च स्कन्धावारवर्तिना जनेन प्रणम्यमानः, स्वभवनं विवेश। संमानिताशेषराजलोकश्च वैशम्पायनेन पत्रलेखया च सह 'एवं महाश्वेता, एवं कादम्बरी, एवं मदलेखा, एवं तमालिका, एवं केयूरकः' इत्यनयैव कथया प्रायो दिवसमनैषीत्। कादम्बरीरूपदर्शनविद्विष्टेव नास्य पुरेव प्रीतिमकरोद्राजलक्ष्मीः। तामेव च धवलेक्षणामाबद्धरणरणकेन चेतसा चिन्तयतो जाग्रत एव सा जगाम रात्रिः।

अपरेद्युश्च समुत्थिते भगवति रवौ, आस्थानमण्डपगतः, तद्गतेनैव मनसा सहसैव प्रतीहारेण सह प्रविशन्तं केयूरकं ददर्श। दूरादेव च क्षितितलस्पर्शिना मौलिना कृतपादपतनम् 'एह्येहि' इत्युक्त्वा प्रथममपाङ्गविसर्पिणा चक्षुषा, ततो हृदयेन, पश्चाद्भुजाभ्यां प्रधावितः प्रथितं तमालिलिङ्ग गाढम्। उपावेशयच्चैनमात्मनः समीप एव। पप्रच्छ च—'केयूरक, कथय, कुशलिनी देवी ससखीजना कादम्बरी 'भगवती महाश्वेता च?' इति। असौ तु तेन राजसूनोः प्रीतिप्रकर्षजन्मना स्मितेनैव स्नपित इवानुलिप्त इव सद्य एवापगताध्वखेदः प्रणम्यादरतरमवोचत्—'अद्य कुशलिनी, यामेवं देवः पृच्छति' इत्यभिधाय, अपनीयार्द्रवस्त्रकर्पटावगुण्ठितं बिससूत्रसंयतमुखमार्द्रचन्दनपङ्कन्यस्तबालमृणालवलयमुद्रं नलिनीपत्रपुटमदर्शयत्। उद्घाट्य च तत्र काद-

म्बरीप्रहितान्यभिज्ञानान्यदर्शयत्। तद्यथा—मरकतहरिन्ति व्यपनीतत्वञ्चि चारुमञ्जरीभाञ्जि क्षीरीणि पूगीफलानि, शुककामिनीकपोलपाण्डूनि ताम्बूलीदलानि, हरचन्द्रखण्डस्थूलशकलं च कर्पूरम्, अतिबहुलमृगमदामोदमनोहरं च मलयजविलेपनम्। अब्रवीच्च—'चूडामणिचुम्बिनाञ्जलिना देवमर्चयति देवी कादम्बरी, महाश्वेता च सुकण्ठग्रहेण कुशलवचसा, नमस्कारेण च मदलेखा, सचरणरजःस्पर्शेन च पादप्रणामेन तमालिका। संदिष्टं च तव महाश्वेतया—'धन्याः खलु ते, येषां न गतोऽसि चक्षुषोर्विषयम्। तथा नाम समक्षं भवतस्ते तुहिनशीतलाश्चन्द्रमया इव गुणा विरहे विवस्वन्मया इव संवृत्ताः। स्पृहयन्ति खलु जनाः कथमपि देवोपपादितायातीतदिवसाय। त्वया वियुक्तं विनिवृत्तमहोत्सवालसमिव वर्तते गन्धर्वराजनगरम्। जानासि च मां कृतसकलपरित्यागाम्। तथाप्यकारणपक्षपातिनं भवन्तं द्रष्टुमिच्छत्यनिच्छन्त्या अपि मे बलादिव हृदयम्। अपि च, बलवदस्वस्थशरीरा कादम्बरी। स्मरति च स्मेराननं स्मरकल्पं त्वाम्। अतः पुनरागमनगौरवेणार्हसीमां गुणवदभिमानिनीं कर्तुम्। उदारजनादरो हि बहुमानमारोपयति। अवश्यं सोढव्या चेयमस्मद्विधजनपरिचयकदर्थना कुमारेण। भवत्सुजनतैव जनयत्यनुचितं संदेशप्रागल्भ्यम्' इत्युक्त्वा, 'एष देवस्य शयनीये विस्मृतः शेषो हारः प्रहितः' इत्युत्तरीयपटान्तसंयतं विमुच्य चामरग्राहिण्याः करे समर्पितवान्।

अथ चन्द्रापीडः 'महाश्वेताचरणाराधनतपःफलमिदम्, यदेवं परिजनेऽप्यनुस्मरणादिकं प्रसादभारमतिमहान्तमारोपयति देवी कादम्बरी' इत्युक्त्वा, तत्सर्वं शिरसि कृत्वा, स्वयमेव जग्राह। तेन च

स्पर्शवता ह्लादिना सुरभिणा विलेपनेन विलिप्य, तमेव कण्ठे हारमकरोत्। आगृहीतताम्बूलश्च, मुहूर्तादिवोत्थाय, वामबाहुना स्कन्धदेशे समवलम्ब्य केयूरकम्, शनैः शनैर्गन्धमादनं करिणं द्रष्टुमयासीत्। तत्र च स्थित्वा क्षणमिव, तस्मै स्वयमेव शष्पकवलमवकीर्य, वल्लभतुरंगमन्दुराभिमुखः प्रतस्थे। गच्छंश्चोभयतः किंचित्किंचिदिव तिर्यग्वलितवदनः परिजनं विलोकयाबभूव।

अथ चित्तज्ञैः प्रतीहारैः प्रतिषिद्धानुगमने निखिले समुत्सारिते परिजने, केयूरकद्वितीय एव मन्दुरां प्रविवेश। उत्सारणभयसंभ्रान्तलोचनेषु प्रणम्यापसृतेषु मन्दुरापालेषु, इन्द्रायुधस्य पृष्ठावगुण्ठनपटं किंचिदेकपार्श्वगलितं समीकुर्वन्, उत्सारयंश्च कूणितनेत्रत्रिभागस्य दृष्टिनिरोधिनीं कुङ्कुमकपिलां केसरसटाम्, खुरधारणीविन्यस्तचरणः, लीलामन्दं मन्दुरादारुदत्तदेहभरः सकुतूहलमुवाच—'केयूरक, कथय मन्निर्गमादारभ्य को वा वृत्तान्तो गन्धर्वराजकुले, केन वा व्यापारेण वासरमतिनीतवती गन्धर्वराजपुत्री, किं वाकरोन्महाश्वेता, किमभाषत वा मदलेखा, के वाभवन्नालापाः परिजनस्य, भवतो वा को व्यापार आसीत्। आसीद्वा काचिदस्मदाश्रयिणी कथा?'। केयूरकस्तु सर्वमाचचक्षे—'देव, श्रूयताम्— निर्गते त्वयि देवी कादम्बरी सपरिजना सौधशिखरमारुह्य, तुरगधूलिरेखाधूसरं देवस्यैव गमनमार्गमालोकितवती। तिरोहितदर्शने च देवे, मदलेखास्कन्धनिक्षिप्तमुखी प्रीत्या तं दिगन्तं पश्यन्ती, सुचिरं तत्रैव स्थितवती। तस्माच्च कथमपि सखेदमवतीर्य क्षणमिवास्थानमण्डपे स्थित्वा, उत्थाय तमेव क्रीडापर्वतकमागतवती, यत्र स्थितवान्देवः। तमुपेत्य च 'देवेनात्र शिलातले स्थितम्,

अत्र स्नातम्, अत्र भगवानर्चितः शूलपाणिः, अत्र भुक्तम्, अत्र सुप्तम्? इति परिजनेन पुनरुक्तं निवेद्यमानानि देवस्यैव स्थानचिह्नानि पश्यन्ती, क्षपितवती दिवसम्। दिवसावसाने च कथमपि महाश्वेताप्रयत्नादनभिमतमपि तस्मिन्नेव स्फटिकमणिवेश्मन्याहारमकरोत्। अस्तमुपगते च भगवति रवौ, उदिते चन्द्रमसि, तत्रैव कंचित्कालं स्थित्वा, करौ कपोलयोः कृत्वा किमपि चिन्तयन्ती, मुकुलितेक्षणा क्षणमात्रं स्थित्वा, उत्थाय कृच्छ्रादुत्क्षिपन्ती पदानि शय्यागृहमगात्। शयननिक्षिप्तगात्रयष्टिश्च ततः प्रभृति प्रबलया शिरोवेदनया विचेष्टमाना, दारुणेन च दाहरूपिणा ज्वरेणाभिभूयमाना, केनाप्याधिना मङ्गलप्रदीपैः कुमुदाकरैश्चक्रवाकैश्च सार्धमनिमीलितलोचना दुःखदुःखेन क्षणदामनैषीत्। उषसि च मामाहूय देवस्य वार्ताव्यतिकरोपलम्भाय सोपालम्भमादिष्टवती'।

चन्द्रापीडस्तदाकर्ण्य जिगमिषुः 'अश्वोऽश्वः' इति वदन्, भवनान्निर्ययौ। आरोपितपर्याणं च त्वरिततुरगपरिचारकोपनीतमिन्द्रायुधमारुह्य, पश्चादारोप्य पत्रलेखाम्, स्कन्धावारे स्थापयित्वा वैशम्पायनम्, अशेषं परिजनं निवर्त्य च, अन्यतुरगारूढेनैव केयूरकेणानुगम्यमानः, हेमकूटं ययौ। आसाद्य च कादम्बरीभवनद्वारमवततार। अवतीर्य च द्वारपालार्पिततुरंगः कादम्बरीप्रथमदर्शनकुतूहलिन्या च पत्रलेखयानुगम्यमानः प्रविश्य, 'क्व देवी कादम्बरी तिष्ठति' इति संमुखागतमन्यतमं वर्षवरमप्राक्षीत्। कृतप्रणामेन च तेन 'देव, मत्तमयूरस्य क्रीडापर्वतकस्याधस्तात्कमलवनदीर्घिकातीरे विरचितं हिमगृहमध्यास्ते' इत्यावेदिते, केयूरकेणोपदिश्यमानवर्त्मा

गत्वा किंचिदध्वानम्, निरन्तरनलिनीदलच्छन्नं हिमगृहमपश्यत्। ततश्च तत्र बहुविधान् शिशिरोपचारोपकरणकल्पनाव्यापारान् परिजनेन कृतान् क्रियमाणांश्च वीक्षमाणः, हिमगृहकस्य मध्यभागम्, हृदयमिव हिमवतः, जलक्रीडागृहमिव प्रचेतसः, कुलगृहमिव सर्वचन्दनवनदेवतानाम्, संकेतसदनमिव सर्वप्रावृषाम्, आससाद। क्रमेण च तत्रान्तर्बहिश्चातिबहलेन पिण्डहार्येणेवोपलिप्यमानोऽतिशीतलस्पर्शेनामन्यतात्मनो मनश्चन्द्रमयम्, कुमुदमयानीन्द्रियाणि, ज्योत्स्नामयान्यङ्गानि, मृणालिकामयीं धियम्।

एवंविधस्य च तस्यैकदेशे सखीकदम्बकपरिवृताम्, कुल्याभ्रमिभ्रमितेन कर्पूररसस्रोतसा कृतपरिवेषाया मृणालदण्डमण्डपिकायास्तले कुसुमशयनमधिशयानाम्, अवतंसमधुकररवदहनदग्धमिव श्रोत्रमपाङ्गनिर्गतेनाश्रुस्रोतसा सिञ्चन्तीम्, मुहुर्मुहुर्भुजलतया तुषारशिलासालभञ्जिकामालिङ्गन्तीम्, मुहुः कपोलफलकेन कर्पूरपुत्रिकामाश्लिष्यन्तीम्, मुहुश्चरणारविन्देन चन्दनपङ्कप्रतियातनामास्पृशन्तीम्, कुसुमचापलेखामिव मदनारोपितगुणकोटिकान्ततराम्, मधुमासदेवतामिव शिशिरहारिणीं कादम्बरीं व्यलोकयत्।

अथ सा यथादर्शनमागत्यागत्य चन्द्रापीडागमनमावेदयन्तं परिजनमुत्तरलतारकेण चक्षुषा 'कथय, किं सत्यमागतः? दृष्टस्त्वया? कियत्यध्वनि? क्वासौ' इति प्रतिमुखं निक्षिप्तेनानक्षरं पप्रच्छ। प्रवर्धमानधवलिम्ना चक्षुषा दृष्ट्वा च संमुखमापतन्तं तम्, दूरादेव वरारोहा संभ्रमच्युतोत्तरीयका, मणिकुट्टिमनिहितेन वामकरतलेन हस्तावलम्बनं निजप्रतिमामिव याचमाना, स्रस्तकेशकलापसंयमनश्रमितेन गल-

स्वेदसलिलेन दक्षिणकरेण समभ्युक्ष्येवात्मानमर्पयन्ती, चक्षुषा क्षरन्ती शिशिरमानन्दजलम्, किंचिदधोमुखी, तत्क्षणमपाङ्गभागपुञ्जिततारकया तन्मुखलग्नयेव दीर्घया दृष्ट्याकृष्यमाणा, कुसुमशयनादुत्तस्थौ। चन्द्रापीडस्तु समुपसृत्य पूर्ववदेव तां महाश्वेताप्रणामपुरःसरं दर्शितविनयः प्रणनाम। कृतप्रतिप्रणामायां च तस्यां पुनस्तस्मिन्नेव कुसुमशयने समुपविष्टायाम्, प्रतीहार्या समुपनीतां जाम्बूनदमयीमासन्दिकां पादेनैवोत्सार्य, क्षितावेवोपाविशत्।

अथ केयूरकः 'देवि, देवस्य चन्द्रापीडस्य प्रसादभूमिरेषा पत्रलेखा नाम ताम्बूलकरङ्कवाहिनी' इत्यभिधाय पत्रलेखामदर्शयत्। अथ कादम्बरी दृष्ट्वा ताम्, 'अहो मानुषीषु पक्षपातः प्रजापतेः' इति चिन्तयांबभूव। कृतप्रणामां च तां सादरम् 'एह्येहि' इत्यभिधाय, आत्मनः समीपे सकुतूहलं परिजनेन दृश्यमानां पृष्ठतः समुपावेशयत्। दर्शनादेवोपारूढप्रीत्यतिशया च मुहुर्मुहुरेनां सोपग्रहं करकिसलयेन पस्पर्श।

चन्द्रापीडस्तु सपदि कृतसकलागमनोचितोपचारः, तदवस्थां चित्ररथतनयामालोक्याचिन्तयत् — 'अतिदुर्विदग्धं हि मे हृदयमद्यापि न श्रद्दधाति। भवतु, पृच्छामि तावदेनां निपुणालापेन' इति। प्रकाशमब्रवीत् — 'देवि, जानामि, कामरतिं निमित्तीकृत्य प्रवृत्तोऽयमविचलसंतापतन्त्रो व्याधिः। सुतनु, सत्यम्, न तथा त्वामेष व्यथयति, यथास्मान्। इच्छामि देहदानेनापि स्वस्थामत्रभवतीं कर्तुम्। उत्कम्पिनीमनुकम्पमानस्य कुसुमेषु पीडया पतितामवेक्षमाणस्य पततीव मे हृदयम्। अनङ्गदे तनुभूते ते भुजलते।

गाढसंतापया च दृष्ट्या वहसि स्थलकमलिनीमिव रक्ततामरसाम्। दुःखितायां च त्वयि परिजनेऽपि चानवरतकृताश्रुबिन्दुपातेन वर्तते मुक्ताभरणता। गृहाण स्वयंवरार्हाणि मङ्गलप्रसाधनानि। सकुसुमशिलीमुखा हि शोभते नवा लता' इति।

अथ कादम्बरी बालतया स्वभावमुग्धापि, कन्दर्पेणोपदिष्टयेव प्रज्ञया तमशेषमस्याव्यक्तव्याहारसूचितमर्थं मनसा जग्राह। मनोरथानां तु तावतीं भूमिमसंभावयन्ती, शालीनतां चावलम्बमाना, तूष्णीमेवासीत्। केवलमुत्पादितान्यव्यपदेशा तत्क्षणं स्मितालोकमकरोत्। ततो मदलेखा प्रत्यवादीत्—'कुमार, किं कथयामि। दारुणोऽयमकथनीयः खलु संतापः। अपि च, कुमारभावोपेतायाः किमिवास्याः, यन्न संतापाय। तथा हि—मृणालिन्याः शिशिरकिसलयमपि हुताशनायते। ज्योत्स्नाप्यातपायते। ननु किसलयतालवृन्तवातैर्मनसि जायमानं किं न पश्यसि खेदम्। धीरत्वमेव प्राणसंधारणहेतुरस्याः' इति। कादम्बरी तु हृदयेन तमेव मदलेखालापमस्य प्रत्युत्तरीचकार। चन्द्रापीडोऽप्युभयथावटमानार्थतया संदेहदोलारूढेनैव चेतसा महाश्वेतया सह प्रीत्युपचयचतुराभिः कथाभिर्महान्तं कालं स्थित्वा, तथैव महता यत्नेन मोचयित्वात्मानम्, स्कन्धावारगमनाय कादम्बरीभवनान्निर्ययौ।

निर्गतं च तुरंगममारुरुक्षन्तं पश्चादागत्य केयूरकोऽभिहितवान्—"देव, मदलेखा विज्ञापयति—'देवी कादम्बरी प्रथमदर्शनजनितप्रीतिः पत्रलेखां निवर्त्यमानामिच्छति, पश्चाद्यास्यति' इति श्रुत्वा देवः प्रमाणम्" इत्याकर्ण्य चन्द्रापीडः 'केयूरक, धन्या स्पृहणीया च पत्रलेखा, यामेवमनुबध्नाति दुर्लभो देवीप्रसादः। प्रवेश्यताम्' इत्यभि-

धाय, पुनः स्कन्धावारमेवाजगाम। प्रविशन्नेव पितुः समीपादागतमभिज्ञाततरमालेखहारकमद्राक्षीत्। धृततुरंगमश्च प्रीतिविस्फारितेन चक्षुषा दूरादेवापृच्छत्—'अङ्ग, कच्चित्कुशली तातः सह सर्वेण परिजनेन, अम्बा च सर्वान्तःपुरैः' इति।

अथासावुपसृत्य प्रणामानन्तरम् 'देव, यथाज्ञापयसि' इत्यभिधाय, लेखद्वितयमर्पयांबभूव। युवराजस्तु शिरसि कृत्वा, स्वयमेव च तदुन्मुच्य, क्रमशः पपाठ—'स्वस्त्युज्जयिनीतः परममाहेश्वरो महाराजाधिराजो देवस्तारापीडः सर्वसंपदामायतनं चन्द्रापीडमुत्तमाङ्गे चुम्बन्नन्दयति। कुशलिन्यः प्रजाः। किंतु कियानपि कालो भवतो दृष्टस्य गतः। बलवदुत्कण्ठितं नो हृदयम्। देवी च सहान्तःपुरैर्ग्लानिमुपनीता। अतो लेखवाचनविरतिरेव प्रयाणकालतां नेतव्या' इति। शुकनासप्रेषिते द्वितीयेऽप्यमुमेवार्थं लिखितमवाचयत्। अस्मिन्नेवावसरे समुपसृत्य वैशम्पायनोऽपि लेखद्वितयमपरमात्मीयमस्मादभिन्नार्थमेवादर्शयत्।

अथ 'यथाज्ञापयति तातः' इत्युक्त्वा, तथैव च तुरगाधिरूढः प्रयाणपटहमवादयत्। समीपे स्थितं च महताश्वीयेन परिवृतं महाबलाधिकृतं बलाहकपुत्रं मेघनादनामानमादिदेश—''भवता पत्रलेखया सहागन्तव्यम्। नियतं च केयूरकस्तामादायैतावतीं भूमिमागमिष्यति। तन्मुखेन च विज्ञाप्या प्रणम्य देवी कादम्बरी—'नन्वियं सा त्रिभुवननिन्दनीया निरनुरोधा निष्परिचया दुर्गृहा प्रकृतिर्मर्त्यानाम्, येषामकाण्डविसंवादिन्यः प्रीतयो न गणयन्ति निष्कारणवत्सलताम्। एवं गच्छता मयात्मनो नीतः स्नेहः कपटकूटजालिकताम्। प्रापिता

भक्तिरलीककाकुकरणकुशलताम्। पातितमुपचारमात्रमधुरं धूर्ततायामात्मार्पणम्। प्रकटितं वाङ्मनसयोर्भिन्नार्थत्वम्। आस्तां तावदात्मा। अस्थानाहितप्रसादा दिव्ययोग्या देव्यपि वक्तव्यतां नीता। जनयन्ति हि पश्चाद्वैलक्ष्यमभूमिपातिता व्यर्थाः प्रसादामृतवृष्टयो महताम्। न खलु तथा देवीं प्रति प्रबलज्जातिभारमन्थरं मे हृदयम्, यथा महाश्वेतां प्रति। नियतमेनामलीकाध्यारोपणवर्णितास्मद्गुणसंभारामस्थानपक्षपातिनीमसकृदुपालप्स्यते देवी। तत्किं करोमि। गरीयसी गुरोराज्ञा प्रभवति देहमात्रकस्य। हृदयेन तु हेमकूटनिवासव्यसनिना लिखितं जन्मान्तरसहस्रस्य दास्यपत्रं देव्याः। सर्वथा गतोऽस्मि पितुरादेशादुज्जयिनीम्। प्रसङ्गतोऽसज्जनकथाकीर्तनेषु स्मर्तव्यः खलु चन्द्रापीडचण्डालः। मा चैवं मंस्थाः, यथा—जीवन्पुनर्देवीचरणारविन्दवन्दनानन्दमननुभूय स्थास्यति चन्द्रापीडः' इति। महाश्वेतायाश्च सप्रदक्षिणं शिरसा पादौ वन्दनीयौ। मदलेखायाश्च कथनीयः प्रणामपूर्वमशिथिलः कण्ठग्रहः। गाढमालिङ्गनीया च तमालिका। अस्मद्वचनादशेषः प्रष्टव्यः कुशलं कादम्बरीपरिजनः। रचिताञ्जलिना च भगवानामन्त्रणीयो हेमकूटः" इति।

एवमादिश्य तम्, 'सुहृदादिसाधनमक्लेशयता शनैः शनैर्गन्तव्यम्' इत्युक्त्वा वैशम्पायनं स्कन्धावारभरे न्ययुङ्क्त। स्वयमपि च तथारूढ एव कान्तकुन्तलतावनवाहिना तरुणतुरगप्रायेणाश्वसैन्येनानुगम्यमानः, तमेव लेखहारकं पर्याणलग्नमभिनवकादम्बरीवियोगशून्येनापि हृदयेनोज्जयिनीवार्तां पृच्छन्प्रतस्थे।

क्रमेण गजपतिपातितपादपपरिहारवक्रीकृतमार्गया, जनजनित-

तृणपर्णकाष्ठकोटिकूटप्रकटितवीरपुरुषघातस्थानया, महापादपमूलोत्की-र्णकान्तारदुर्गया, अध्वगोत्खातवालुकाकूपकोपलभ्यमानकलुषस्वल्पसलिलाभिः शुष्कगिरिनदिकाभिर्विषमीकृतान्तरालया, कुक्कुटकुलकौलेयकरटितानुमीयमानगुल्मगहनग्रामटिकया शून्यया दिवसमटव्या गत्वा, परिणते रविबिम्बे, बिम्बारुणातपविसरे वासरे, हरितालकपिलपक्ववेणुविटपिदलरचितवृतिभिर्मृगभयकृततृणपुरुषकैर्विपाकपाण्डुभिः फलिनैः प्रियङ्गुप्रायैरटवीक्षेत्रैर्विरलीकृतवनप्रदेशे चिरप्ररूढस्य रक्तचन्दनतरोरुपरि बद्धम्, जिह्वालतालोहिनीभी रक्तपताकाभिः केशकलापकान्तिना च कृष्णचामरावचूलेन प्रत्यग्रविशसितानां जीवानामिवात्रयवैरुपरचितदण्डमण्डनम्, परिणतवराटकघटितबुद्बुदार्धचन्द्रखण्डखचितम्, दोलायितशृङ्गसङ्गिलोहशृङ्खलावलम्बमानघर्घररवघोरघण्टया च घटितकेसरिसटारुचिरचामरया काञ्चनत्रिशूलिकया लिखितनभःस्थलम्, इतस्ततः पथिकपुरुषोपहारमार्गमिवालोकयन्तम्, महान्तं रक्तध्वजं दूरत एव ददर्श।

तदभिमुखश्च किंचिदध्वानं गत्वा, केतकीसूचिखण्डपाण्डुरेण वनद्विरददन्तकपाटेन परिवृताम्, लोहतोरणेन च रक्तचामरालिपरिकरा कालायसदर्पणमण्डलमालां बिभ्राणेन सनाथीकृतद्वारदेशाम्, अभिमुखप्रतिष्ठितेन च विनिहितरक्तचन्दनहस्तकतया रुधिरारुणयमकरतलास्फालितेनेव शोणितलवलोभलोलशिवालिह्यमानलोहितलोचनेन लोहमहिषेणाध्यासिताञ्जनशिलावेदिकाम्, क्वचिदङ्कुरितामिव कुटिलहारिणविषाणकोटिकूटैः पल्लवितामिव सरसजिह्वाच्छेदशतैः कुसुमितामिव रक्तनयनसहस्रैः फलितामिव मुण्डमण्डलैरुपहारहिंसां दर्शयन्तीम्,

शाखान्तरालनिरन्तरनिलीनरक्तकुक्कुटकुलैश्च भयादकालदर्शितकुसुमस्तबकैरिव रक्ताशोकविटपैर्विभूषिताङ्गणाम्, अवलम्बमानदीपधूमरक्तांशुकेन ग्रथितशिखिगलवलयावलिना पिष्टपिण्डपाण्डुरितघनघण्टामालभारिणा त्रापुषसिंहमुखमध्यस्थितस्थूललोहकण्टकदत्तदन्तदण्डार्गलं लसत्पीतनीललोहितदर्पणस्फुरितबुद्बुदमालं कपाटपट्टद्वयं दधानेन गर्भगृहद्वारदेशेन दीप्यमानाम्, पतितकृष्णचामरप्रतिबिम्बानां च शिरश्छेदलग्नकेशजालकानामिव परशुपट्टिशप्रभृतीनां जीवविशसनशस्त्राणां प्रभाभिर्बद्धबहलान्धकारतया पातालनिवासिनीमिवोपलक्ष्यमाणाम्, रक्तचन्दनखचितस्फुरत्फलपल्लवकलितैश्च बिल्वपत्रदामभिर्बालकमुण्डप्रालम्बैरिव कृतमण्डनाम्, प्रलम्बकूर्चधरैश्छागैरपि धृतव्रतैरिव कृष्णाजिनप्रावृताङ्गैः कुरङ्गैरपि प्रतिशयितैरिव ज्वलितलोहितमूर्धरत्नरश्मिभिः कृष्णसर्पैरपि शिरोधृतमणिदीपकैरिवाराध्यमानाम्, सर्वतः कठोरं वायसगणेन च रटता स्तुतिपरेणेव स्तूयमानाम्, स्थूलस्थूलैः सिराजालकैर्गोधागोलिकाकृकलासकुलैरिव दग्धस्थाण्वाशङ्कया समारूढैर्गवाक्षितेन, अलक्ष्मीसमुत्खातलक्षणस्थानैरिव विस्फोटव्रणबिन्दुभिः कल्माषितसकलशरीरेण, अम्बिकापादपतनश्यामललाटवर्धमानार्बुदेन, कुवादिदत्तसिद्धाञ्जनस्फुटितैकलोचनतया त्रिकालमितरलोचनाञ्जनदानादरश्लक्ष्णीकृतदारुशलाकेन, प्रत्यहं कटुकालाबुस्वेदप्रारब्धदन्तुरताप्रतीकारेण, कथंचिदस्थानदत्तेष्टकाप्रहारतया शुष्कैकभुजोपशान्तमर्दनव्यसनेन, सूचीस्यूतसिरासंकोचितवामकराङ्गुलिना, असम्यक्कृतरसायनानीताकालज्वरेण, जरां गतेनापि दक्षिणापथाधिराज्यवरप्रार्थनाकदर्थितदुर्गेण, दुःशिक्षितश्रमणादिष्टतिलकाबद्धविभवप्रत्या-

शेन, हरितपत्ररसाङ्गारमषीमलिनशम्बूकवाहिना, पट्टिकालिखितदुर्गास्तोत्रेण, धूमरक्तालक्तकाक्षरतालपत्रकुहकतन्त्रमन्त्रपुस्तिकासंग्राहिणा, जीर्णमहापाशुपतोपदेशलिखितमहाकालमतेन, आविर्भूतनिधिवादव्याधिना, संजातधातुवादवायुना, लग्नासुरविवरप्रवेशपिशाचेन, प्रवृत्तयक्षकन्यकाकामित्वमनोरथव्यामोहेन, वर्धितान्तर्धानमन्त्रसाधनसंग्रहेण, श्रीपर्वताश्चर्यवार्तासहस्राभिज्ञेन, असकृदभिमन्त्रितसिद्धार्थकप्रहतिप्रधावितैः पिशाचगृहीतकैः करतलताडनचिपिटीकृतश्रवणपुटेन, अविमुक्तशैवाभिमानेन, दुर्गृहीतालाबुवीणावादनोद्वेजितपथिकपरिहतेन, दिवसमेव मशकक्वणितानुकारि किमपि कम्पितोत्तमाङ्गं गायता, स्वदेशभाषानिबद्धभागीरथीभक्तिस्तोत्रनर्तकेन, गृहीततुरगब्रह्मचर्यतयान्यदेशागतोषितासु जरत्प्रव्रजितासु बहुकृत्वः संप्रयुक्तस्त्रीवशीकरणचूर्णेन, अतिरोषणतया कदाचिद्दुर्न्यस्ताष्टपुष्पिकापातोत्पादितक्रोधेन, चण्डिकामपि मुखभङ्गिविकारैर्भृशमुपहसता, कदाचिन्निवार्यमाणावासरुषिताध्वगारब्धबहुबाहुयुद्धपातभग्नपृष्ठकेन, कदाचित्कृतापराधबालकपलायनामर्षपश्चात्प्रधावितस्खलिताधोमुखनिपातोपलस्फुटितशिरःकपालभुग्नग्रीवेण, कदाचिज्जनपदकृतनवागतापरधार्मिकादरमत्सरोद्वद्धात्मना, निःसंस्कारतया यत्किंचनकारिणा, खञ्जतया मन्दं मन्दं संचारिणा, बधिरतया संज्ञाव्यवहारिणा, रात्र्यन्धतया दिवाविहारिणा, लम्बोदरतया प्रभूताहारिणा, अनेकशः फलपातनकुपितवानरनखोल्लेखच्छिद्रितनासापुटेन, सहस्रशः शयनीकृतासंस्कृतशून्यदेवकुलकालसर्पदष्टेन, सर्वदा वसन्तक्रीडिना जनेनोत्क्षिप्तखण्डखट्वारोपितवृद्धदासीविवाहप्राप्तविडम्बनेन, अनेकायतनप्रतिशयितनिष्फलोत्थानेन, मूर्खतामपि बहुव्य-

सनानुगतां प्रसूतानेकापत्यामिव दर्शयता, क्लेशमपि सर्वावयवज्वलितदीपिकादाहव्रणविभावितं बहुमुखमिव प्रकटयता, शुष्कवनलतानिर्मितबृहत्कुसुमकरण्डकेन, वेणुलतारचितपुष्पपातनाङ्कुशिकेन, क्षणमप्यमुक्तकालकम्बलखण्डखोलेन, जरद्द्रविडधार्मिकेणाधिष्ठितां चण्डिकामपश्यत्। तस्यामेव च वासमरचयत्।

अथावतीर्य तुरगात्, प्रविश्य भक्तिप्रवणेन चेतसा तां प्रणनाम। कृतप्रदक्षिणश्च पुनः प्रणम्य, प्रशान्तोद्देशदर्शनकुतूहलेन परिभ्रमन्, उच्चैरारटन्तमाक्रोशन्तं च कुपितं द्रविडधार्मिकमेकदेशे ददर्श। दृष्ट्वा च कादम्बरीविरहोत्कण्ठोद्वेगदूयमानोऽपि सुचिरं जहास। न्यवारयच्च तेन सार्धं संरब्धकलहानुपहसतः स्वसैनिकान्। उपसान्त्वनैश्च कथमपि प्रियालापशतानुनयैः प्रशममुपनीय, क्रमेण जन्मभूमिं जातिं विद्यां च कलत्रमपत्यानि विभवं वयःप्रमाणं प्रव्रज्यायाश्च कारणं स्वयमेव पप्रच्छ। पृष्टश्चासाववर्णयदात्मानम्। अतीतस्वशौर्यरूपविभववर्णनवाचालेन तेन सुतरामरज्यत राजपुत्रः। विरहातुरहृदयस्य तच्चरितं विनोदमतामिवागात्। उपजातपरिचयश्चास्मै ताम्बूलमदापयत्।

अस्तमुपगते च भगवति सप्तसप्तौ, क्षितितलुठनपांसुलसटावधूननानुमितोत्साहेषु पीतोदकेषु स्नानार्द्रपृष्ठतया विगतश्रमेषु पुरोनिखातकुन्तयष्टिषु संयतेषु वाजिषु, चन्द्रापीडः परिजनेनैकदेशे संयतस्येन्द्रायुधस्य पुरः परिकल्पितं प्रतीहारनिवेदितं शयनीयमगात्। निषण्णस्य चास्य तत्क्षणमेव पस्पर्श दुःखासिका हृदयम्। अरतिगृहीतश्च विसर्जयांबभूव राजलोकम्। अतिवल्लभानपि नालाप पार्श्वस्थान्। निमीलितलोचनो मुहुर्मुहुर्मनसा जगाम किंपुरुषविषयम्। अनन्यचेता

सस्मार हेमकूटस्य। निष्कारणबान्धवतामचिन्तयन्महाश्वेताप्रसादानाम्। जीवितफलमभिललाष पुनः पुनः कादम्बरीदर्शनम्। अपगताभिमानपेशलाय नितरामस्पृहयन्मदलेखापरिचयाय। तमालिकां द्रष्टुमाचकाङ्क्ष। केयूरकागमनमुत्प्रैक्षत। हिमगृहकमपश्यत्। उष्णमायतं पुनरुक्तं निशश्वास। बबन्ध चाधिकां प्रीतिं शेषहारे। पश्चात्स्थितां पुण्यभागिनीममन्यत पत्रलेखाम्। एवं चानुपजातनिद्र एव तामनयन्निशाम्। उषसि चोत्थाय, तस्य जरद्द्रविडधार्मिकस्येच्छया निसृष्टैर्धनविसरैः पूरयित्वा मनोरथमभिमतम्, अभिरमणीयेषु प्रदेशेषु निवसन्, अल्पैरेवाहोभिरुज्जायिनीमाजगाम।

आकस्मिकागमनप्रहृष्टसंभ्रान्तानां पौराणां नमस्काराञ्जलिसहस्राणि प्रतीच्छन्, अतर्कित एव विवेश नगरीम्। अहमहमिकया च प्रधावितादतिरभसहर्षरसविह्वलात्परिजनात् 'द्वारि देव, चन्द्रापीडो वर्तते' इत्युपलभ्य, अस्य पिता प्रहर्षनेत्रजलबिन्दुवर्षी, प्रत्यासन्नवर्तिभिः प्रतिपन्नासितेत्रच्छत्रकेतुचामरैरनुगम्यमानो राजसहस्रैः, चरणाभ्यामेव प्रत्युज्जगाम। दृष्ट्वा च पितरम्, दूरादेवावतीर्य वाजिनः, चूडामणिमरीचिमालिना मौलिना महीमगच्छत्। अथ प्रसारितभुजेन 'एह्येहि' इत्याहूय पित्रा सुचिरं गाढमुपगूढः, तत्कालसंनिहितानां च माननीयानां कृतनमस्कारः करे गृहीत्वा विलासवतीभवनमनीयत राज्ञा। तयापि तथैव सर्वान्तःपुरपरिवारया प्रत्युद्गम्याभिनन्दितागमनः, कृतागमनमङ्गलाचारः, दिग्विजयसंबद्धाभिरेव कथाभिः कंचित्कालं स्थित्वा शुकनासं द्रष्टुमाययौ। तत्राप्यमुनैव क्रमेण सुचिरं स्थित्वा, निवेद्य वैशम्पायनं स्कन्धावारवर्तिनं कुशलिनम्, आलोक्य च मनोरमाम्, आगत्य

विलासवतीभवन एव सर्वाः स्नानादिकाः परवश एव क्रिया निरवर्तयत् । अपराह्णे निजमेव भवनमयासीत् । तत्र च रणरणकखिद्यमानमानसः, कादम्बर्या विना न केवलमात्मानं स्वभवनमवन्तीनगरं सकलमेव महीमण्डलं शून्यममन्यत। ततो गन्धर्वराजपुत्रीवार्ताश्रवणोत्सुकैश्च महोत्सवमिवेप्सितवरप्राप्तिकालमिव पत्रलेखागमनं प्रत्यपालयत् ।

ततः कतिपयदिवसापगमे मेघनादः पत्रलेखामादायागच्छत् । उपानयच्चैनाम् । कृतनमस्कारां च दूरादेव स्मितेन प्रकाशितप्रीतिश्चन्द्रापीडः, प्रकृतिवल्लभामपि कादम्बरीसकाशात्प्रसादलब्धापरसौभाग्यामिव वल्लभतरतामुपागतामुत्थायातिशयदर्शितादरमालिलिङ्ग पत्रलेखाम्। मेघनादं च प्रणतं पृष्ठे करकिसलयेन पस्पर्श। समुपविष्टश्चाब्रवीत् — 'पत्रलेखे, कथय—तत्रभवत्या महाश्वेतायाः समदलेखाया देव्याः कादम्बर्याश्च कुशलम्? कुशली वा सकलस्तमालिकाकेयूरकादिः परिजनः?' इति। साब्रवीत्—'देव, यथाज्ञापयसि, भद्रम् । त्वामर्चयति शेखरीकृताञ्जलिना ससखीजना सपरिजना देवी कादम्बरी' इत्येवमुक्तवतीं पत्रलेखामादाय, मन्दिराभ्यन्तरं विसर्जितराजलोको विवेश। तत्र चोत्ताम्यता मनसा धारयितुमपारयन्कुतूहलमतिप्रीत्या, दूरमुत्सारितपरिजनः प्रविश्य, कस्यचित्पत्रमण्डपस्य तले चरणारविन्देन समुत्सार्य सुखप्रसुप्तं हंसमिथुनमुपविश्याप्राक्षीत्—'पत्रलेखे, कथय—कथमसि स्थिता? कियन्ति वा दिनानि? कीदृशो वा देवीप्रसादः? का वा गोष्ठ्यः समभवन्? कीदृश्यो वा कथाः समजायन्त? को वातिशयेनास्मान्स्मरति? कस्य वा गरीयसी प्रीतिः?' इत्येवं पृष्टा च व्यजिज्ञपत्—'देव, दत्तावधानेन श्रूयताम्—

ततः खल्वागते देवे, केयूरकेण सह प्रतिनिवृत्याहं तथैव कुसुमशयनीयसमीपे समुपाविशम्। अतिष्ठं च सुखं नवनवाननुभवन्ती देवीप्रसादान्। किं बहुना। प्रायेण मम चक्षुषि चक्षुः, वपुषि वपुः, करे करपल्लवः, नामाक्षरेषु वाणी, प्रीतौ हृदयम्, देव्याः सकलमेव तं दिवसमभवत्। अपराह्णे च मामेवावलम्ब्य, निष्क्रम्य हिमगृहकात्, संचरन्ती यदृच्छया निषिद्धपरिजना वल्लभबालोद्यानं जगाम। तत्र सुधाधवलां मरकतसोपानमालया प्रमदवनवेदिकामध्यारोहत्। तस्यां च मणिस्थूणावष्टम्भा स्थिता। स्थित्वा च मुहूर्तमिव हृदयेन सह दीर्घकालमवधार्य, किमपि व्याहर्तुमिच्छन्ती, निश्चलधृततारकेण निस्पन्दपक्ष्मणा चक्षुषा मुखं मे सुचिरं व्यलोकयत्।

अथ मया विदिताभिप्रायया 'आज्ञापय' इति विज्ञापिते, निजावयवैरपि वेपथुमद्भिर्निवार्यमाणेव, रहस्यश्रवणलज्जयात्मप्रतिमामपि लिखितमणिकुट्टिमेन चरणाङ्गुष्ठेनापक्रमायेवामृशन्ती, वनदेवताश्रवणशङ्कितेव मुहुर्मुहुरितस्ततो विलोकयन्ती, वक्तुकामापि न शक्नोति स्म किंचिदपि लज्जाकलितगद्गदा गदितुम्। केवलं दुःखसहस्रगणनाय मुक्ताक्षमालिकामिव कल्पयन्ती गलद्भिरस्पृष्टकपोलस्थलैः शुचिभिरधोमुखी नयनजलबिन्दुभिर्दुर्दिनमदर्शयत्। तदा च तस्याः सकाशादशिक्षतेव लज्जापि लज्जालीलाम्, विनयोऽपि विनयातिशयम्, मुग्धतापि मुग्धताम्, वैदग्ध्यमपि वैदग्ध्यम्, भयमपि भीरुताम्, विलासोऽपि विलासम्। तथाभूता च 'देवि, किमिदम्' इति विज्ञापिता मया, प्रमृज्य लोहितायमानोदरे लोचने, वेदिकाकुसुमपालिकाग्रथितकुसुममालामवलम्ब्य, समुन्नतैकभ्रूलता मृत्युमार्गमिवालोकयन्ती, दीर्घ-

मुष्णं च निःश्वसितवती। तद्दुःखकारणमुत्प्रेक्षमाणया च कथनाय पुनःपुनरनुबध्यमाना मया, व्रीडया नखमुखलिखितकेतकीदला लिखित्वेव वक्तव्यमर्पयन्ती, विवक्षास्फुरिताधरा क्षितितलनिहितनिश्चलनयना सुचिरमतिष्ठत्।

क्रमेण च भूयो मन्मुखे निधाय दृष्टिम्, कथमपि व्याहाराभिमुखमात्मानमकरोत्। अब्रवीच्च माम्—'पत्रलेखे, वल्लभतया तस्मिन्स्थाने न तातः, नाम्बा, न महाश्वेता, न मदलेखा, न जीवितम्, यत्र मे भवती। दर्शनात्प्रभृति प्रियासि। न जाने, केनापि कारणेनापहस्तितसकलसखीजनं त्वयि विश्वसिति मे हृदयम्। कमपरमुपालभे। कस्य वान्यस्य कथयामि परिभवम्। केन वान्येन सह साधारणीकरोमि दुःखम्। दुःखभारमिममसह्यं निवेद्य भवत्यास्त्यक्ष्यामि जीवितम्। जीवितेनैव शपामि ते। स्वहृदयेनापि विदितवृत्तान्तेनामुना जिह्रेमि, किमुतापरहृदयेन। कथमिव मादृशी रजनिकरकिरणावदातं कौलीनेन कुलं कलङ्कयिष्यति। कुलक्रमागतां च लज्जां परित्यक्ष्यति। अकन्यकोचिते वा चापले चेतः प्रवर्तयिष्यति। साहं न संकल्पिता पित्रा। न दत्ता मात्रा। नानुमोदिता गुरुभिः। न किंचित्संदिशामि। न किंचित्प्रेषयामि। नाकारं दर्शयामि। कातरेवानाथेव बलादवलिप्तेन गुरुगर्हणीयतां नीता कुमारेण चन्द्रापीडेन। कथय, महतां किमयमाचारः? किं परिचयस्येदं फलम्? यदेवमभिनवबिसकिसलयतन्तुसुकुमारं मे मनः परिभूयते। अपरिभवनीयो हि कुमारिकाजनो यूनाम्। प्रायेण प्रथमं मदनानलो लज्जां दहति, ततो हृदयम्। आदौ विनयादिकं कुसुमेषुशराः खण्डयन्ति, पश्चान्मर्माणि। तदामन्त्रये

भवतीं पुनर्जन्मान्तरसमागमाय। न हि मे त्वत्तोऽन्या प्रियतरा। प्राणपरित्यागप्रायश्चित्ताचरणेन प्रक्षालयाम्यात्मनः कलङ्कम्' इत्यभिधाय तूष्णीमभूत्।

अहं तु यत्सत्यमविदितवृत्तान्ततया ह्रीतेव भीतेव विलक्षेव विसंज्ञेव सविषादं विज्ञापितवती — 'देवि, श्रोतुमिच्छामि। आज्ञापय, किं कृतं देवेन चन्द्रापीडेन। को वापराधः समजनि। केन वा खल्वविनयेन खेदितमखेदनीयं देव्याः कुमुदकोमलं मनः। श्रुत्वा प्रथममुत्सृष्टजीवितायां मयि पश्चात्समुत्स्रक्ष्यसि जीवितम्' इत्येवमभिहिता च पुनरवदत् — 'आवेदयामि ते। अवहिता शृणु। स्वप्नेषु प्रतिदिवसमागत्यागत्य मे रहस्यसंदेशेषु निपुणधूर्तः पञ्जरशुकशारिका दूतीः करोति। सुप्तायाः श्रवणदन्तपत्रोदरेषु व्यर्थमनोरथमोहितमानसः संकेतस्थानानि लिखति। उपवनेष्वेकाकिन्या ग्रहणभयपलायमानायाः पल्लवलग्नांशुकदशाप्रतिहतगमनाया मिथ्याप्रगल्भः पराङ्मुख्याः परिष्वङ्गमाचरति। शीतलैर्मुखमरुद्भिः श्रमजलशीकरतारकितावलीकचाटुकारः कपोलौ वीजयति। भवनाशोकताडनोद्यतान्पादप्रहारान्दुर्बुद्धिविडम्बितः शिरसा प्रतीच्छति। मन्मथमूढमानसस्य कथय, हे पत्रलेखे, केन प्रकारेण निश्चेतनो निषिध्यते। प्रत्याख्यानमपीर्ष्यां संभावयति। आक्रोशमपि परिहासमाकलयति। असंभाषणमपि मानं मन्यते। दोषसंकीर्तनमपि स्मरणोपायमवगच्छति। अवज्ञानमप्यनियन्त्रणप्रणयमुत्प्रेक्षते। लोकापवादमपि यशो गणयति' इति।

तामेवंवादिनीमाकर्ण्य, प्रहर्षरसनिर्भरा विहस्याब्रवम् — 'देवि, यद्येवम्, उत्सृज कोपम्। प्रसीद। नार्हसि कामापराधैर्देवं दूषयितुम्।

एतानि खलु कुसुमचापस्य चापलानि शठस्य न दैवस्य' इत्येवमुक्तवतीं मां पुनः सकुतूहला सा प्रत्यभाषत—'योऽयं कामः, कोऽपि वा, कथय, कानि कान्यस्य रूपाणि' इति। तामहं व्यजिज्ञपम्—'देवि, कुतोऽस्य रूपम्। अतनुरेष हुताशनः। तथा हि—अप्रकाशयन् ज्वालावलीः संतापं जनयति। अप्रकटयन्धूमपटलमश्रु पातयति। न च तद्भूतमेतावति त्रिभुवने, अस्य शरशरव्यतां यन्न यातं याति यास्यति वा। को वास्य भ्रश्यति। गृहीतकुसुमकार्मुको बाणैर्बलवन्तमपि विध्यति। अपि चानेनाधिष्ठितानां कामिनीनां पश्यन्तीनां चिन्तया प्रियमुखचन्द्रसहस्राणि, संकटमम्बरतलम्। लिखन्तीनां दयिताकारान्, अविस्तीर्णं महीमण्डलम्। गणयन्तीनां वल्लभगुणान्, अल्पीयसी संख्या। शृण्वतीनां प्रियतमकथाम्, अबहुभाषिणी सरस्वती। ध्यायन्तीनां प्राणसमसमागमशतानि, ह्रसीयान्कालो हृदयस्यापतति' इति।

एतदाकर्ण्य च, क्षणं विचिन्त्य, प्रत्यवादीत्—'पत्रलेखे, यथा कथयसि, तथा जनोऽयं कारितः कुमारे पक्षपातं पक्ष्मणा। यान्यस्यैतानि रूपाणि, समधिकानि वा, तानि मयि वर्तन्ते। हृदयादव्यतिरिक्तासि। इदानीं भवतीमेव पृच्छामि। उपदिश त्वम्, यदत्र मे सांप्रतम्। एवंविधानां वृत्तान्तानामनभिज्ञास्मि। अपि च, मे गुरुजनवक्तव्यतां नीताया नितरां लज्जिताया जीवितान्मरणमेव श्रेयः पश्यति हृदयम्' इति।

एवंवादिनीं भूयस्तामहमेवमवोचम्—'अलमलमिदानीं देवि, किमनेनाकारणमरणानुबन्धेन। अनाराधितप्रसन्नेन कुसुमशरेण भग-

वता ते वरो दत्तः। का चात्र गुरुजनवक्तव्यता? यदा खलु कन्यकां गुरुरिव पञ्चशरः संकल्पयति, मातेवानुमोदते, पितेव ददाति, सखीवोत्कण्ठां जनयति, धात्रीव तरुणतायां रत्युपचारं शिक्षयति। कति वा कथयामि ते, याः स्वयं वृतवत्यः पतीन्। यदि च नैवम्, अनर्थक एव तर्हि धर्मशास्त्रोपदिष्टः स्वयंवरविधिः। तत्प्रसीद। देवि, अलममुना मरणानुबन्धेन। शपे ते पादपङ्कजस्पर्शेन। संदिश, प्रेषय माम्। यामि, आनयामि देवि, ते हृदयदयितम्' इति।

एवमुक्ते मया, प्रीतिद्रवार्द्रया दृष्ट्या पिबन्तीव मां प्रहर्षविह्वलान्तःकरणापि कन्यकाजनसहजां लज्जामिवावलम्ब्य शनैरवदत्—'जानामि ते गरीयसीं प्रीतिम्। केवलमकठोरशिरीषपुष्पमृदुप्रकृतेः कुतः प्रागल्भ्यमेतावन्नारीजनस्य, विशेषतो बालभावभाजः कुमारीलोकस्य। मन्ये साहसकारिण्यस्ताः, याः स्वयं संदिशन्ति समुपसर्पन्ति वा। स्वयं साहसं संदिशन्ती बाला जिह्रेमि। किं वा संदिशामि? अतिप्रियोऽसीति, पौनरुक्त्यम्। तवाहं प्रियास्मीति, जडप्रश्नः। त्वयि गरीयाननुराग इति, वेश्यालापः। त्वया विना न जीवामीति, अनुभवविरोधः। अवश्यमागन्तव्यमिति, सौभाग्यगर्वः। स्वयमागच्छामीति, स्त्रीचापलम्। अनन्यरक्तोऽयं परिजन इति, स्वभक्तिनिवेदनलाघवम्। प्रत्याख्यानशङ्कया न संदिशामीति, अप्रबुद्धबोधनम्। ज्ञास्यसि मरणेन प्रीतिमिति, असंभाव्यमेव।

॥ श्रीः ॥

॥ कादम्बरीसंग्रहः ॥

॥ उत्तरभागः ॥

अपि च, इदानीमानीतस्यापि कुमारस्य न ददाति तरलताल-ज्जिता लज्जैव दर्शनम्। अप्रतिपत्तिसाध्वसजडा जडतैव नोपसर्पति। बलात्तदानयनापराधभीता भीतिरेव न संमुखीभवति। अथ कथंचिद्गुरुजनत्रपया वा, राजकार्यानुरोधेन वा, पुनरागमनखेदपरिजिहीर्षया वा, जन्मभूमिस्नेहेन वा, अनिच्छया वास्य जनस्योपरि, पादपतनेनापि नानेतुमेव पारितो यदा मयि स्नेहात्कृतप्रयत्नयापि प्रियसख्या, तदा सुतरामेव न किंचित्। किं वाधुनाभ्यधिकमुपजातम्? सैवाहं कादम्बरी, यानेन कुमारेण हिमगृहे कुसुमस्रस्तरावलम्बिनी वीक्षिता। तदेव चेदमप्रतिपत्तिशून्यं हतहृदयम्, येनान्तः प्रविष्टोऽपि न पारितो धारयितुम्। स एव चायं पाणिः, योऽलीकगुरुजनापेक्षी नात्मानं परिग्राहितवान्। अनपेक्षितपरपीडश्चन्द्रापीडोऽपि स एव, योऽत्र वारद्वयमागत्य प्रतिगतः। मय्येवोपक्षीणमार्गणतया चाकिंचित्करोऽन्यत्र पञ्चशरोऽपि स एव, यस्त्वयावेदितो मे।

प्रतिज्ञातं च मया महाश्वेतायाः—'त्वयि दुःखितायाम्, नाहमात्मनः पाणिं ग्राहयिष्यामि' इति। सा तु 'सखि, मैवं स्म मनसि

करोः। कुमतिरियम्। अतिदारुणोऽयं पापकारी मकरकेतुः कदाचिददृश्यमाने प्रियजने, जनितहृदयानुरागो जीवितमप्यपहरति' इत्यब्रवीत्। एतदपि नास्त्येव मे। मदनेन वा, दैवेन वा, हृदयेन वा, अन्येन वा केनापि दत्तः संकल्पमयः कुमारो जनसंनिधावपि केनचिदविभाव्यमानः, सिद्ध इव सर्वदा मे ददाति दर्शनम्। अपि च, असाविव नायमकाण्डपरित्यागनिष्ठुरहृदयः। अयमेवास्मद्विरहैकातरः। पश्यामि चाहर्निशमासीना उत्थिता भ्राम्यन्ती शयाना जाग्रती शयने मण्डपे उद्यानेषु क्रीडापर्वतके च यथा तं विप्रलम्भकं कुमारम्, ते तथा कथितमेव मया। तदलमनया तदानयनकथया' इत्यभिदधाना, पक्ष्माग्रसंपिण्डितनयनजलवर्षिणी, तथैव वेदिकावितानाभिदामांशुकावलम्बिन्यां बाहुलतिकायामाननमुपावेश्य तूष्णीमुत्कीर्णेव तस्थौ।

अहं तु तच्छ्रुत्वा समचिन्तयम् — 'सत्यमेव गरीयः खलु जीविताालम्बनमिदम्, विनोदश्च वियोगिनीनाम् — यदुत संकल्पमयः प्रियः, नितरां कुलाङ्गनानां विशेषतः कुमारीणाम्। नैनमन्धकारराशिरन्तरयति। न जलधरधारापातः स्थगयति' इत्येवं चिन्तयन्त्या एव मे रक्ततामगाद्दिवसः।

अत्रान्तरे चागत्य स्वं स्वं नियोगमशून्यं कुर्वाणाः, दूरतो दीपिकाधारिण्यो बालिकाः पर्यवारयन्। अथ निर्मललावण्यलक्षितानि दीपिकाप्रतिबिम्बानि ज्वलितानि मदनसायकशल्यानीवाङ्गलग्नानि समुद्वहन्तीं तां पुनर्व्यजिज्ञपम् — 'देवि, प्रसीद। नार्हस्यखेदार्हा हृदयखेदकारिणं संतापमङ्गीकर्तुम्। संहर मन्युवेगम्। एषाहमादाय चन्द्रापीडमागतैव' इति। अथानेन देवनामग्रहणगर्भेण मद्वचसा विषापहर-

णमन्त्रेणेव विषमूर्छिता झटित्युन्मील्य नयने सस्पृहं मामवलोक्य, 'कः प्रदेशोऽस्मिन्' इति परिजनमपृच्छत्।

अथ धवलवसनोल्लासितगात्रयष्टयो द्वारप्रदेशसंपिण्डिताङ्ग्यः कन्यकाः समधावन्। आज्ञाप्रतीक्षासु च तासु क्रमेण दृष्टिं पातयन्ती मरकतशिलातले न्यषीदत्। अब्रवीच्च — 'पत्रलेखे, न खलु प्रियमिति ब्रवीमि। त्वामेव पश्यन्ती संधारयामि जीवितमहम्। तथापि यद्ययं ते गृहः, तत्साधय समीहितम्' इत्यभिधाय मां व्यसर्जयत्'।

इत्यावेद्य च, किंचिदिव नमितमुखी शनैः पुनर्व्यजिज्ञपत् — 'देव, प्रत्यग्रदेवीप्रसादातिशयाहितप्रागल्भ्या दुःखिता च विज्ञापयामि। देवेनाप्येतदवस्थां देवीं दूरीकुर्वता किमिदमापन्नवत्सलायाः स्वप्रकृतेरनुरूपं कृतम्' इति। चन्द्रापीडस्तु तथोपालम्भगर्भं विज्ञप्तः पत्रलेखया, तं च कादम्बर्याः साभ्यर्थनं च सनिर्वेदं च सानुरागं च सोपालम्भं च ललितमपि प्रौढमालापमाकर्ण्य, उत्प्रेक्ष्योत्प्रेक्ष्य च दुर्विषहदुःखबाष्पोपप्लुतायताक्षं तन्मुखम्, स्वभावधीरप्रकृतिरपि नितरां पर्याकुलोऽभवत्।

अथ कादम्बरीशरीरादिवालापपदैरेव सहागत्य युगपद्गृहीतो हृदये मन्युना, कण्ठे जीवितेन, चक्षुषि च बाष्पेण, तुल्यवृत्तिर्भूत्वा कादम्बर्याः, क्षरद्बाष्पविक्षेपपर्याकुलाक्षरमुच्चैः प्रत्युवाच — 'पत्रलेखे, किं करोमि। अनेन दुरात्मना दुःशिक्षितेन पण्डितंमन्येन अलीकधीरेण स्वयंकृतमिथ्याविकल्पशतसहस्रभरितेनाश्रद्दधानेन मूढहृदयेन, यद्यदेवानेकप्रकारं शृङ्गारनृत्ताचार्येण भगवता मनोभवेनान्तर्गतविकारसंवेदनाय मामुद्दिश्य बाला बलात्कार्यते तत्तदेवादृष्टपूर्वत्वाद्दिव्यकन्यकानां

रूपानुरूपलीलासंभावनया च तावतो मनोरथस्याप्यात्मन उपर्यसंभावनया च सर्वं सहजमेवैतदस्या इति विकल्पसंशयदोलाधिरूढं मां ग्राहयता, एवमीदृशस्य देव्या दुःखस्य तव चोपालम्भस्य हेतुतां नीतोऽस्मि । मन्ये च, ममापि मनोव्यामोहकारी कोऽपि शाप एवायम् । अन्यथा अप्रबुद्धबुद्धेरपि येषु न संदेह उपपद्यते, तेष्वपि स्फुटेषु मदनचिह्नेषु कथं मे धीर्व्यामुह्येत् । तिष्ठन्त्वेव तावदतिसूक्ष्मतया दुर्विभाववृत्तीनि तानि स्मितावलोकितकथितविहृतलीलालज्जायितानि, यान्यन्यथापि संभवन्ति । चिरानुभूतात्मकण्ठसंसर्गसुभगं हारमिममकृतपुण्यस्य मे तत्क्षणमेव कण्ठे कारयन्त्या किमिव नावेदितम् । अपि च, हिमगृहकवृत्तान्तस्तु तवापि प्रत्यक्ष एव । तत्किमत्र प्रणयकोपाक्षिप्तयाप्यन्यथा व्याहृतं देव्या । सर्व एवायं विपर्ययान्मम दोषः । तदधुना प्राणैरप्युपयुज्यमानस्तथा करोमि, यथा नेदृशमेकान्तनिष्ठुरहृदय जानाति मां देवी' इति ।

एवं वदत्येव चन्द्रापीडे, अश्राविर्तैव प्रविश्य वेत्रहस्ता प्रतीहारी कृतप्रणामा व्यज्ञापयत् — 'युवराज, एवं देवी विलासवती समादिशति — कृतजल्पात्परिजनतः श्रुतं मया, यथा किल — पृष्ठतः स्थिताद्य पत्रलेखात्र पुनः परागतेति । न च मे त्वय्यस्यां च कश्चिदपि स्नेहस्य विशेषो विलसति । मयैवेयं संवर्धिता । अपि च, तवापि कापि महती वेला वर्तते दृष्टस्य । तदनया सहित एवागच्छ । मनोरथशतलब्धमतिदुर्लभं ते मुखकमलालोकनम्' इति ।

चन्द्रापीडस्तु तदाकर्ण्य, चेतस्यकरोत् — 'अहो संदेहदोलारूढं मे जीवितम् । एवमम्बा निमेषमपि मामपश्यन्ती दुःखमास्ते । पत्रलेखा-

मुखेन चैवमाज्ञापितमागमनाय मे निष्कारणवत्सलेन देवीप्रसादेन। आजन्मक्रमाहितो बलवाञ्जननीस्नेहः। वाञ्छाकुलं हृदयम्। अमोच्यं तातचरणशुश्रूषासुखम्। प्रमाथी मन्मथहतकः। हारिणी गुरुजनलालना। 'दुःसहान्युत्कण्ठितानि। कालातिपातासहं मनः। विप्रकृष्टमन्तरं हेमकूटविन्ध्याचलयोः' इत्येवं चिन्तयन्नेव प्रतीहार्योपदिश्यमानवर्त्मा, पत्रलेखाकरावलम्बी, जननीसमीपमगात्। तत्रैव च तमनेकप्रकारजननीलालनसुखाचिन्तितदुर्विपहहृदयोत्कण्ठं दिवसमनयत्।

उपनतायां चात्मचिन्तायामिवान्धकारितदशदिशि शर्वर्याम्, शयनवर्ती निमीलितलोचनोऽप्यप्राप्तनिद्राविनोदः, मनसा सस्मार स्मरायतनभूतस्य कादम्बरीरूपस्य। उत्पन्नात्मीयबुद्धिश्च निर्भरस्नेहार्द्रचेताः, तत एव वासरादारभ्य तां प्रति गृहीतरक्षापरिकर इव, यतो यत एव मण्डलितकुसुमकार्मुकं मकरध्वजमस्या प्रहरन्तमालोकितवान्, ततस्तत एवात्मानमन्तरेऽर्पितवान्। सह्यते हृदयेन वेदना न वेति तद्वार्ता प्रष्टुमिव नियुक्तेन मनसा शून्यतामधार्षीत्। तत्प्रतिवार्ताकर्णनायेव च गृहीतमौनः सर्वदैवातिष्ठत्। तदाननालोकनान्तरितमिव सर्वमेव नाद्राक्षीत्। भावावगमभीत्येव यथापूर्वं न कस्यचिद्दर्शनमदात्। अनवरतमुक्तज्वालेन मदनहुतभुजान्तर्दह्यमानोऽपि गुरुजनत्रपया न सद्यः समुद्धृतार्द्रारविन्दशयनमभजत। नाभ्यानहरिचन्दनरसचर्चामप्या चरणाददापयत्।

एवमेव केवलं रात्रौ दिवा चाकृतनिर्वृतिः, निष्प्रतिक्रियतया अतिविसंष्ठुलेनायास्यमानोऽपि मनसिजेन, आकारमेव लोकलोचनेभ्योऽरक्षत्; न कुसुमशरसायकेभ्यो जीवितम्। तनोरेव तानवमङ्गीचकार;

न लज्जायाः। शरीरस्थितावेवानादरं कृतवान्; न कुलक्रमस्थितौ। सुखमेवावधीरयामास; न धैर्यम्। एवं चास्य गम्भीरप्रकृतेः सरित्पतेरिव चन्द्रमसा सुदूरमुल्लास्यमानस्यापि मर्यादावशादात्मानं स्तम्भयतः, कथंकथमपि कतिपयेष्वतिक्रान्तेषु वासरेषु, एकदा निर्गत्य बहिर्नगर्याः, सिप्रातटान्यनुसरन्नातिदूरमिव चरणाभ्यामेव बभ्राम। भ्राम्यंश्च रुद्रतनयायतनम्, रयेणागच्छतः सावष्टम्भया गत्या, स्खलतोऽपि पततोऽपि यथाशक्ति सादिभिरुत्पीडितान्, निःसहतया दूरागमनखेदम् अतित्वरया आगमनकार्यगौरवमावेदयतो दूरादेवातिबहूनिव तुरंगमानद्राक्षीत्। दृष्ट्वा चोत्पन्नकुतूहलः, तेषां परिज्ञानायान्यतमं पुरुषं प्राहिणोत्। आत्मनाप्यूरुदघ्नेन पयसोत्तीर्य सिप्राम्, तस्मिन्नेव भगवतः कार्तिकेयस्यायतने तत्प्रतिवार्तां प्रतिपालयन्नतिष्ठत्।

तत्रस्थश्च कुतूहलात्तस्मिन्नेव वाजिबृन्दे निक्षिप्तदृष्टिः, पार्श्वस्थितां हस्तेनाकृष्य पत्रलेखामवादीत् — 'पत्रलेखे, पश्य, य एष पुर एव मयूरपिच्छमय्या छत्रिकया दुर्विभाववदनोऽश्ववारः, ज्ञायते केयूरकोऽयम्' इति। यावत्तया सहैवं निरूपयत्येव, तावत्तस्मात्प्रहितपुरुषादुपलब्धात्मावस्थानम्, विषादशून्येन मुखेनान्तर्दुःखसंभारपिशुनया च दृष्ट्या दूरत एवापृष्टामपि कष्टां कादम्बरीसमवस्थामनक्षरमावेदयन्तं केयूरकमद्राक्षीत्। दृष्ट्वा च दर्शितप्रीतिः 'एह्येहि' इत्याहूय परिष्वज्य, पुनः पुनः सस्पृहमालोक्य, केयूरकमवादीत् — 'केयूरक, त्वद्दर्शनेनैव भद्रं देव्याः सपरिवाराया इत्येतदावेदितम्। आगमनकारणमपि विश्रान्तः सुखितः कथयिष्यसि' इत्युक्त्वा करिणीमारुह्य, 'कुतोऽस्य जनस्य सुखिता' इत्यभिदधानमेव केयूरकं पृष्ठतः पत्र-

लेखां चारोप्य, स्वभवनमयासीत्। तत्र च निषिद्धाशेषराजलोकप्रवेशः, प्रविश्य बहुभोद्यानम्, सपरिवारेण केयूरकेण सहोत्ताम्यता चेतसा अचेतितमेव दिवसकरणीयं निर्वर्तयामास। निर्वर्त्य च पत्रलेखाद्वितीयः केयूरकमाहूयाब्रवीत्—'केयूरक, कथय देव्याः कादम्बर्याः समदलेखाया महाश्वेतायाश्च संदेशम्'।

इत्यभिहितवति चन्द्रापीडे, पुरः सप्रश्रयमुपविश्य, केयूरकोऽप्यगादीत् — 'देव, किं विज्ञापयामि। नास्ति मयि संदेशलवोऽपि देव्याः कादम्बर्याः, समदलेखाया महाश्वेताया वा। यदैव पत्रलेखां मेघनादाय समर्प्य, आगतेन प्रतिनिवृत्य मयायं देवस्योज्जयिनीगमनवृत्तान्तो निवेदितः, तदैवोर्ध्वं विलोक्य, दीर्घमुष्णं च निश्वस्य, सनिर्वेदम् 'एवमेतत्' इत्युक्त्वोत्थाय, महाश्वेता पुनस्तपसे स्वमेवाश्रमपदमाजगाम। देव्यपि कादम्बरी झटिति हृदये द्रुघणेनेवाभिहता, उन्मुक्तेव चान्तःकरणेन, अविदितमहाश्वेतागमनवृत्तान्ता, चिरमिव स्थित्वा 'महाश्वेतायाः कथय' इति सासूयमिव मामादिश्य, मदलेखाया पुनर्वलितमुखी, सविलक्षस्मितम् 'मदलेखे, अस्ति केनचिदपरेणैतत्कृतं करिष्यते वा, यत्कुमारेण चन्द्रापीडेन' इत्येवमभिदधती, उत्थाय शयनीये निपत्य, उत्तरवाससोत्तमाङ्गमवगुण्ठ्य, निर्विशेषहृदयवेदनां मदलेखामप्यनालपन्ती, सकलमेव तं दिवसमस्थात्। अपरेद्युश्च प्रातरेवोपसृतं माम् 'एवं दृढतरशरीरेषु ध्रियमाणेष्वेव भवत्सु, अहमीदृशीमवस्थामनुभवामि' इत्युपालभमानेव चिरमालोकितवती। तथा दृष्टश्च दुःखितया देव्या, आदिष्टमेव गमनायात्मानं मन्यमानोऽहम्, अनिवेद्यैव देव्यै, देवपादमूलमुपागतोऽस्मि। तच्च देवैकशरणजनजीवितपरित्राणा-

कुलमतेः केयूरकस्य विज्ञापनाकर्णनावधानदानेन प्रसादं कर्तुमर्हति देवः । देव, श्रूयताम्—यदैव ते प्रथमागमनेनामोदिना मलयानिलेनेव चलितं समस्तमेव तत्कन्यकालतावनम्, तदैव सकलभुवनमनोभिरामं भवन्तमालोक्य समारूढवान्मकरकेतनस्ताम्। इदानीं तु महान्तमायासमनुभवति त्वदर्थे कादम्बरी। चित्रं चेदम्। मकरकेतुहुतभुजा दह्यमानमप्यग्निशौचमंशुकमिव नितरां निर्मलीभवति लावण्यम्। मन्ये च, मृदुस्वभावमपि जलमिव मुक्ताफलतामुपगतं कठिनीभवत्युत्कण्ठितं हृदयमबलाजनस्य; यत्तादृशेनातिसंतापेनापि न विलीयते। बलवती खलु वल्लभजनसंगमाशा; यत्तथाविधमप्यनुभववेदनाविह्वलितप्राणमतिकष्टं प्राण्यते। किं करोमि। कथय, कथं कथ्यते, कया युक्त्या प्रकाश्यते, कतमया वेदनयोपमीयते बलवती तदुत्कण्ठा। स्वप्नेषु विगलितवेदनाः स्फुटं प्राणिनः; प्रतिदिनं दृश्यमानोऽपि यन्न पश्यसि तामीदृशीमवस्थाम्। प्रचण्डकिरणसहस्रातपसहानि कमलानि शयनीकृतानि म्लानिमुपनयन्त्या दिवसकरमूर्तिरपि निर्जिता तया निजोष्मणा। मुहुर्लतामण्डपमधिवसति। मुहुः स्थलनलिनीवनमधिशेते। मुहुरुपवनसरोजलमवगाहते। तस्मादुत्थाय तमालवीथीमुपैति। एवंप्रायैश्च मदनदुश्चेष्टितायासैः परिणाममुपैति दिवसः।

चन्द्रोदये चास्यास्तिमिरमयीवापैति धृतिः। कमलमयमिव दूयते हृदयम्। कुमुदमय इव विजृम्भते मकरकेतनः। चन्द्रकान्तमयमिव प्रक्षरति नयनयुगलम्। न विज्ञायते, किं मुग्धतया, किमुन्मादेन, संगीतकमृदङ्गध्वनितेषु केकाशङ्कया धारागृहमरकतमणिमयूरमुखानि

स्थगयति । दिवसावसानेषु विश्लेषभीता मृणालसूत्रैश्चित्रभित्तिविलिखितानि चक्रवाकमिथुनानि संघटयति ।

अपि च, तस्याश्चन्दनपरिमल इव दक्षिणानिलेन सह समागच्छति मोहः । प्रतिरुतानीव वलभीकपोतकूजितैः सहाविर्भवन्ति दुःखानि । तथा च जलकणिकेव पद्मिनीपलाशस्थिता कम्पते । नलिनीव शशिकरस्पर्शेन म्लायति । चन्द्रमूर्तिरिव कमलप्रकरस्खलितपादपल्लवा संचरन्ती निशां नयति । कुमुदिनीव रजनिकरकिरणकृतप्रजागरा दिवसमलीकनिद्रयातिवाहयति । किं बहुना । संप्रति तस्याः, त्वन्नामा सर्वसखीजनः, त्वद्वृत्तान्तमुखरः परिजनः, त्वदालापनिर्मिताः सर्वविनोदाः, त्वदाकारमयश्चित्रकलाभ्यासः, त्वदुपालम्भगर्भा मागधीमङ्गलगीतयः, त्वद्दर्शनपुनरुक्ताः स्वप्नाः, त्वन्नामग्रहणैकोपायगम्यप्रबोधा मोहमहावेगाः' इत्यावेदयन्तं केयूरकम् 'भवतु, संप्रति न शक्नोम्यतः परं श्रोतुम्' इति आमीलनादत्तसंज्ञेव चन्द्रापीडमाक्रामन्ती मूर्च्छा न्यवारयत्; न तु पुनरवस्थानिवेदनपरिसमाप्तिः ।

तथा मूर्च्छानिमीलितश्च तामेवानुध्यायन्निव ससंभ्रमप्रतिपन्नशरीरेण केयूरकेण संभावितताल्वृन्तया च पत्रलेखयानुभाव्यार्थसज्जया च नियत्या संज्ञां लम्भितश्चन्द्रापीडः, स्वकृतपीडापराधेन भीतमिव लज्जितमिव निभृतस्थितं केयूरकमन्तर्बाष्पोपरुध्यमानकण्ठः कथमपि स्खलिताक्षरं प्रत्युवाच —'केयूरक, येन प्रकारेणैवमेकान्तनिष्ठुरहृदयमात्मन्यनुत्पन्नानुरागमेव मां संभाव्य देव्या कादम्बर्या दूरीकृतपुनर्मदागमनसंभावनया न त्वमागमनायादिष्टः, न संदिष्टं वा किंचिन्महाश्वेतया समुपहृतानुबन्धया, मदलेखया वा त्वन्मुखेन नोपालब्धोऽस्मि, तथा मयि

पत्रलेखया सर्वमाख्यातम्। तदभिजाततया दक्षिणतया चात्मानमात्मना न कलयति देवी कादम्बरी। चन्द्रमूर्तेरालोकेन निश्चेतनस्य चन्द्रकान्ताख्यस्य पाषाणखण्डस्यार्द्रभावोपगमनमेवायत्तम्, न पुनस्तत्कराकर्षणम्। तत्र देव्याः कादम्बर्या एवाज्ञापराधिनी, ययाधरस्पन्दितमात्रप्रतीक्षे पुरःस्थायिनि दासजने निष्करुणतयात्मानमव्यापारयन्त्या परहृदयपीडानपेक्षिणी लज्जापेक्षिता, न जीवितसंदेहदायिनी देव्याः समवस्था। अथवा देव्याः परिजनस्यापि कोऽयमेवंविधो व्यामोहः; यदनिच्छन्त्यपि बलादसौ न व्यापारिता। कीदृशी चरणतलप्रतिबद्धस्य दासजनस्योपरि लज्जा। कीदृशं वा गौरवम्। अथवा क्रमागतमन्तर्धानं वामलोचनानाम्, विशेषतः कन्यकानाम्। लज्जा न पारिता नामास्मिञ्जने स्वयं परित्यक्तुं देव्या। मदलेखा तु द्वितीयं हृदयमस्याः। तया किमेवमहार्यसंयमधनैर्मुनिभिरप्यरक्षितहृदयापहारेणानिग्राह्यचौरेण कामेन दुरात्मनायास्यमानं देवीशरीरमुपेक्षितम्। किमिति तत्रस्थस्यैव मे कर्णे नावेदितम्। अधुना श्रुत्वापि दिवसक्रमगम्येऽध्वनि किं करोमि। यथा चास्य हतविधेः सर्वतो विसंष्ठुलं समारम्भं पश्यामि, तथा जानामि, नैवायमेतावता स्थास्यतीति। अन्यथा क्व निष्प्रयोजनाश्वमुखमिथुनानुसरणेनामानुपभूमिगमनम्। क्व च तत्र तृषितस्यच्छोददर्शनम्। क्व तत्तीरे विश्रान्तस्यामानुपगीतध्वनेराकर्णनम्। क्व तज्जिज्ञासागतस्य महाश्वेतावलोकनम्। क्व महाश्वेतया सह हेमकूटगमनम्। क्व तत्र देवीवदनदर्शनम्। क्व वा अपरिपूर्णमनोरथस्य मे पितुरलङ्घनीया आगमनाज्ञा। तत्सुदूरमारोप्य

पातिता वयं खल्वनेनाकार्यकारिणा दग्धवेधसा । तथापि देवीं संभावयितुं प्रयतामहे' ।

इत्यभिदधत्येव चन्द्रापीडे, भगवांस्तिग्मदीधितिः संजहार करसहस्रम् । अथ भगवति चन्द्रमसि उदयगिरिशिखरमारूढे, चन्द्रापीडस्तस्मिन्नेव वल्लभोद्याने चन्द्रमणिशिलातले विमुच्याङ्गानि, चरणसंवाहनोपसृतं केयूरकमवादीत्—'केयूरक, किमाकलयसि । यावद्वयं परापतामः, तावत्प्राणान्संधारयिष्यति वा देवी कादम्बरी । आगमिष्यति वा पुनस्तत्समाश्वासनाय महाश्वेता । द्रक्ष्यामि वा पुनस्तस्याः समुत्त्रस्तहरिणशावकायताक्षं मुखम्' इति ।

एवं वदन् , तमादिदेश विश्रान्तये केयूरकम् । आत्मनापि गमनचिन्तां प्राविशत् 'यदि तावदकथयित्वा अनिपत्य चरणयोरगृहीताशीः सहसानुत्संकलित एव तातेनाम्बया वापक्रम्य गच्छामि, ततो गतस्यापि मम कुतो वा फलावाप्तिः, कीदृशी वा हृदयनिर्वृतिः । अथवा तिष्ठतु तावदियमुत्तरकालागामिनी चिन्ता । अपक्रम्य गत एव कथमहम् । तातेन स्वभुजादवरोप्य मय्येव राज्यभारः समारोपितः । तदनाख्याय पदमपि निर्याते मयि, अवश्यं सेवापरा राजानः, सुखपरिभुक्ताः प्रजा अपि, पृष्ठतो लगन्तीति मे चेतसि । अपि च, तातस्यापि कोऽपरोऽस्ति, यस्मिन्मदीयं स्नेहं संक्रमय्य, मय्यपक्रान्ते, 'यातु किमनेन गतेनागतेन वा' इत्यविनयकोपितोऽवष्टम्भं कृत्वा स्थास्यति । ताते च पृष्ठतो लग्ने, अष्टादशद्वीपमालिनी मेदिन्येवलग्ना भवति । तदा मया क्व गतम् । क्व स्थितम् । क्व विश्रान्तम् । क्व भुक्तम् । क्वात्मा मया गोपायितव्यः । समासादितेन वात्र कथं मया

वदनं दर्शयितव्यम् । पृष्टेन वा किमुत्तरं दातव्यम् । अपि च, सुबहुदिवसप्रवासोपतप्तः स्कन्धावारोऽपि मेऽद्यापि न परापतति । तेनापरसंविधानादर्धपथादेव निवृत्य पुनर्धावितव्यम् । अथावेद्य तातस्याम्बायाश्च, ताभ्यां च विसर्जितः, संविधानेन गच्छामि । तत्रापि किं कथयामि—मम स्नेहेन गन्धर्वराजपुत्री कादम्बरी दुःखं तिष्ठतीति, किं वा बलवान्मे तस्यामनुरागः, नानया विनाहं प्राणान्संधारयामीति । अपरोऽपि वा कश्चिद्व्यपदेशो न शक्यत एव पुनर्गमनाय कर्तुम् । अकथयित्वा च गमनकारणम्, कथमात्मानं मोचयामि । कथं वा मुञ्चतु तातोऽम्बा वा । तत्सुहृत्साध्येऽस्मिन्नर्थेऽनर्थपतितः किं करोम्येकाकी । वैशम्पायनोऽप्यसंनिहितः पार्श्वे मे । कं पृच्छामि । केन सह निरूपयामि । को मे समुपदिशतु । को वापरो मयि दुःखिते दुःखी, सुखिते सुखी । को वापरो मयानुकोपितं तातमम्बां च परिबोध्य मां नेतुं समर्थः' इति ।

एवं चिन्तयत एवास्य सा क्षपा दुःखदीर्घापि क्षयमगमत् । प्रातरेव च किंवदन्तीं शुश्राव, यथा किल — दशपुरं यावत्परागतः स्कन्धावार इति । तां च श्रुत्वा, समुच्छ्वसितचेताश्चकार चेतसि—'अहो धन्योऽस्मि, अहो विधेर्भगवतोऽनुग्राह्योऽस्मि, यस्य मेऽनुध्यानानन्तरमेव परागतो द्वितीयं हृदयं वैशम्पायनः' इति । प्रहर्षपरवशश्च प्रविशन्तमालोक्य दूरत एव कृतप्रणामं केयूरकमवादीम्—'केयूरक, करतलवर्तिनीं सिद्धिमधुनावधारय । प्राप्तो वैशम्पायनः' इति ।

स तु तदाकर्ण्य, गमनपरिलम्बकृतया चिन्तयान्तःशून्य एव 'भद्रकमापतितम् । महती हृदयनिर्वृतिर्देवस्य जाता' इत्यभिदधदेवोपसृ-

त्योपविश्य, चन्द्रापीडं व्यज्ञपयत्—'देव, उपदर्शितपाण्डुच्छविः प्राचीव चन्द्रोदयमवस्थैवेयमावेदयति निःसंशयं देवस्य गमनम्। अवश्यं च देवस्य देवीप्राप्त्या भवितव्यम्। केन कदावावलोकितो ज्योत्स्नारहितश्चन्द्रमाः। किंतु यावद्वैशम्पायनः परापतति, यावच्च तेन सह गमनसंविधानं निरूपयति देवः, तावदवश्यं कालक्षेपेण भाव्यम्। यादृशी चाकालक्षमा देव्याः शरीरावस्था, तादृशी निवेदितैव मया। सर्वोऽपि प्रत्याशया धार्यते। देव्यास्तु पुनर्देवदर्शनेऽद्य यावन्निष्प्रत्याशमेव हृदयं केनाश्वासनेन वर्तताम्। मद्वार्तोपलम्भादेतदुत्पत्स्यते चेतसि, यथा—'अस्ति कार्यं मे जीवितेन। दुःखान्यपि सहन्ती धारयाम्येतत्' इति। अतो विज्ञापयामि। चेतसा त्वग्रतो गत एव देवः, शरीरेणाप्यनुपदमुच्चलित एव। किमपरं मयात्र स्थितेनापि साधनीयम्। तद्देवागमनोत्सवावेदनाय गमनानुज्ञया प्रसादं क्रियमाणमिच्छति मे प्रणयप्रसाददुर्ललितं हृदयमिदानीमेव'।

इति विज्ञापिते केयूरकेण, अन्तःपरितोषविकसितया दृष्ट्या दर्शितप्रसादश्चन्द्रापीडः प्रत्युवाच — 'किमुच्यते। कस्यापरस्येदृशी देशकालज्ञता। को वापरोऽस्मास्वेवं निर्व्याजभक्तिः। तत्साधु चिन्तितम्। गम्यतां देव्याः प्राणसंधारणाय। मदागमनप्रत्ययार्थं च पत्रलेखाप्यग्रतस्त्वयैव सह यातु देवीपादमूलम्। इयमपि प्रसादभूमिरेव देव्याः' इत्यभिधाय पृष्ठतः समुपविष्टाम् 'एवं न' इति पत्रलेखामप्राक्षीत्।

कृतप्रस्थितिनिश्चयायां च तस्याम्, मेघनादमाहूय सोपग्रहमादिदेश—'मेघनाद, यस्यां भूमौ पत्रलेखानयनाय पूर्वं मया त्वं स्थापितः,

तां भूमिं यावत्पत्रलेखामादाय केयूरकेण सहाग्रतो गच्छ। अहमपि वैशम्पायनमालोक्यानुपदमेव ते तुरङ्गमैः परागतः' इत्यादिश्य, गमनप्रणामोत्थितं केयूरकं सस्नेहमाहूय परिष्वज्य च, आत्मकर्णादपनीय कर्णाभरणम्, अस्य कर्णे कृत्वा, गद्गदिकागृह्यमाणाक्षरमवादीत्—'केयूरक, त्वया तु मे देवीसंदेशो नानीत एव। तत्किं तव हस्ते तदनुरूपं प्रतिसंदिशाम्यपूर्वम्। विज्ञापयितव्या देवी। तत्रापि किमलीकलज्जाजालभारोद्वहनेन त्वामायासयामि। यात्येव पत्रलेखा देवीपादमूलम्। इयं विज्ञापयिष्यति' इत्यभिदधदेव, पत्रलेखां प्रणयेनाभिमुखो भूत्वा बद्धाञ्जलिरभाषत —'पत्रलेखे, साञ्जलिबन्धेन शिरसा प्रणम्य मदीयेन विज्ञाप्या देवी कादम्बरी—येन सर्वखलानां धुरि लेखनीयेन, तथा प्रथमदर्शनेऽपि वत्सलत्वात्स्वभावस्य दर्शितप्रसादातिशयां देवीं प्रणामेनाप्यसंभाव्य आगच्छता, प्रज्ञा जडतया, गौरवं लघुतया, प्रियंवदता पारुष्येण, कृतज्ञता कृतघ्नतया, सर्वगुणा एव दोषैः परिवर्तिताः; स कथमिवापरं गुणमवलम्ब्य पुनः परिग्रहाय विज्ञापयतु? केन चाङ्गीकरोतु देवी? तदेवमात्मना सर्वगुणहीनस्यापि मे देवीगुणा एवावलम्बनम्। इयमेव ते स्वभावसरसा दूरस्थमपि मदनहुतभुजा दह्यमानं रक्षत्येव सरलता। आनयत्येव स्थिरप्रतिज्ञता। संभावयत्येव महानुभावता। आलपत्येव प्रियवादिता। यच्च तथापि गत्वा निर्लज्जहृदयः पुनर्वदनदर्शनसाहसमङ्गीकरोमि, अत्रापि सत्प्रकृतयो देवीप्रसादा एव कारणम्। एते हि उदारभावात् क्षणपरिचिता अपि समारोपितजीवितप्रत्याशाः, न किंचिन्न कारयन्ति। शिक्षयन्ति सेवाचातुर्यम्। लज्जापसृतं हठादाकृष्योपसर्पयन्ति। यया वानपेक्षित-

गमनाज्ञया अनियन्त्रणत्वात् 'गतोऽहम्' इति विज्ञप्तम्, सैव वाणी विज्ञापयति—यथा च मे न निष्फलमागमनं भवति, जगद्वा शून्यम्, तथा देव्यात्मसंधारणायात्मनैव यत्नः कार्यः' इति संदिश्य पुनराह — 'पत्रलेखे, त्वयापि यान्त्याध्वनि न मद्विरहपीडा भावनीया। न शरीरसंस्कारेऽनादरः करणीयः। नाहारवेलातिक्रमणीया। न येन केनचिदज्ञातेन पथा यातव्यम्। किं करोमि। त्वत्तोऽपि मे वल्लभतरा देवीप्राणाः, येनैवमेकाकिनी तेषां संधारणाय विसर्जितासि। अपि च, मम जीवितमपि तत्रैव हस्ते वर्तते। तन्नियतं त्वयात्मा यत्नेन परिरक्षणीयः' इत्युक्त्वा, सस्नेहं परिष्वज्य, केयूरकं पुनस्तदवधानदानाय संविधाय, 'महाश्वेताश्रमं यावत्पुनस्त्वयैव सहानया मन्नयनायागन्तव्यम्' इत्यादिश्य व्यसर्जयत्।

निर्गतयां च केयूरकेण सह पत्रलेखायाम्, 'किं शीघ्रमेते यास्यन्ति नवेति, कियद्भिर्वा दिवसैः परापतिष्यन्ति' इत्यनयैव चिन्तया शून्यहृदयः क्षणमिव स्थित्वा, स्कन्धावारवार्तास्फुटीकरणाय वार्ताहरं विसर्ज्य, बहुदिवसान्तरितदर्शनस्य वैशम्पायनस्य प्रत्युद्गमनायात्मानं मोचयितुं पितुः पादमूलमगात्।

अथ तारापीडो दूरत एव कृतप्रणामं चन्द्रापीडमपरिसमाप्तावलोकनस्पृहेण चक्षुषा सुचिरमालोक्यास्योपारूढयौवनभराभिरामतराण्यङ्गप्रत्यङ्गानि, पाणिना स्पृष्ट्वा, दर्शयञ्शुकनासमवादीत् —'शुकनास, पश्य, इयमायुष्मतश्चन्द्रापीडस्योपाहितपरभागा लक्ष्मच्छायेव चन्द्रमसः श्मश्रुराजिलेखा समन्तात्समुद्भिन्ना। विवाहमङ्गलयोग्यां दशामारूढोऽयम्। तद्देव्या विलासवत्या सह संमन्त्र्य, साभि-

जनरूपा निरूप्यतां काचिज्जगति राजकन्यका। दृष्टं हि दुर्लभदर्शनं वत्सस्य वदनम्। संप्रति वधूमुखकमलदर्शनेनानन्दयाम आत्मानम्' इत्युक्तवति तारापीडे, शुकनासः प्रत्युवाच — 'साधु चिन्तितं देवेन। अनेन तु सहृदयेन हृदये समारोपिता एव सर्वविद्याः। स्वीकृता एव सर्वाः प्रजाः। ऊढैव चतुरुदधिमेखलाकलापभूषणा भूः। किमपरमवशिष्यते, येन न परिणीयते' इत्यभिहितवति शुकनासे, लज्जावनम्रवदनश्चन्द्रापीडश्चकार चेतसि—'अहो संवादः, येन मे कादम्बरीसमागमोपायचिन्तासमकालमेवेदृशी तातस्य बुद्धिरुत्पन्ना। तद्यदुच्यते—अन्धकारे प्रविष्टस्यालोकः, म्रियमाणस्योपर्यमृतवृष्टिरिति, तदेतदापतितं मयि। सर्वथा वैशम्पायनदर्शनमात्रकान्तरिता वर्तते मे कादम्बरीप्राप्तिः' इत्येवं चिन्तयत्येव चन्द्रापीडे क्षितिपतिरुत्तस्थौ। उत्थाय च तमेव समवलम्ब्यासदेशे, विलासवतीभवनमगमत्। गत्वा च ससंभ्रमकृताभ्युत्थाना विलासवतीमूर्ध्वस्थित एवावादीत्—'देवि पश्य, एषा वत्सस्य विजृम्भमाणा श्मश्रुराजिशोभा विवाहमङ्गलसंपादनायादिशति। त्वमपरं किमादिशसीति प्रष्टव्या। तदादिशतु देवी। कथ्यमानेऽपि, किमपरम्, अद्यापहरसि वदनमन्यतो व्रीडया। पृष्टा वा कर्तव्यं नाज्ञापयसि। वरमातासि संवृत्ता। जानामि, चन्द्रापीडस्योपर्यप्रीतिरेषा, यदेवमेतत्कार्येष्वनादरोऽवधीरणा च' इत्येवंविधैर्नर्मप्रायैरालापैः सुखायमानचेताश्चिरमिव स्थित्वा, शरीरस्थितिसंपादनाय निरगात्।

चन्द्रापीडोऽपि शुकनासमुखेनैव वैशम्पायनप्रत्युद्गमनायात्मानं

मोचयित्वा, जननीभवन एव निर्वर्तितशरीरस्थितिः, वैशम्पायनप्रत्युद्गमनसंविधानविनोदेनैव तं दिवसमनयत् ।

अवतीर्णायां च तस्यां यामिन्याम्, सुहृद्दर्शनौत्सुक्येन शयनगतोऽपि जाग्रदेव समधिकमिव यामद्वयं स्थित्वा, सर्वतो दिवसबुद्धिमुत्पादयद्भिः वर्षद्भिरिव ज्योत्स्नाप्रवाहं चन्द्रपादैर्द्विगुणीकृतगमनोत्साहः, गमनसंज्ञाशङ्खनादायादिदेश ।

अनन्तरं चोत्थाप्यमानैश्च, उत्थितैश्च, आरोप्यमाणपर्याणैश्च, पर्याणितैश्च, अपर्याप्तराजद्वाराङ्गणैस्तुरंगमसहस्रैः, तत्क्षणं कुन्तवनमयमिवान्तरिक्षम्, खुररवमयीव मेदिनी, हेषारवमयानीव श्रोत्रविवराण्यभवन् । अचिराच्च गृहीतसमायोगः, अङ्गणगतमिन्द्रायुधमारुह्य, बहुत्वात्तुरंगमबलस्य कृच्छ्रलब्धसंचारः, कथं कथमपि निर्जगाम नगर्याः । निर्गत्य चादूरत एव निर्भरत्वाज्ज्योत्स्नापूरस्याच्छतया च दुर्विभावपानीयामुत्तीर्य सिप्राम्, अतिप्रहतत्वादसंकटत्वाच्च वर्धयतेव गमनोत्साहं दशपुरगामिना मार्गेण प्रावर्तत गन्तुम् ।

अथोह्यमानैरिव रयवाहिना सकलदिङ्मुखप्रसृतेन ज्योत्स्नाजलस्त्रोतसा वाजिभिः, तावत्यैवापररात्रवेलया योजनत्रितयमलङ्घयत् । अथाध्वश्रमापहरणायेव प्रवृत्ते वातुमाह्लादकारिणि रजनिविरामपिशुने मातरिश्वनि, क्रमेण च प्रत्यग्रगगनलक्ष्मीवियोगसंतापोज्झिते धवलोत्तरीयांशुक इव शशाङ्कलग्ने गलति चन्द्रिकालोके, अपरजलधिपातिना ज्योत्स्नाजलप्रवाहेणेव सहसा फेनबुद्बुदावलीष्विव नश्यन्तीषु तारकापङ्क्तिषु, पुनर्विभाव्यमानसहजश्यामकान्तिषु सलिलादिवोन्मज्जत्सु तरुलताविटपेषु, तिरोधानकारिणीं नीलतिरस्करिणीमिव करै-

रुत्सार्य तिमिरमालां विरहविधुरां कमलिनीमिवालोकयितुमुदयगिरिशिखरमारूढे भगवति सप्तलोकचक्षुषि सप्तवाहे, दृष्टिप्रसरक्षमायां वेलायाम्, सहसैवागतोऽर्धगव्यूतिमात्र एव रात्रिप्रयाणकायातम्, आयासितायततरदृष्टिभिरप्यदृष्टपर्यन्तम्, संचारिणं द्वितीयमिव मेदिनीसंनिवेशम्, स्कन्धावारमद्राक्षीत् ।

दृष्ट्वा च 'अहो भद्रकं भवति, यद्यचिन्तितागमन एव प्रविश्य वैशम्पायनं पश्यामि' इत्येवं चिन्तयित्वा मूर्धानमावृत्योत्तरीयेण, रयविशेषग्राहिणेन्द्रायुधेन स्कन्धावारमाससाद। प्रविशंश्च प्रत्यावासकं वहन्नेव 'कस्मिन्प्रदेशे वैशम्पायनावासः' इति पप्रच्छ। ततस्तत्संनिहिताभिः स्त्रीभिः, इतरत्वादप्रत्यभिज्ञाय, यथारब्धकर्मव्यग्राभिरेवोद्बाष्पशून्यवदनाभिः 'भद्र, किं पृच्छसि, कुतोऽत्र वैशम्पायनः' इत्यावेद्यमानः, 'आः पापाः, किमेवमसंबद्धं प्रलपथ' इति शून्यहृदय एव ताः प्रतारयन्, अन्तर्भिन्नहृदयत्वान्नापराः पृच्छन्, न किंचित्पश्यन्, न किंचिद्वदन्, क्वागतोऽस्मि, किमर्थमागतोऽस्मि, किं वा करोमि, इति सर्वमेवाचेतयमानः, अन्ध इव, मूक इव, कटकमध्यदेशं यावत्तादृशेनैव वेगेनावहत् ।

अथेन्द्रायुधप्रत्यभिज्ञानात् 'देवश्चन्द्रापीडः' इति समन्तात्ससंभ्रमप्रधावितानामुद्बाष्पशून्यदृष्टीनां राजन्यसहस्राणां मुखान्यवलोक्य, 'क्व वैशम्पायनः' इत्यपृच्छत्। ततस्ते सर्वे सममेव विचार्य, 'अस्मिंस्तरुतलेऽवतरतु तावद्देवः । ततो यथावस्थितं विज्ञापयामः' इति न्यवेदयन् । चन्द्रापीडस्य तेन तेषां स्फुटाख्यानादपि कष्टतरेण वचसान्तः-शल्यगर्भं स्फुटितमिव हृदयमासीत् । केवलं तत्कालप्रणयिनी मूर्च्छा

सा धारणमकरोत्। तुरगादवतारितं च पार्थिवैर्धृतमात्मानं तदानीं न वेदितवान्।

उपलब्धसंज्ञोऽपि च वैशम्पायनस्यादर्शनात् 'किमारटामि, किं हृदयमवष्टभ्य तूष्णीमासे, किमात्मानमाहत्य हृदयात्प्राणैर्वियोजयामि, किमेकाकी कांचिद्दिशं गृहीत्वा प्रव्रजामि' इति कर्तव्यमेव नाध्यगच्छत्। चकार च चेतसि — 'अहो मे रम्योऽप्यरमणीयः संवृत्तो जीवलोकः। वसन्त्यपि शून्यीभूता पृथ्वी। सुरक्षितमपि मुषितं जीवितफलम्। कं पश्यामि। केन सह सुखमासे। किमद्यापि मे जीवितेन, कादम्बर्यापि। वैशम्पायनस्य कृते क्व गच्छामि। को मे ददातु पुनस्तादृशं मित्ररत्नम्। कथं मया तातस्य शुकनासस्य चात्मा वैशम्पायनेन विना दर्शयितव्यः। किमभिधाय च तनयशोकविह्वलाम्बा मनोरमा वा संस्थापयितव्या। किं भूमिः काचिदसिद्धा, तां साधयितुं पश्चात्स्थितः' इत्येतानि चान्यानि चान्तरात्मना चिरमधोमुख एव विकल्प्य कृच्छ्रादिव तानप्राक्षीत् — 'मय्यागते, किं कश्चिदेवंविधोऽन्तरे संग्राम उत्पन्नः? व्याधिर्वा कश्चिदाशुकार्यसाध्यरूपः समुपजातः? येनैतदतर्कितमेव महावज्रपतनमुपनतम्' इति।

ते त्वेवं पृष्टाः सर्वे सममेव करद्वयापिहितश्रुतयो व्यज्ञपयन्— 'देव, शान्तं पापम्। देवशरीरमिव साग्रं वर्षशतं ध्रियते वैशम्पायनः' इति। एतदाकर्ण्य चोज्जीवित इवानन्दबाष्पनिर्भरः, संभाव्य तान्सर्वानेव कण्ठग्रहेण, अवादीत् — 'जीवतो वैशम्पायनस्यान्यत्र क्षणमप्यवस्थानमसंभावयता मयैवं पृष्टा भवन्तः। तज्जीवतीत्येतानि तु तावत्कर्णे कृतान्यक्षराणि। अधुना 'किं वृत्तमस्य? येनासौ नागतः।

कथं वा भवद्भिर्बलादपि नानीतोऽसौ' इत्येतदवगन्तुमुत्ताम्यति मे हृदयम्' इति। ते चैवं पृष्टा व्यज्ञपयन्—'देव, श्रूयतां यथावृत्तम्—गतवति देवे, तस्मिन्दिवसे न दत्तमेव प्रयाणं स्कन्धावारेण। अन्यस्मिन्नहनि, आहतायां प्रयाणभेर्याम्, प्रातरेवास्मान्वैशम्पायनोऽभ्यधात्—'अतिपुण्यं ह्यच्छोदाख्यं सरः पुराणे श्रूयते। तदस्मिन्स्नात्वा प्रणम्य भगवन्तं महेश्वरं व्रजामः। दिव्यजनसेविता केन कदा पुनः स्वप्नेऽपि भूमिरियमालोकिता' इत्यभिधाय, चरणाभ्यामेवाच्छोदसरस्तीरमयासीत्। तत्र चातिरम्यतयैव सर्वतो दत्तदृष्टिः संचरन्, आस्पदमिव सर्वरमणीयानाम्, अन्यतमं तटलतामण्टपमद्राक्षीत्।

दृष्ट्वा च तम्, अतिचिरान्तरितदर्शनं सुहृदमिवानन्यदृष्टिर्विस्मृतनिमेषेण चक्षुषा विलोकयन्, स्तम्भित इव, किमप्यन्तरात्मना स्मरन्निव गलितलोचनपयोधारासंतानः, तूष्णीमधोमुखस्तस्थौ। तथावस्थितं च तमवलोक्य, अस्माकमुदपादि चेतसि चिन्ता — 'येन केनचिदपह्रियन्त एव रसिकहृदयाः परिणामधीरमतयोऽपि, किं पुनः कुतूहलास्पदे प्रथमे वयसि वर्तमानाः। तस्मान्नियतमियमस्येमामतिमनोहरां भूमिमालोक्य भावयतो हृदयविकृतिरीदृशी जाता' इति। चिराच्च तमेवमवदाम वयम् — 'दृष्टो दर्शनीयानामवधिरेषः। तदुत्तिष्ठ। संप्रति निर्वर्तयामः स्नानविधिम्। अतिमहती वेला। सज्जीभूतं साधनम्। प्रयाणाभिमुखः सकलः स्कन्धावारस्त्वां प्रतिपालयन्नास्ते। किमद्यापि विलम्बितेन' इति। स त्वेवमुक्तोऽप्यस्माभिः, अश्रुतास्मदीयालाप इव तमेव केवलमनिमेषपक्ष्मणा चक्षुषा लतामण्डपमालोकितवान्।

पुनः पुनश्चास्माभिरागमनायानुरुध्यमानः, तद्ग्रथितदृष्टिरेवास्मान्परिच्छेदनिष्ठुरमाह स्म—'मया तु न यातव्यमस्मात्प्रदेशात्। गच्छन्तु भवन्तः स्कन्धावारमादाय। न युक्तं भवतां चन्द्रापीडभुजबलपरिरक्षितं गते तस्मिन्महासाधनं गृहीत्वास्यां भूमौ क्षणमप्यवस्थानं कर्तुम्' इत्युक्तवन्तं तादृशासंबद्धानुष्ठानेन जातपीडा निष्ठुरमप्यभिहितवन्तो वयम्—'एवं न युक्तमस्माकं स्थातुम्। भवतः पुनर्देवस्य तारापीडस्यानन्तरादार्यशुकनासाल्लब्धजन्मनो देवेन चन्द्रापीडेन सहैकत्र संवृद्धस्य युक्तमिदम्, यज्ज्येष्ठे भ्रातरि सुहृदि वत्सले भर्तरि च भवति सर्वमर्पयित्वा गते, तत्परित्यागेनात्रावस्थानम्। कस्यापरस्येदृशो युक्तायुक्तपरिच्छेदः। तिष्ठतु तावदस्माकं तवोपरि स्नेहो भक्तिर्वा। अस्मिंस्तु शून्यारण्ये भवन्तमेकाकिनमुत्सृज्य गताः सन्तो देवेन चन्द्रशीतलप्रकृतिना चन्द्रापीडेनैव किं वक्तव्या वयम्। किमन्यो देवश्चन्द्रापीडः, अन्यो वा भवान्। तदुन्मुच्यतामयं संमोहः। गमनाय धीराधीयताम्' इत्यभिहितोऽस्माभिः, ईषदिव विलक्षहासेन वचनेनास्मानवादीत्—'किमहमेतावदपि न वेद्मि, यद्गमनाय मां भवन्तः प्रबोधयन्ति। अपि च, चन्द्रापीडेन विना क्षणमप्यहमन्यत्र न पारयामि स्थातुम्। एषैव मे गरीयसी परिबोधना। तथापि किं करोमि। अनेनैव क्षणेन सर्वत्र विगलितं मे प्रभुत्वम्। तथा हि — स्मरदिव किमपि, मनो नान्यत्र प्रवर्तते। पश्यन्तीव किमपि, न दृष्टिरन्यतो वलति। निगडिताविव पदमपि दातुं न चरणावुत्सहेते। कीलितेव चास्मिन्नेव स्थाने तनुः। तदात्मना त्वहमसमर्थो यातुम्। अथ बलाद्भवन्तो मां निनीषवः, तत्रापि चलितस्यास्मात्प्रदेशादात्मनो जीवितधारणं न संभावयामि।

अत्र तु पुनस्तिष्ठतः, यदेतदन्तर्हृदये किमप्यनवसीयमानं परिवर्तते मे, येनैव विधृतोऽस्मि, तेनैवावश्यं धार्यन्ते प्राणा इति चेतसि मे। तदलं निर्बन्धेन। गच्छन्तु भवन्तः। भवतु यावज्जीवमा तृप्तेश्च-न्द्रापीडदर्शनसुखम्। अल्पपुण्यस्य तु तन्मे प्राप्तमपि करतलादेव-माच्छिद्य दैवेन नीतम्' इत्यभिदधानश्च, कौतुकात् 'किमेतत्? येनैवं भाषसे। नायासि देवस्य चन्द्रापीडस्य समीपम्?' इत्यस्माभिः पुनः पुनः पृष्टोऽभ्यधात् — 'लज्जेऽहमेवं वक्तुम्। तथापि शपामि वयस्यचन्द्रापीडस्यैव जीवितेन — यदि किंचिदपि जानामि, यत्केन कारणेन न शक्नोम्यतो गन्तुमिति। अपि च, भवतामपि प्रत्यक्ष एवायं वृत्तान्तः। तद्व्रजन्तु भवन्तः' इत्युक्त्वा तूष्णीमभूत्।

मुहूर्तादिव चोत्थाय, किमपि नष्टमिवान्विष्यन् बभ्राम। भ्रान्त्वा च चिरमिव खिन्नान्तरात्मा सनिर्वेदमूर्ध्वं निश्वस्य, तस्मिन् लतागहने पुनरुपविश्य, तस्थौ। वयमपि तत्प्रतिबोधनप्रत्याशया स्थिता एव। गतवति समधिक इव यामद्वये, शरीरस्थितिकरणायास्माभिरभ्यर्थितः प्रत्युवाच — 'वयस्यचन्द्रापीडस्य खल्वमी स्वजीवितादपि वल्लभतराः प्राणाः। तद्यदि बलादपि परित्यज्य मां गच्छन्ति, तथाप्येषां संधारणे मया प्रयत्नः कार्यः। किं पुनरगच्छतामेव। चन्द्रापीडदर्शनेनैव चाहमर्थी, न मृत्युना। तदभ्यर्थनैवात्र निष्फला' इत्यभिधायोत्थाय, स्नात्वा, कन्दमूलफलैर्वनवासोचितां शरीरस्थितिमकरोत्। निर्वर्तितशरीरस्थितौ तस्मिन्, वयमपि कृतवन्तः। अनेनैव च क्रमेण विस्मितान्तरात्मानो रात्रौ च दिवा च 'किमेतत्' इति तद्वृत्तान्तमेवानुभावयन्तो दिनत्रयं स्थित्वा, निष्प्रत्याशा आगता

वयम्। यच्चाग्रतो न प्रेषितः संवादकः, तदेकं तावत् — अन्तरा गच्छतो देवस्यासौ न परापतत्येव; अपरमपि — चिरात्प्रविष्टमात्रस्यैव देवस्य मा पुनरागमनक्लेशो भूदिति'।

चन्द्रापीडस्य तु तं स्वप्नेऽप्यनुत्प्रेक्षणीयं वैशम्पायनवृत्तान्तमाकर्ण्य, युगपदुद्वेगविस्मयाभ्यामाक्रान्तहृदयस्योदपादि चेतसि — 'किं पुनरीदृशस्य वैराग्यस्य कारणं भवेत्? स्वीयं च न पश्यामि किंचित्स्खलितम्। तातप्रसादात्तु मामिव तमप्यर्चन्त्येव राजानः। ममेव तस्यापि चेच्छाधिकेषु सर्वोपभोगेषु न किंचिदपि हीयते। अभ्यागच्छंस्तातेनाम्बया चार्यशुकनासेन मनोरमया च तनयस्नेहोचितेन सौहार्देन न संभावितः। विनयाधिक्येच्छुना तातेन शुकनासेन वा किंचित्पीडाकरमभिहितम्। ताडितो वा। तत्रापि नैवासावेवमस्नेहलः, यः कश्चिदिव क्षुद्रप्रकृतिः, आढ्यपुत्रतागर्वितः, पुत्रैकतादुर्ललितो वा, यो जन्मनः प्रभृति सर्वप्रकारोपकारिणो गुरुजनस्योपरि खेदमेवं कुर्यात्, अनुबन्धाद्विरमेद्वा। प्रशमस्यापीदृशस्य नैष कालः। अद्याप्यसौ विद्वज्जनोचिते गार्हस्थ्य एव न निवेशितः। देवपितृमनुष्याणामानृण्यमेव नोपगतः। अगत्वा चानृण्यम्, ऋणत्रयेण बद्धः क्व गतः। न तेन पुत्रपौत्रसंतत्या वंशः प्रतिष्ठां नीतः। नानन्तदक्षिणैर्महाक्रतुभिरिष्टम्। न गुरवोऽनुवृत्त्या सुखं स्थापिताः। न स्निग्धबन्धूनामुपकृतम्। न जातेन जीवलोकसुखान्यनुभूतानि। न तेन पुरुषार्थसाधनानां धर्मार्थकामानामेकोऽपि हि प्राप्तः। किमेतत्तेन कृतम्'। इत्याक्षिप्तचेताश्चिन्तयंश्चिरमिव तस्मिन्नेव तरुतले स्थित्वा, ततस्तत्क्षणकृतम्, उभयपार्श्वस्थापितोत्पल्लवमुखपूर्णहेमकलशं कायमानमविशत्।

प्रविश्य चागृहीतप्रतिकर्मतया मलिनवेषैः कर्मान्तिकैः प्रणम्यमानः, तूष्णीमेव शनैः शनैर्वासभवनमयासीत्। तत्र चापनीतसमायोगः, विमुच्याङ्गानि शयनीये, पुनरपि चिन्तामेवाविशत् — 'यदि तावदप्रतिमुक्तस्तातेनाम्बया वा, महति शोकार्णवे निक्षिप्य तौ, तनयविरहशोकविक्लवं तातं शुकनासमम्बां च मनोरमामनाश्वास्य, अस्मादेव प्रदेशाद्गच्छामि, तदा मयापि वैशम्पायनस्यानुकृतं भवति। निवृत्य पुनर्गमने च, अमुक्तिपक्षमाशङ्कते मे हृदयम्। तत्किं करोमि। अथवा अस्थान एवाप्रतिमुक्तिशङ्का मे। प्रियसुहृदा आत्मानं मां च परित्यजताप्यपरेण प्रकारेण गमनमुत्पादयता कादम्बरीसमीपगमनोपायचिन्तापर्याकुलमतेरुपकृतमेव मे। तदधुना वैशम्पायनप्रत्यानयनाय यान्तं न तातो नाम्बापि नार्यशुकनासोऽपि निवारयितुं शक्नोति माम्। गतश्च वैशम्पायनसहितस्तेनैव पार्श्वेन पुरस्ताद्गमिष्यामि' इति निश्चित्य, तत्कालकृतं वैशम्पायनवियोगदुःखं परिणामसुखमौषधमिव बहु मन्यमानः, मुहूर्तमिव स्थित्वा विश्रान्तः सुखितैरङ्गैः, आपूरिते तृतीयार्धयामशङ्खे शरीरस्थितिकरणायोदतिष्ठत्।

उत्थाय च 'यत्रैव कादम्बरी, तत्रैव वैशम्पायनः' इति स्वधैर्यावष्टम्भेनैव संस्तम्य हृदयम्, शून्यान्तरात्मा शरीरस्थितिमकरोत्। कृताहारश्च गगनतलमध्यमारूढे सवितरि, निर्भिद्य विशन्तीष्विव शरीरमातपकणिकासु, उत्थाय सरस्तीरकल्पितं जलमण्डपमयासीत्।

लोहितायमानातपे च सायाह्ने, निर्गत्य वासभवनाङ्गणे क्षणमिव स्थित्वा, 'द्वितीय एव यामे चलितव्यम्, सज्जीकुरुत साधनम्' इत्यादिश्य बलाध्यक्षम्, वासभवनमध्यवसत्। अथातिचिरान्तरितोज्ज-

यिनीदर्शनोत्सुको विनापि प्रयाणनान्द्या सकल एव कटकलोकः संवृत्य प्रावर्तत गन्तुम् । आत्मनाप्यलब्धनिद्राविनोदः, अवतरत्येव तृतीये यामे, राजलोकेन सहावहत् । अथाध्वनैव सह क्षीणायां यामवत्याम्, रसातलादिवोन्मज्जत्सु सर्वभावेषु, पल्लव इवोद्भिद्यमाने पूर्वाशालताया दिवसकरबिम्बे, कटकलोकेनैव सह परापतितवानुज्जयिनीम् ।

अथ दूरत एव दत्तकतिपयशून्यपदैश्च, महाकष्टशब्दमुखरैश्च, दुःखाधिक्याहितमौनैश्च, निःस्पृहैरपि, उदासीनैरपि, दुर्जनैरपि, स्नेहपरवशैः, पितृभिरिव, सुहृद्भिरिव च, नगरीनिर्गतैः, आर्ता पृच्छ्यमानं च कथ्यमानं च वैशम्पायनवृत्तान्तमेव समन्ताच्छुश्राव ।

शृण्वंश्च चकार चेतसि—'बाह्यस्य तावज्जनस्येयमीदृशी समवस्था । किं पुनर्येनासावङ्केन लालितः संवर्धितो वा । तदतिकष्टं मे वैशम्पायनेन विना तातस्य शुकनासस्याम्बाया मनोरमाया वा दर्शनम्' इत्येवं चिन्तयन् , नासानिहितोद्बाष्पदृष्टिः, अदृष्टसर्ववृत्तान्त एव विवेशोज्जयिनीम् । अवतीर्य च स राजकुलद्वारि विशन्नेव 'आर्यशुकनासभवनं सह देव्या विलासवत्या गतो राजा' इति शुश्राव । श्रुत्वा च निवर्त्य तत्रैव जगाम । गच्छंश्च समीपवर्ती, 'हा वत्स वैशम्पायन, अद्यापि मदङ्कलालनोचितो बाल एवासि । कथं त्वमेकाकी व्यालशतसहस्रभीषणे निर्मानुषे तस्मिञ्शून्यारण्ये स्थितः । केन ते तत्रापि शरीररक्षा कृता । केन शरीरस्थितिः संपादिता । केन निद्रासुखदायि शयनीयमुपकल्पितम् । कस्त्वयि बुभुक्षिते तृषिते सुषुप्सति वा दुःखितः । ममोत्सङ्गमुत्सृज्य समानसुखदुःखा वधूरपि न पुत्रक,

त्वयोपात्ता । आगतमात्रस्यैव ते पितरमनुज्ञाप्यात्यर्थं वधूमुखमवलोकयिष्यामीति यन्मया चिन्तितम्, न केवलं तन्मे मन्दपुण्याया न संपन्नम्; परं तवापि वदनदर्शनं दुर्लभं भूतम् । वत्स, यत्र तेऽवस्थातुमभिरुचितम्, नयस्व तत्रैव मामपि पितरं विज्ञाप्य । त्वामपश्यन्ती न जीवामि । तात, त्वयाहं शैशवेऽपि नावमानिता । कुतस्तवेयमेकपद एवेदृशी निष्ठुरता जाता । जन्मनः प्रभृति न दृष्टमेव यस्य कुपितमाननम्, तस्य ते कुतोऽयमेवंविधो मय्यकस्मादेव कोपः । यदेवं परित्यज्य स्थितोऽसि । गतोऽप्यागच्छ । शिरसा प्रसादयामि त्वाम् । कोऽपरोऽस्ति मे । देशान्तरपरिचयान्मुक्तो नामास्मासु स्नेहः । क्षणमप्यनन्तरितदर्शनस्य चन्द्रापीडस्योपरि कथं तवेदृशी निःस्नेहता जाता । तात, न भद्रकं ते समापतितम् । सर्व एव सुखं स्थापनीयो गुरुजनः, दुःखं च स्थापितः । न जानाम्येवं कृत्वा किं त्वया प्राप्तव्यम्' इत्येतानि चान्यानि चान्तर्भवनगतां स्वयं देव्या विलासवत्या संस्थाप्यमानामपि मनोरमां विलपन्तीमश्रौषीत् ।

तेन चातिकरुणेन तत्प्रलापविशेषेण निश्चेतनतामनीयत । कथं कथमपि सहजसत्त्वावष्टम्भेनैव संस्तम्भितात्मा, प्रविश्य पितुरपि लज्जमानो वदनमुपदर्शयितुम्, अधोमुख एव शुकनासेन सह प्रणम्य पितरम्, दूरत एवोपाविशत् । उपविष्टं च तं क्षणमिव दृष्ट्वा राजान्तर्बाष्पभरगद्गदेन ध्वनिनाभ्यधात् — 'वत्स चन्द्रापीड, जानामि ते स्वजीवितादपि समभ्यधिकां भ्रातुरुपरि प्रीतिम् । पीडा च सुखैकहेतोर्वल्लभजनादेवासंभाव्या या संभवति, तयैव हि न किंचिन्न क्रियते । तज्जन्मनः स्नेहस्य शीलस्य विनयाधानस्य च सर्वस्यैवानुचितमिमं

भ्रातुः सुहृदश्च ते वृत्तान्तमाकर्ण्य, त्वद्दोषमाशङ्कते मे हृदयम्' इति ।

एवंवादिनो नरपतेर्वचनमाक्षिप्य, युगपच्छोकामर्षाभ्यामन्धकारितानन: शुकनासोऽब्रवीत्—'देव, यदि चन्द्रमस्यूष्मा, महोदधौ वा शोषः, संभाव्यते ततो युवराजेऽपि दोषः । तत्किमेवमनिरूप्य तस्यानात्मज्ञस्य मित्रद्रुहः कृतघ्नस्य कृते कृतयुगावतारयोग्यमात्मनोऽपि गुणवन्तं चन्द्रापीडमेवं संभावयति देवः । न ह्यतः परमपरं कष्टतरं किंचिदपि पीडाकारणम्, यद्गुणेषु वर्तमानो दोषेषु संभाव्यते इतरजनेनापि, किं पुनर्गुरुजनेन । अपि च, जन्मनः प्रभृति देवस्य देव्या विलासवत्याश्चाङ्कलालनया यो न गृहीतः, तस्य मरुत इव दुर्ग्रहप्रकृतेश्चन्द्रापीडोऽपि किं करोतु । स्वयमेवोत्पद्यन्ते एवंविधाः शरीरसंभवा महाकृमयः, सर्वदोषाश्रया महाव्याधयः । ये सकलङ्काः कृपाणा इव स्नेहेनैव पारुष्यं भजन्ते । सरागाः पल्लवा इव दिवसारूढ्यैवापरज्यन्ते। भूतिपरामृष्टा दर्पणा इवाभिमुख्येन सर्वं प्रतीपं गृह्णन्ति । ये च स्निग्धेष्वपि रूक्षाः, ऋजुष्वपि वक्राः, स्त्रीष्वपि शूराः, भृत्येष्वपि क्रूराः, दीनेष्वपि दारुणाः । येषां च विपरीतानां गुरव एव लघवः, नीचा एवोच्चैः, कुदृष्टिरेव सद्दर्शनम्, दौःशील्यमेव सुशीलता, अनृतमेव सत्यम् । येषां च क्षुद्राणां प्रज्ञा पराभिसंधानाय न ज्ञानाय, पराक्रमः प्राणिनामुपघाताय नोपकाराय, उत्साहो धनार्जनाय न यशसे, धनपरित्यागः कामाय न धर्माय । किं बहुना, सर्वमेव येषां दोषाय न गुणाय । तदसावपीदृश एव कोऽप्यपुण्यवानुत्पन्नः, यस्यैवं कुर्वतः 'मित्रमहं चन्द्रापीडस्य, कथं तस्य द्रोहमाचरामि' इति नोत्पन्नं

चेतसि। 'मातुरहमेवैको जीवितनिबन्धनम्, कथं मया विना वर्तिष्यते' इत्येतस्य नृशंसस्य हृदये नापतितम्। 'पिण्डप्रदो वंशसंतानार्थमहमुत्पादितः पित्रा, कथमननुज्ञातस्तेन सर्वपरित्यागं करोमि' इत्येतदपि यथाजातस्य न बुद्धौ संजातम्। तदेवमसत्पथप्रवृत्तेन दुर्दर्शमदृष्टं तावन्न नाम कुदृष्टिना दृष्टम्। दृष्टमपि येन न दृष्टम्, तस्याज्ञानतिमिरान्धस्य किं क्रियताम्। अपरम् — असौ तिर्यङ्महता यत्नेन शुक इव पाठितः पुष्टश्च देवेन। अथवा विनोददानात्तिरश्चामपि सफल एव शिक्षणायासो भवति। तेऽपि पोषिताः पोषितरि स्नेहमाबध्नन्ति। तेषामपि सहजन्मस्नेहो मातापित्रोरपरि दृश्यत एव। अपि च, ईदृशाचरितेन तेनाप्यवश्यमेव कस्यांचित्तिर्यग्योनौ पतितव्यम्। सर्व एव ह्यनाक्षिप्तचेताः प्रवर्तते स्वहिताय परहिताय च। तस्य तु पुनरस्मानेवं दुःखं स्थापयतो न स्वहितं नापि च परहितम्। किमनेनैवमात्मद्रुहा कृतमिति मतिरेव तावन्न बोधपदवीमवतरति। सर्वथा दुःखायैवास्माकं तस्य पापकर्मणो जन्म' इत्युक्त्वा निश्वसन्नेवावतस्थे।

तदवस्थं च तं तारापीडः प्रत्युवाच—'एतत्खलु प्रदीपेनाग्नेः प्रकाशनम्, व्यजनानिलैरतिवर्धनं प्रभञ्जनस्य, यदस्मद्विधैः परिबोधनमार्यस्य। तथापि प्राज्ञस्यापि सत्त्ववतोऽप्यवश्यं दुःखातिपातेन विशुद्धमपि वर्षसलिलेन सर इव मानसं कलुषीक्रियते सर्वस्य। येन ब्रवीमि। अन्यदस्मत्तो लोकवृत्तमार्य एव सुतरां वेत्ति। किमस्ति कश्चिदसावियति लोके, यस्य निर्विकारं यौवनमतिक्रान्तम्। यौवनावतारे हि शैशवेनैव सह गलति गुरुजनस्नेहः। दोर्द्वयेनैव सह स्थूलतामाप्रद्यते धीः। आकारेणैव सहाविर्भवन्ति हृदयाद्विकाराः। विकृतं च

मोहान्धं चेतो भ्राम्यदवश्यमेव स्खलति। स्खलिते च चेतसि, तद्भग्ना पतत्येव लज्जा। त्रपावरणशून्ये च हृदि प्रविश्य पदं कुर्वन्केन वा निवारितो दुर्निवारः सर्वाविनयहेतुः कुसुमधन्वा। तन्मोहविषयविषम-हार्हौ तारुण्यावतारे सर्वस्यैव स्खलितमापतति। किमेवमार्येण लाल-नीयस्य पालनीयस्य शिशुजनस्योपर्यावेशो गरीयान्गृहीतः, यदनुचित-मपत्यस्नेहस्याक्रोशगर्भमेवमुक्तम्। स्वप्नायमानानामपि यद्गुरूणां मुखेभ्यो निष्क्रामति शुभमशुभं वा, शिशुषु तदवश्यं फलति। गुरवो हि दैवतं बालानाम्। यथैवाशिषो गुरुजनवितीर्णा वरतामापद्यन्ते, तथै-वाक्रोशाः शापताम्। तद्वैशम्पायनमुद्दिश्य कोपावेशादेवमतिपरुषम-भिदधत्यार्ये, महती मे चेतसः पीडा समुत्पन्ना। स्वयमारोपितेषु तरुषु तावदुत्पद्यते स्नेहः। किं पुनरङ्गसंभवेष्वपत्येषु। तदुत्सृज्यतामयममर्ष-वेगो वैशम्पायनस्योपरि। विरूपकं तु तेन न किंचिदप्याचरितम्। सर्वपरित्यागं कृत्वा स्थित इत्येतदपि कारणमविज्ञाय किमेवं दोषपक्षे निक्षिपामः। कदाचिद्गुणीभवत्येवमयमविनयनिष्पन्नो दोष एव। आनी-यतां तावदसौ। बुध्यामहे किमर्थमयमेवंविधस्तस्य वयसोऽनुचितोऽपि संवेग उत्पन्नः। ततो यथायुक्तं विधास्यामः'।

इत्युक्तवति तारापीडे, पुनः शुकनासोऽभ्यधात् — 'अस्यु-दारतया वत्सलत्वाच्चैवमादिशति देवः। अन्यदतः परं किमिवास्य विरूपकं भवेत्, यद्युवराजमुत्सृज्य क्षणमप्यन्यत्रावस्थानमात्मेच्छया चेष्टितम्' इत्युक्तवति शुकनासे, चन्द्रापीडः शनैः शनैः शुकनास-मवादीत् — 'आर्य, यद्यपि निरुक्तितो वेद्मि — न मदीयेन दोषेण नागतो वैशम्पायन इति। तथापि तातेन संभावितमेव। कस्य

वापरस्य संभावना नोत्पन्ना । मिथ्यापि तत्तथा, यथा गृहीतं लोकेन, विशेषतो गुरुणा । तदस्या दोषसंभावनायाः प्रायश्चित्तमार्यो दापयतु मे वैशम्पायनानयनाय गमनाभ्यनुज्ञां तातेन । नान्यथा मे दोषशुद्धिर्भवति । न च तुरंगमैर्गच्छतो मे दृष्टायां भूमौ स्वल्पोऽपि गमनपरिक्लेशः । अनुपदमेव स्कन्धावारमादायागच्छतीत्यमुना हेतुना विना तेनागतोऽहम् । अन्यथा जन्मनः प्रभृति कदा मया गतं स्थितं क्रीडितं हसितं पीतमशितं सुप्तं प्रबुद्धमुच्छ्वसितं वा विना वैशम्पायनेन । यच्च श्रुत्वा तस्मादेव प्रदेशान्न गतोऽस्मि, तन्मा तेनैव तुल्यो भूवमिति । तदप्रतिगमनदोषाद्रक्षतु मामार्यः' ।

इत्यभिहितवति चन्द्रापीडे, 'गमनाय विज्ञापयति युवराजः, किमाज्ञापयति देवः' इति शनैः शनैः पृष्टश्च शुकनासेन, किंचिदिव ध्यात्वा तारापीडः प्रत्यवादीत्—'आर्य, मया ज्ञातमेतेष्वेव दिवसेषु—वत्सस्य वधूं द्रक्ष्यामीति । तावदयमपरोऽन्तर्हिताशापथो वैशम्पायनवृत्तान्तो विलोमप्रकृतिना विधात्रान्तरा पातितः । यथा चायुष्मताभिहितम्, एवमेवैतत् । न तमन्यः शक्नोत्यानेतुम्, न च तेन विनायमत्र स्थातुम् । तदवश्यमेव तावन्निस्तरितव्यो व्यसनार्णवोऽमुना पोतेन । वैशम्पायनप्रत्यानयनाय चावश्यं देव्यपि विलासवती विसर्जयिष्यत्येवैनमिति निश्चयो मे । तद्यातु । किंत्वतिदूरं वत्सेन गन्तव्यम् । तद्गणकैः सहादरादार्यो दिवसं लग्नं च गमनायास्य निरूपयतु । संविधानं च कारयतु' इत्येतदभिधाय, 'वत्स, गच्छ, त्वमेव प्रविश्याभ्यन्तरम्, मनोरमासहिताया मातुरावेदयात्मगमनवृत्तान्तम्' इत्यादिश्य, स्वभवनमयासीत् ।

चन्द्रापीडस्तु प्रविश्य कृतनमस्कारो मातुः समीपे समुपविश्य, मनोरमामाश्वास्यावादीत्—'अम्ब, समाश्वसिहि । वैशम्पायनानयनाय तातेन मे गमनमादिष्टम् । तत्कतिपयदिवसान्तरितवैशम्पायनाननदर्शनोत्सुकं मामविकल्पं विसर्जय त्वम्' । सा त्वेवमभिहिता प्रत्युवाच—'तात, किमात्मगमनवचसा मां समाश्वासयसि । कः खलु मे त्वयि तस्मिंश्च विशेषः । तदेकधा तमेकं न पश्यामि कठिनहृदयम् । त्वयि पुनर्गते, यदपि तस्यादर्शने जीवितनिर्गमप्रतिबन्धहेतुभूतं त्वद्दर्शनम्, तदपि दूरीभवति । तन्न गन्तव्यं वत्सेन । एकेनापि हि युवयोरावां पुत्रवत्यौ । अपि नागतो नामासौ निष्ठुरात्मा' इत्युक्तवत्यां मनोरमायाम्, विलासवती धीरमुवाच—'प्रियसखि, तत्र मम चैवमेतत्, यथा त्वयोक्तम् । अयं पुनर्वैशम्पायनेन विना कं पश्यतु । तदास्ताम् । किमेनं निवारयसि । वारितेनाप्यनेन नैव स्थातव्यम् । मन्ये च, पित्राप्ययमेतदेवाकलय्य गमनायानुमोदितः । तद्यातु । वरमावयोः कतिपयदिवसान् अनयोरप्यदर्शनकृतान्क्लेशाननुभवितुम्, न पुनरस्य वैशम्पायनाननानवलोकनदुःखदीनं दिने दिने वदनमीक्षितुम् । तदुत्तिष्ठ, गच्छावो गमनसंनिधानाय वत्सस्य चन्द्रापीडस्य' ।

इत्यभिदधत्येव मनोरमां हस्ते गृहीत्वोत्थाय, चन्द्रापीडेनानुगम्यमाना निजावासमयासीत् । चन्द्रापीडोऽपि मातुः समीपे गमनालापेनैव क्षणमिव स्थित्वा गृहमगात् । तत्र चापनीतसमायोगो गमनायोत्ताम्यता हृदयेन गणकानाहूय रहस्याज्ञापितवान्—'यथा विना परिलम्बेन मे गमनं भवति, तथा भवद्भिरार्यशुकनासाय पृच्छते ताताय वा दिनमावेदनीयम्' इति । एवमादिष्टास्ते व्यज्ञापयन्—'देव,

यथा सर्व एव ग्रहाः स्थिताः, तथास्मन्मतेन देवस्य गमनमेव वर्तमाने न शस्यते। अपरमपि, कर्मानुरोधाद्राजेच्छैव कालः। तत्र न कार्यमेवाहर्निरूपणया। राजा कालस्य कारणम्। यस्यामेव वेलायां चित्तनिर्वृतिः, सैव वेला सर्वकार्येषु' इति विज्ञापिते मौहूर्तिकैः, पुनस्तानब्रवीत्—'तातेनैवमादिष्टमिति ब्रवीमि। अन्यत्, आत्ययिकेषु कार्येषु कार्यपराणा प्रतिक्षणोत्पादिषु च दिवसनिरूणैव कीदृशी। तत्तथा कथयत, यथा श्व एव गमनं भवेत्' इत्यभिधाय, निर्वर्तितशरीरस्थितिः, तं दिवसमेकां च यामिनीं कथं कथमप्यस्थात्।

अथास्तमुपगतवति तेजसा पत्यौ, संध्यानलस्फुलिङ्गनिकर इव स्फुरति तारागणे, उदयगिरिवर्तिनि नक्षत्रनाथे, प्रस्थानमङ्गले प्रणामायोपगतं चन्द्रापीडं विलासवती मन्युरागावेगगद्गदिकोपरुध्यमानाक्षरमवादीत्—'तात, युज्यते ह्यङ्कलालितस्य गर्भरूपस्य प्रथमगमने गरीयसी हृदयपीडा। मम पुनर्नेदृशी प्रथमगमनेऽपि ते पीडा समुत्पन्ना, यादृशी तव गमनेनाधुना। दीर्यते इव मे हृदयम्। निर्यान्तीव प्राणाः। न किंचित्समादधाति धीः। सर्वमेव शून्यं पश्यामि। धृतोऽपि बलादागच्छति मे बाष्पोत्पीडः। मुहुर्मुहुः समाहितापि मङ्गलसंपादनाय ते चलति मतिः। किं निमित्तं चेयमीदृशी मे हृदयपीडेत्येतदपि न वेद्मि—किं बहुभ्यो दिवसेभ्यः कथमप्यागतो मे वत्सो झटित्येव पुनर्गच्छतीति, उत वैशम्पायनवृत्तान्तादात्मन एव दुःखिततयेति। न चैवंविधयापि पीडया वैशम्पायनानयनाय गच्छतस्ते गमनं निवारयितुं पारयति वाणी। हृदयं पुनर्नेच्छत्येव त्वदीयं गमनम्। तदीदृशीं मे पीडां विज्ञाय यथा पुरा स्थितम्, न तथा क्वचि-

दासङ्गमाबध्यातिदीर्घकालमायुष्मता स्थातव्यम्। अस्य चार्थस्य कृते साञ्जलिबन्धेन शिरसाभ्यर्थये वत्सम्' इत्यादिशन्तीं स्वमातरं व्यजिज्ञपत्—'अम्ब, तदा दिग्विजयप्रसङ्गात्स्थितम्। अधुना पुनरयमेव कालक्षेपः, यावत्तमुद्देशं परापतामि। तत्पुनश्चिरागमनकृता न भावनीया मनागपि हृदये पीडा त्वया' इत्येवं विज्ञप्ता गाढं सुचिरमालिङ्ग्य, गच्छद्भिरिव प्राणैः कृच्छ्रान्मुमोच तं माता।

मुक्तश्च मात्रा प्रविश्य पितुर्वासभवनम्, ननाम दूरस्थित एव पितुः पादौ। अथ तथा प्रणतमालोक्य तम्, पिता अन्तःक्षोभावेगविक्षिप्ताक्षरमवादीत् — 'वत्स, पित्राहं दोषेषु संभावित' इत्येषा मनागपि मनसि वत्सेन दुःखासिका न कार्या। विनयाधानात्प्रभृति सम्यक्परीक्षितोऽस्यस्माभिः। परीक्ष्य च गुणगणैरेवाधिगम्यो राज्यभारस्त्वय्यारोपितः, न तनयस्नेहादेव। राज्यं हि नामैतत् नामहासत्त्वे, नाविक्रान्ते, नामहोत्साहे, नाशरण्ये, नाब्रह्मण्ये, नाकृपालौ, पदमेवादधाति। यः खलु समग्रैर्गुणैराकृष्य बलात्प्रतिबन्धमस्य चञ्चलप्रकृतेः कर्तुं समर्थः, तत्रास्ते। तदनेनैव बोद्धव्यमिदं वत्सेन—नास्ति मयि दोष इति। अपि च, संप्रति कस्मिन्भारमवक्षिप्याणुमपि दोषमाचरसि। त्वयैव सकललोकानुरञ्जने यतितव्यम्। गतः खलु कालोऽस्माकम्। अस्माभिरस्खलितैश्चिरं पदे स्थितम्। न पीडिताः प्रजा लोभेन। नोद्वेजिता गुरवो मानेन। न हतः परलोकः कामेन। राजधर्मोऽनुरुद्धः, न स्वरुचिः। वृद्धाः समासेविताः, न व्यसनानि। सतां चरितान्यनुवर्तितानि, नेन्द्रियाणि। वृत्तं रक्षितम्, न शरीरम्। अकार्यपरिहारात्कार्यानुष्ठानाच्चोपार्जितः परोऽपि लोक इति चेतसि मे। त्वज्जन्मना

च कृतार्थ एवास्मि। तदयमेव मे मनोरथः—दारपरिग्रहात्प्रतिष्ठिते त्वयि सकलमेव मे राज्यभारमारोप्य, जन्मनिर्वाहलघुना हृदयेन पूर्वराजर्षिगतं पन्थानमनुयास्यामीति। अस्य च मेऽतर्कित एवायमग्रतः प्रतिरोधको वैशम्पायनवृत्तान्तः स्थितः। मन्ये च, न संपत्तव्यमेवानेन। अन्यथा क्व वैशम्पायनः। क्व चैवंविधमस्य स्वप्नेऽप्यसंभावनीयं समाचेष्टितम्। तद्गतेनापि तथा कर्तव्यं वत्सेन, यथा न चिरकालमेव मे मनोरथोऽन्तर्हृदय एव विपरिवर्तते' इत्यभिधाय, ताम्बूलमर्पयित्वा, व्यसर्जयत्।

चन्द्रापीडस्तु निर्गत्य शुकनासभवनमयासीत्। तत्र च तनयचिन्तापरीतमुन्मुक्तमिवेन्द्रियैः शुकनासम् अविरताश्रुपातोपहतमुखीं च मनोरमा प्रणम्य, अग्रतो ढौकितमपि कृतापसर्पणमनाविष्कृतगमनोत्साहं दीनमिन्द्रायुधमारुह्य, रयेणैव निरगान्नगर्याः।

निर्गत्य च सिप्रातटे तत्प्रस्थानमङ्गलावस्थानायोपकल्पितं कायमानमप्रविश्य, गव्यूतित्रितयमिव गत्वा, सुलभपयोयवसे प्रदेशे निवासमकल्पयत्। उत्ताम्यता हृदयेनाप्रभातायामेव यामिन्यामुत्थाय, किमपि किमपि मनसा चिन्तयन्, अचेतितक्षुत्पिपासातपश्रमोजागरव्यथः, दिवा रात्रौ चावहत्।

एवं च वहतोऽप्यस्य दवीयस्तयाध्वनः, अर्धपथ एव, कालसर्पो वर्त्मनः, मदागमो मकरध्वजकुञ्जरस्य, आशुगमनविघ्नकारी बभूव जलदकालः।

तत्र च प्रथममस्य चेतोहारिभिर्मूर्छावेगैरन्धकारतामनीयन्त दश दिशः, ततो जलधरैः। अग्रतः समुत्प्लुतेन चेतसा क्वाप्यगम्यत,

पृष्ठतो हंसैः। पूर्वं तुलितनीलोत्पलवनकान्ति नयनयुगलमस्य सलिलं समुत्ससर्ज, चरममम्भोमुचां बृन्दम्। अपि च, दुस्तरैर्नदीपूरैरेव सहावर्धन्त मन्मथोन्माथाः। वर्षजलविलुलितैः कमलाकरैरेव सह ममज्ज कादम्बरीसमागमप्रत्याशा। धारारयासहैः कन्दलैरेव सहाभिद्यत हृदयम्। ततश्च विततेन स्थलीषु, कलकलेनाम्बुषु, पटुना पर्वततटेषु, उल्बणेन तालीवनेषु, यथाधारापतनमाकर्ण्यमानेन धारारवेणोत्कलिकाकलितः, न रात्रौ, न दिवा, न ग्रामे, नारण्ये, न वर्त्मनि, नावासे, न वहन्, न तिष्ठन्, न वैशम्पायनस्मरणे, न कादम्बरीसमागमानुध्याने, न कथंचिदपि, न क्वचिदपि, निर्वृतिमेवाध्यगच्छत्।

अनधिगतनिर्वृतिश्च धीरस्वभावोऽपि प्रकृतिमेवोत्ससर्ज। प्लावितसकलधरातलैर्धाराजलैरप्यशोष्यत। द्योतितदशदिशा शतह्रदालोकेनापि मूर्च्छान्धकारेऽक्षिप्यत। तथापि सकलजगज्जीवनहेतुनापि जीवितसंदेहदोलामारोपितो जलदकालेन, निरुद्धास्वपि जलदकालेनैवाशुगमनविघ्नभूतास्वाशासु, कादम्बरीसमागमाशा सुतरां नारुध्यतास्य, यया तादृशोऽपि प्रावृट्काले कलामप्यकृतपरिलम्बोऽनीयत तं पन्थानम्। धाराहतिविकूणिताक्षेण च मुहुर्मुहुर्वलितानमिताननेनापचीयमानबलजवोत्साहेन वाजिसैन्येनानुगम्यमानः, जीवितसंधारणाय यथातथा निर्वर्तिताशनमात्रकः, दिवसमेव केवलमवहत्।

वहंश्च त्रिभागमात्रावशिष्टेऽध्वनि निवर्तमानं मेघनादमद्राक्षीत्। दृष्ट्वा च दूरत एव कृतनमस्कारं तमप्राक्षीत्—'तिष्ठतु तावत्पुरस्तात्पत्रलेखागमनवृत्तान्तप्रश्नः। वैशम्पायनवृत्तान्तमेव तावत्पृच्छामि। अपि दृष्टस्त्वयाच्छोदसरसि वैशम्पायनः? पृष्टो वावस्थानकारणम्?

स्मरति वास्माकम्? पृष्टोऽसि वानेन किंचिन्मदीयम्? उपलब्धो वाभिप्रायः? उत्पन्नो वालापो युवयोः? मातापित्रोर्वा संदिष्टं किंचित्? परिबोधितो वा त्वयागमनाय? आवेदितं वास्मदीयमागमनम्? नापयास्यति वा तस्मात्प्रदेशात्? ग्रहीष्यति वास्मदनुनयम्? आगमिष्यति वा पुनर्मया सह? किं कुर्वन्दिवसमास्ते? को वा विनोदोऽस्य तिष्ठतः?' इति।

स त्वेवं पृष्टो व्यज्ञपयत् — "देव, देवेन तु 'वैशम्पायनमालोक्य, अनुपदमेव तुरंगमैरागत एवाहम्' इत्यादिश्य विसर्जितोऽहम्। अच्छोदसरसः प्रतीपं वैशम्पायनो गत इत्येपान्तरा वार्तैव नोपजाता। चिरयति च देवे जलदसमयारम्भमालोक्य, 'कदाचिदेतेषु दिवसेषु देवेन तारापीडेन कृतप्रयत्नोऽपि न मुच्यत एवागन्तुं देवश्चन्द्रापीडः। त्वया चैकाकिना न स्थातव्यमेवास्यां भूमौ। परागतप्रायाश्च वयम्। तन्निवर्तस्वास्मादेव प्रदेशात्' इत्यभिधाय, पत्रलेखया केयूरकेण च त्रिचतुरैः प्रयाणकैरप्राप्त एवाच्छोदं यावद्बलान्निवर्तितोऽस्मि" इति।

एवमावेद्य विरतवचनं तं पुनरपृच्छत् -'किमाकलयसि, अद्यतनेनाह्ना यावत्परापतिता पत्रलेखा, न' इति। स तु व्यज्ञपयत्- 'देव, यद्यन्तरा कश्चिदन्तरायो न भवति विलम्बकारी, तदा विना संदेहेन परापतति। एवमवगच्छति मे हृदयम्' इत्युक्तवति मेघनादे, घनसमयवर्धिताभोगमकरध्वजार्णवमध्यपातिनीं स्वानुमानात्कादम्बरीमुत्प्रेक्ष्योत्प्रेक्ष्य विक्लवीभवतः पर्यावर्तन्तेवास्य जलधराः कालपुरुषैः, केतकामोदो विषपरिमलेन, कुटजतरवः कृतान्तहासैः, अपि च, शरीरेऽपि बलं क्षामतया, कान्तिर्वैवर्ण्येन, धैर्यं विषादेन, अङ्गान्यसहतया, करणान्यपाटवेन, सर्व-

मेवारत्या। दिवसैश्चोल्लिख्यमानमिवानवरतवाहिनाश्रुपूरप्रवाहेण स्वल्पावशेषम्, संकल्पलिखितेन निर्विशेषवृत्तिना कादम्बरीशरीरेणैव सह कण्ठलग्नं कथंकथमपि जीवितं धारयन्, उपहतं प्रावृषा, दृष्टपूर्वमप्यदृष्टपूर्वमिवादत्तदृष्टिसुखम्, तदेवाच्छोदमुपाहितद्विगुणदुःखमाससाद।

आसाद्य चोपसर्पन्नेव सर्वाश्ववारानादिदेश — 'कदाचिदसौ वैलक्ष्यादस्मानालोक्यापसर्पत्येव। तच्चतुर्ष्वपि पार्श्वेष्ववहिता भवन्तु भवन्तः' इति। आत्मनापि तुरगगत एव खिन्नोऽप्यखिन्न इव विचिन्वन् समन्ताद्बभ्राम। भ्राम्यंश्च यदा न क्वचिदपि किंचिदवस्थानचिह्नमप्यद्राक्षीत्, तदा चकार चेतसि — 'नियतमसौ पत्रलेखासकाशान्मदागमनमुपलभ्य प्रथममेवापक्रान्तः, येनावस्थानचिह्नमात्रं कथमपि नोपलक्ष्यते। वैशम्पायनमदृष्ट्वास्मात्प्रदेशात्पदमपि गन्तुं पादावेव नोत्सहेते मे। सर्वथा विनष्टोऽस्मि। न दृष्टा देवी कादम्बरी, नापि वैशम्पायनः' इत्येवमुत्पन्ननिश्चयोऽपि, अपरिच्छेद्यस्वभावत्वात्प्रत्याशायाः, 'कदाचिदस्य वृत्तान्तस्याभिज्ञा महाश्वेतापि भवत्येव। तत्तां तावत्पश्यामि। ततो यथायुक्तं प्रतिपत्स्ये' इत्यारोप्य हृदये, महाश्वेताश्रममुपजगाम। प्रविश्य च गुहाद्वार एव धवलशिलातले समुपविष्टामधोमुखीं कथंकथमपि तरलिकया विधृतशरीरां महाश्वेतामपश्यत्। दृष्ट्वा च तां तादृशीमस्योदपादि हृदये — 'मा नाम देव्याः कादम्बर्या एव किमप्यनिष्टमुत्पन्नं भवेत्, येनेयमीदृश्यवस्था हर्षहेतावपि मदागमनेऽनुभूयते महाश्वेतया' इत्याशङ्काभिन्नहृदयोऽयमुड्डीनैरेव प्राणैः पदे पदे स्खलन्निव पतन्निव प्रोद्बाष्पविषण्णवदनः, 'किमेतत्' इति तरलिकामपृच्छत्।

अथानुपसंहृतमन्युवेगापि गद्गदिकावगृह्यमाणकण्ठा महाश्वेतैव प्रत्यावदीत्——'महाभाग, किमियमावेदयति वराकी । श्रूयताम्——केयूरकाद्भवद्गमनमाकर्ण्य, विदीर्णमानसा 'न मया चित्ररथस्य मनोरथः पूरितः । न गृहाभ्यागतस्य चन्द्रापीडस्य प्रियमनुष्ठितम् । न चापि हृदयवल्लभसमागमनिर्वृता प्रियसखी कादम्बरी वीक्षिता' इत्युत्पन्नानेकगुणवैराग्या, पुनः कष्टतरतपश्चरणायात्रैवायाता । तावदत्र महाभागस्यैव तुल्याकृतिम्, उन्मुक्तमिवान्तःकरणेन ब्राह्मणयुवानमपश्यम्। स तु मामुपसृत्यानन्यदृष्टिरदृष्टपूर्वोऽपि प्रत्यभिजानन्निव, सुचिरमालोक्याब्रवीत्—'वरतनु, सर्व एव हि जगति जन्मनो वयस आकृतेर्वा सदृशमाचरन्न वचनीयतामेति । तव पुनरेकान्तवामप्रकृतेर्विधेरिव विसदृशानुष्ठाने कोऽयं प्रयत्नः । यदियमक्लिष्टमालतीकुसुमसुकुमारा मालेव कण्ठप्रणयैकयोग्या तनुरनुचितेनामुना कष्टतरतपश्चरणपरिक्लेशेन म्लानिमुपनीयते । जातस्य हि रूपगुणविहीनस्यापि जन्मोपनतानि जीवलोकसुखान्यनुभूय शोभते परत्रसंबन्धी तपश्चरणपरिक्लेशः; किं पुनराकृतिमतो जनस्य । तद्दुःखयति मामस्यास्ते स्वभावसरसायास्तनोस्तपःपरिक्लेशः । यदि च त्वादृशी जीवलोकसुखेभ्यः पराङ्मुखी तपसा क्लेशयत्यात्मानम्, तदा वृथा वहति धनुरधिज्यं कुसुमकार्मुकः' ।

अहं तु तं वदन्तमपि 'कस्त्वम्, कुतो वा समायातः, किमर्थं वा मामेवमभिदधासि' इत्यपृष्ट्वैवान्यतोऽगच्छम् । गत्वा च देवार्चनकुसुमान्याचिन्वती, तरलिकामाहूयाब्रवम् —— 'तरलिके, योऽयं युवा कोऽपि ब्राह्मणाकृतिः, अस्यावलोकयतो वदतश्चान्यादृश एवाभिप्रायो

मयोपलक्षितः । तन्निवार्यतामयम्, यथा पुनरत्र नागच्छति । अथ निवारितोऽप्यागमिष्यति, तदावश्यमेवास्याभद्रकं भविष्यति' इति । स तु निवार्यमाणोऽपि नात्याक्षीदेवानुबन्धनम् । अतीतेषु केषुचिद्दिवसेषु, एकदा गाढायां यामिन्याम्, चन्द्रमसि निहितदृष्टिः, 'अपि नामायमेभिरमृतवर्षिभिरखिलजगदाह्लादकारिभिः करैश्चन्द्रमास्तमपि हृदयवल्लभं मे वर्षेत्' इत्याशंसाप्रसङ्गेन देवस्य सुगृहीतनाम्नः पुण्डरीकस्य स्मरन्ती, जाग्रत्येवातिष्ठम् ।

अथ निभृतपदसंचरणम्, आ चरणादुत्कण्टकम् अनवरतपतितमदनशरशल्यनिकरनिचितमिव शरीरमुद्वहन्तम्, दूरीकृतं परलोकभीत्या, उन्मादादापतन्तम्, दूरतोऽपि दिवसनिर्विशेषेण चन्द्रातपेन विभाव्यमानं तमेव युवानमद्राक्षम् ।

दृष्ट्वा च तं तादृशम्, निस्पृहाप्यात्मनि परं भयमुपगतवती चेतस्यचिन्तयम्—'अहो कष्टमापतितम् । यद्ययमुन्मादादागत्य पाणिनापि स्पृशति माम्, तदा मयेदमपुण्यहतं शरीरमुत्स्रष्टव्यम् । तच्चिराद्देवस्य पुण्डरीकस्य पुनर्दर्शनप्रत्याशया दुःखोत्तरमप्यङ्गीकृतं व्यर्थतां मे यातं प्राणसंधारणम्' इति ।

स त्वेवं चिन्तयन्तीमेव मामुपसृत्याब्रवीत्—'चन्द्रमुखि, हन्तुमुद्यतो मामयं कुसुमशरसहायश्चन्द्रमाः । तच्छरणमागतोऽस्मि । रक्ष मामशरणमनाथमार्तमप्रतीकारक्षममात्मना त्वदायत्तजीवितम् । शरणागतपरित्राणं हि तपस्विनामपि धर्म एव । तद्यदि मामात्मप्रदानेन नात्र संभावयसि, तदा हतोऽहमाभ्यां कुसुमशरशिशिरकराभ्याम्' इति । अहं तु तदाकर्ण्य विप्रेत्यात्मानमप्यचेतयमाना, क्रोधावेगरूक्षा-

क्षरमवदम्—'आः पाप, कथमेवं गदतो मामुत्तमाङ्गे ते न निपतितं वज्रम्, अवशीर्णा वा न सहस्रधा जिह्वा। मन्ये च, न सन्त्येव तेऽस्मिञ्शरीरे सकललोकशुभाशुभसाक्षिभूतानि पञ्च महाभूतानि; येनैवं वदन्नाग्निना भस्मीकृतोऽसि, न वायुना हृतोऽसि, नाम्भसा प्लावितोऽसि, न धरित्र्या रसातलं प्रवेशितोऽसि, नापि तत्क्षणमेवाकाशेनात्मनिर्विशेषतां नीतोऽसि। येनैव खलु हतविधात्रा केनाप्युपदर्शितमुखरागः स्वपक्षपातमात्रप्रवृत्तिरनिरूपितस्थानास्थानवादी शुक इव वक्तुमेवं शिक्षितः, तेनैव किमु तस्यामेव जातौ न निक्षिप्तोऽसि; येनैकान्तहासहेतुरेवं वदन्नपि न क्रोधमुत्पादितवानसि। त्वदुक्ते दुःखिताहं ते संविभागमिमं करोमि, येनात्मवचनानुरूपा जातिमापन्नो नैवास्मद्विधाः कामयसे' इत्युक्त्वा, चन्द्राभिमुखी भूत्वा कृताञ्जलिः पुनरवदम् — 'भगवन् परमेश्वर लोकपाल, यदि मया देवस्य पुण्डरीकस्य दर्शनात्प्रभृति मनसाप्यपरः पुमान्न चिन्तितः, तदानेन मे सत्यवचनेनायमलीककामी मदुदीरितायामेव जातौ पततु' इति। स च मे वचसोऽस्यानन्तरमेव छिन्नमूलस्तरुरिवाचेतनः क्षितावपतत्। अतिक्रान्तजीवितेऽस्मिन्, कृताक्रन्दात्तत्परिजनाच्छ्रुतवती — यथा — असौ महाभागस्यैव मित्रं भवति' इत्युक्त्वा च त्रपावनम्रमुखी महीं महीयसाश्रुवेगेन तूष्णीमेवाप्लावितवती।

चन्द्रापीडस्य तु तदाकर्ण्य 'भगवति, कृतप्रयत्नायामपि भगवत्याम्, अपुण्यभाजास्मिञ्जन्मनि मया न प्राप्तं देव्याः कादम्बर्याश्चरणपरिचर्यासुखम्। तज्जन्मान्तरेऽपि वा भगवती संपादयित्री भूयात्' इति गदत एव स्वभावसरसं हृदयमस्फुटत्।

अथ महाश्वेतायाः शरीरमुत्सृज्य संभ्रमप्रतिपन्नचन्द्रापीडशरीरायाम् 'भर्तुदारिके, किं लज्जया। पश्य तावत्, अन्यथैव कथमप्यास्ते देवश्चन्द्रापीडः। भग्नेवास्य ग्रीवा न मूर्धानं धारयति। विचालितोऽपि न किंचिच्चेतयते। नोच्छ्वसिति हृदयेन। हा देव चन्द्रापीड चन्द्राकृते कादम्बरीप्रिय, क्वेदानीं त्वया विना गम्यते' इत्युक्त्वार्तवचसि तरलिकायाम्, तिर्यगाभुग्नचन्द्रापीडमुखनिहितनिश्चलस्तब्धदृष्टिनिश्चेष्टायां महाश्वेतायाम्, 'आः पापे दुष्टतापसि, किमिदं त्वया कृतम्। अपाकृताखिलजगत्पीडस्य तारापीडस्य कुलमुत्सादितम्। अनाथीकृताः प्रजाः सहास्माभिः। कस्य वदनमीक्षतां लक्ष्मीः। कोऽवलम्बनं भवतु भूमेः। कथं कथावशेषीभूतोऽसि। धीरस्यापि ते कथं कातरस्येव शुचा भिन्नं हृदयम्। देव, प्रसीद, प्रतिपद्यस्व प्राणान्। परित्यज्य च सर्वान्, एकाकी क्व प्रस्थितोऽसि' इत्युक्तवत्यारटति परिजने, चन्द्रापीडवदननिवेशितदृशि दीनतरहेषारवकृताक्रन्दे तुरंगमतां मुमुक्षतीवेन्द्रायुधे, पत्रलेखानिवेदितचन्द्रापीडागमना, व्याजीकृत्य महाश्वेतादर्शनं मातापित्रोः पुरः प्रतिपन्नशृङ्गारवेषाभरणा, पुरः केयूरकेणोपदिश्यमानमार्गा, पत्रलेखाहस्तावलम्बिनी, मदलेखया सह कृतालापैश्चेतितागमनखेदा, कादम्बरी चन्द्रापीडदर्शनायोत्ताम्यन्ती, तत्रैवाजगाम।

आगम्य चोद्धृतामृतमिव रत्नाकरम्, उत्खातकर्णिकमिव कमलम्, उन्मुक्तजीवितं चन्द्रापीडमद्राक्षीत्। दृष्ट्वा च तम्, सहसा 'हा हा किमिदम्' इत्यधोमुखी धरातलमुपयान्ती कथंकथमपि मुक्ताक्रन्दया मदलेखयाधार्यत। पत्रलेखा पुनरुन्मुच्य कादम्बरीकरतलम्, अचेतना

क्षितिमुपागमत्। चिराच्च लब्धसंज्ञापि कादम्बरी तथैव निश्चलस्तब्धदृष्टिः, स्तम्भितेव निष्प्रयत्ना निश्वसितुमपि विस्मृता, चन्द्रापीडवदनसमर्पिताक्षी, स्त्रीस्वभावविरुद्धेन चेतसा तस्थौ।

तथावस्थितां च तामुन्मुक्तार्तनादां सपादपतनं मदलेखाब्रवीत्—'प्रियसखि, प्रसीद, उत्सृजेमं मन्युसंभारमारटन्ती। बाष्पमोक्षेणामुच्यमानेऽस्मिन्, नियतमतिभारोत्पीडितं तटाकमिव सरसमृदु सहस्रधा स्फुटति ते हृदयम्। अपेक्षस्व देवीं मदिरां देवं च चित्ररथम्। त्वया विना कुलद्वयमपि नास्ति' इत्युक्तवतीं मदलेखां कादम्बरी विहस्याब्रवीत्—'अय्युन्मत्तिके, कुतोऽस्य मे वज्रसारकठिनस्य हतहृदयस्य स्फुटनम्। यन्नालोक्यैवं सहस्रधा स्फुटितम्। अपि च, या जीवति, तस्याः सर्वमिदम्— माता पिता बन्धुरात्मा सख्यः परिजन इति। मया पुनर्म्रियमाणया जीवितभूतं कथंकथमपि समासादितमिदं प्रियतमशरीरम्, यज्जीवदजीवद्वा संभोगेनानुमरणेन वा द्विधापि सर्वदुःखानामेवोपशान्तये। तत्किमिति देवेनागच्छता मदर्थं प्रणांश्चोत्सृजता सुदूरमारोपितं गुरुतां च नीतमात्मानमश्रुपातमात्रकेण लघूकृत्य पातयामि। कथं स्वर्गगमनोन्मुखस्य देवस्य रुदितेनामङ्गलं करोमि। कथं वा पादधूलिरिव पादावनुगन्तुमुद्यता हर्षस्थानेऽपि रोदिमि। किं मे दुःखमेवंविधम्। अधुना तु मे सर्वदुःखान्येव दूरीभूतानि। अस्मिन्समये मरणमेव मे जीवितम्। जीवितं पुनर्मरणम्। तद्यदि ममोपरि स्नेहः, करोषि मत्प्रियं हितं वा, तन्ममोपरि स्नेहाबद्धयापि प्रियसख्या तथा कर्तव्यम्; यथा न तातोऽम्बा च मच्छोकादात्मानं परित्यजतः, यथा च मयि वाञ्छितं मनोरथं त्वयि पूरयतः; येन परलोकगताया

अपि मे जलाञ्जलिदानाय पुत्रकस्त्वयि भविष्यति। यथा च मे सखीजनः परिजनो वा न स्मरति, शून्यं वा भवनमालोक्य न दिशो गृह्णाति, तथा करिष्यसि। पुत्रकस्य मे भवनाङ्गणे सहकारपोतस्य त्वया मच्चिन्तयैव माधवीलतया सहोद्वाहमङ्गलं स्वयमेव निर्वर्तनीयम्। वासभवने मे शिरोभागनिहितः कामदेवपटः पाटनीयः। पञ्जरबन्धदुःखाद्दूराक्षी कालिन्दी सारिका शुकश्च परिहासो द्वावपि मोक्तव्यौ। क्रीडापर्वतकः कस्मै चिदुपशान्ताय तपस्विने प्रतिपादयितव्यः। शरीरोपकरणानि मे ब्राह्मणेभ्यः प्रतिपादनीयानि। अपरमपि यत्ते रोचते, तदपि स्वीकर्तव्यम्। अहं पुनरिमममृतकिरणरश्मिभिर्दग्धशेषम् उज्ज्वलचिताज्वालामालिनि विभावसौ देवस्य कण्ठलग्ना निर्वापयाम्यात्मानम्' इत्यभिदधानैव, महाश्वेतां कण्ठे गृहीत्वा, निर्विकारवदनैव पुनस्तामवादीत् — 'प्रियसखि, तवास्ति कीदृश्यपि प्रत्याशा, यया पुनः समागमाकाङ्क्षिणी क्षणे क्षणे मरणाभ्यधिकानि दुःखान्यनुभवन्ती जीवितमलज्जाकरं धारयसि। मम पुनः सर्वतो हताशायाः सापि नास्ति। तदामन्त्रये प्रियसखीं पुनर्जन्मान्तरसमागमाय' इत्यभिधाय, चन्द्रापीडचरणौ स्रवत्स्वेदामृतार्द्राभ्यां कराभ्यामुत्क्षिप्याङ्केन धृतवती।

अथ तत्करस्पर्शेनोच्छ्वसत इव चन्द्रापीडदेहात् झटिति तुहिनमयमिव सकलमेव तं प्रदेशं कुर्वाणमव्यक्तरूपं किमपि चन्द्रधवलं ज्योतिरुज्जगाम। अनन्तरं चान्तरिक्षे क्षरन्तीवामृतमशरीरिणी वागश्रूयत—'वत्से महाश्वेते, पुनरपि त्वं मयैव समाश्वासयितव्या वर्तसे। तत्ते पुण्डरीकशरीरं मल्लोके मत्तेजसाप्याय्यमानमविनाशि भूयस्त्वत्समागमनाय तिष्ठत्येव। इदमपरं मत्तेजोमयं स्वत एवाविनाशि विशेष-

तोऽमुना कादम्बरीकरस्पर्शेनाप्यायमानं चन्द्रापीडशरीरं शापदोषाद्विमुक्तमप्यन्तरात्मना कृतशरीरान्तरसंक्रान्तेर्योगिन इव शरीरमत्रैव भवत्योः प्रत्ययार्थमा शापक्षयादास्ताम्। यत्नतः परिपालनीयमा समागमप्राप्तेः' इति ।

पत्रलेखा तु तेन तस्य ज्योतिषः स्पर्शेन लब्धसंज्ञोत्थाय, आविष्टेव वेगाद्धावित्वा, परिवर्धकहस्तादाच्छिद्येन्द्रायुधम्, तेनैव सहात्मानमच्छोदसरस्यक्षिपत् ।

अथ तयोर्निमज्जनसमयानन्तरमेव, तस्मात्सरसः सलिलात्, शैवलोत्करमिव शिरसि लग्नं जटाकलापमुद्वहन्, उद्विग्नाकृतिस्तापसकुमारकः सहसैवोदतिष्ठत्। उत्थाय च दूरत एव विलोकयन्तीं महाश्वेतामुपसृत्य शोकगद्गदमवादीत् — 'गन्धर्वराजपुत्रि, जन्मान्तरादिवागतोऽपि प्रत्यभिज्ञायतेऽयं जनः, न वा' इति । सा त्वेवं पृष्टा शोकानन्दमध्यवर्तिनी, ससंभ्रममुत्थाय कृतपादवन्दना, प्रत्यवादीत् — 'भगवन्कपिञ्जल, नाहमेवंविधापुण्यवती, या भवन्तमपि न प्रत्यभिजानामि । अथवा युक्तैवेदृशी मय्यनात्मज्ञायां संभावना, याहमेकान्तत एव व्यामोहहता स्वर्गं गतेऽपि देवे पुण्डरीके जीवामि । तत्कथय — केनासावुत्क्षिप्य नीतः? किं वा तत्रोपजातम्, येनैतावता कालेन वार्तापि न दत्ता। कुतो वा त्वमेकाकी देवेन विना समागतः'। स तु प्रत्यवादीत् — "गन्धर्वराजपुत्रि, श्रूयताम्—अहं हि कृतार्तप्रलापामपि त्वामेकाकिनीं समुत्सृज्य, तं पुरुषमनुव्रजन्, जवेनोदपतम्। स तु मे प्रतिवचनमदत्त्वैवातिक्रम्य तारागणम्, चन्द्रलोकमगच्छत्। तत्र च महोदयाख्यायां सभायाम्, इन्दुकान्तमये

महति पर्यङ्के, तत्पुण्डरीकशरीरं स्थापयित्वा मामवादीत्—'कपिञ्जल, जानीहि मां चन्द्रमसम्। अहं खल्वनेन ते प्रियवयस्येन कामापराधाज्जीवितमुत्सृजता निरापराधः संशप्तः — 'दुरात्मन्निन्दुहतक, यथाहं त्वया करैः संताप्योत्पन्नानुरागः सन्नसंप्राप्तहृदयवल्लभासमागमसुखः प्राणैर्वियोजितः, तथा त्वमपि कर्मभूमीभूतेऽस्मिन्भारते वर्षे जन्मनि जन्मन्येवोत्पन्नानुरागोऽप्राप्तसमागमसुखः, तीव्रतरां हृदयवेदनामनुभूय, जीवितमुत्स्रक्ष्यसि' इति। अहं तु तेनास्य शापहुतभुजा झटिति ज्वलित इव 'निरागाः किमनेनात्मदोषानुबन्धेन निर्विवेकबुद्धिना शप्तोऽस्मि' इत्युत्पन्नकोपः 'त्वमपि मत्तुल्यदुःखसुख एव भविष्यसि' इति प्रतिशापमस्मै प्रायच्छम्। अपगतामर्षश्च विवेकमागतया बुद्ध्या विमृशन्महाश्वेताव्यतिकरमस्याधिगतवानस्मि। वत्सा तु महाश्वेता मन्मयूखसंभवादप्सरसः कुलाल्लब्धजन्मनि गौर्यामुत्पन्ना। तया चायं भर्ता स्वयंवृतः। अनेन च स्वयंकृतादेवात्मदोषान्मया सह मर्त्यलोके वारद्वयमवश्यमुत्पत्तव्यम्। अन्यथा 'जन्मनि जन्मनि' इत्येषा वीप्सैव न चरितार्था भवति। तद्यावदयं शापदोषादपैति, तावदस्यात्मना विरहितस्य शरीरस्य मा विनाशो भूदिति मयेदमुत्क्षिप्य समानीतम्। वत्सा च महाश्वेता समाश्वासिता। तदिदमत्र मत्तेजसाप्यायमानमा शापक्षयात्स्थास्यति। अधुना त्वं गत्वैनं वृत्तान्तं श्वेतकेतवे निवेदय। महाप्रभावोऽसौ कदाचिदत्र प्रतिक्रियां कांचिदपि करोति' इत्युक्त्वा मां व्यसर्जयत्।

अहं तु विना वयस्येन शोकावेगान्धो गीर्वाणवर्त्मनि धावन्, अन्यतममतिक्रोधनं वैमानिकमलङ्घयम्। स तु मां दहन्निव निरीक्ष्या-

ब्रवीत्—'दुरात्मन्, यदेवमतिविस्तीर्णे गगनमार्गे त्वयाहमुद्दामप्रचारिणा तुरंगमेणेवोल्लङ्घितः, तस्मात्तुरंगम एव भूत्वा मर्त्यलोकेऽवतर' इति । अहं तु तमुद्बाष्पपक्ष्मा कृताञ्जलिरवदम्—'भगवन्, वयस्यशोकान्धेन त्वं मयोल्लङ्घितो नावज्ञया । तत्प्रसीद । उपसंहर शापमाशु त्वमिमम्' इति । स तु मां पुनरवादीत्—'यन्मयोक्तम्, तन्नान्यथा भवितुमर्हति । तदेतत्ते करोमि — कियन्तमपि कालं यस्यैव वाहनतामुपयास्यसि, तस्यैवावसाने स्नात्वा विगतशापो भविष्यसि' इति । एवमुक्तस्तु तमहमवदम्—'भगवन्, यद्येवम्, ततो विज्ञापयामि—तेनापि मत्प्रियवयस्येन पुण्डरीकेण चन्द्रमसा सह शापदोषान्मर्त्यलोक एवोत्पत्तव्यम् । तदेतावन्तमपि भगवान्प्रसादं करोतु मे दिव्येन चक्षुषावलोक्य — यथा तुरंगमत्वेऽपि मे तेनैव प्रियवयस्येन सहावियोगेन कालो यायात्' इति । स त्वेवमुक्तो मुहूर्तमिव ध्यात्वा पुनर्मामवादीत् — 'उज्जयिन्यामपत्यहेतोस्तपस्यतस्तारापीडनाम्नो राज्ञः सनिदर्शनं चन्द्रमसा तनयत्वमुपगन्तव्यम्; वयस्येनापि ते पुण्डरीकेण तन्मन्त्रिण एव शुकनासनाम्नः । त्वमपि तस्य महोपकारिणश्चन्द्रात्मनो राजपुत्रस्य वाहनतामुपयास्यसि' इति । अहं तु तद्वचनानन्तरमेवाधःस्थिते महोदधौ न्यपतम् । तस्माच्च तुरंगीभूयैवोदतिष्ठम् । संज्ञा तु मे तुरङ्गत्वेनापि न व्यपगता' ।

इत्येतच्छ्रुत्वा 'हा देव पुण्डरीक, जन्मान्तरेऽप्यविस्मृतमदनुराग, लोकान्तरगतस्यापि तेऽहमेव राक्षसी विनाशायोपजाता । दग्धप्रजापतेरियदेव मन्निर्माणे दीर्घजीवितप्रदाने च प्रयोजनं निष्पन्नम्, यत्पुनः पुनस्ते व्यापादनम्' इत्येवं कृतार्तप्रलापां महाश्वेतां कपिञ्जलः पुनरपि

सानुकम्पमवादीत्—'गन्धर्वराजपुत्रि, कस्तवात्र दोषः, येनैवमनिन्द-नीयमात्मानं निन्दापदैर्योजयसि। यथा च शापदोषादिदमुपगतं भवत्योर्द्वयोरपि दुःखम्, तथा मया कथितमेव। चन्द्रमसोऽपि भारती भवतीभ्यां श्रुतैव। द्वयोरेव श्रेयसे यदेव भवत्याङ्गीकृतम्, तदेवानु-बध्यतां व्रतपरिग्रहोचितं तपः। तपसो हि सम्यक्कृतस्य नास्त्यसाध्यं नाम किंचित्' इति महाश्वेता पर्यबोधयत्।

उपशान्तमन्युवेगायां च महाश्वेतायाम्, कादम्बरी कपिञ्जलम-प्राक्षीत् — 'भगवन्, पत्रलेखया त्वया चास्मिन्सरसि जलप्रवेशः कृतः। तत्किं तस्याः पत्रलेखायाः संवृत्तमित्यावेदनेन प्रसादं करोतु भगवान्' इति। स तु प्रत्यवादीत्— 'राजपुत्रि, सलिलपातानन्तरं न कश्चिदपि तद्वृत्तान्तो मया ज्ञातः। तदधुना क्व चन्द्रापीडस्य जन्म, क्व वैशम्पायनस्य, किं वा पत्रलेखाया वृत्तमिति सर्वमेवास्य वृत्तान्तस्यावगमनाय गतोऽहं प्रत्यक्षलोकत्रयस्य तातस्य श्वेतकेतोः पादमूलम्' इत्यभिदधान एव गगनमुदपतत्।

अथ गते तस्मिन्, कादम्बरी महाश्वेतामवादीत्—'प्रियसखि, तुल्यदुःखतया त्वया सह नयता न खल्वसुखं स्थापितास्मि भगवता विधात्रा। अद्य मे शिरः समुद्घाटितम्। संप्रति मरणं जीवितं वा न दुःखाय मे। तत्कोऽपरः प्रष्टव्यो मया। केन वापरेणोपदेष्ट-व्यम्। तदेवं गते यत्करणीयम्, तदुपदिशतु मे प्रियसखी। नाहमा-त्मना किंचिदपि वेद्मि—किं कृत्वा श्रेयः' इत्युक्तवतीं कादम्बरीं महा-श्वेता प्रत्यवादीत्—'प्रियसखि, किमत्र प्रश्नेनोपदेशेन वा। यदेवेय-मनतिक्रमणीया प्रियतमसमागमप्रत्याशा कारयति, तदेव करणीयम्।

तत्त्वमन्यत्किं करोषि, यस्याः प्रत्ययस्थानमिदं चन्द्रापीडशरीरमङ्क एवास्ते। तदन्यथात्वेऽस्य करणीया चिन्ता। यावत्पुनरिदमविनाशि तिष्ठति, तावदेव तस्यानुवृत्तिं मुक्त्वा किमन्यत्करणीयम्। अप्रत्यक्षाणां हि देवतानां मृदश्मकाष्ठमय्यः प्रतिमाः श्रेयसे पूजासत्कारेणोपचर्यन्ते। किं पुनः प्रत्यक्षदेवस्य चन्द्रापीडनामान्तरितस्य चन्द्रमसो मूर्तिरनाराधितप्रसन्ना'।

इत्युक्तवत्यां महाश्वेतायाम्, कादम्बरी तामखेदार्हां चन्द्रापीडतनुमन्यतरस्मिन् शिलातले शनैरखेदयन्ती स्थापयित्वा, मङ्गलमात्रकावस्थापितैककररत्नवलया स्नानशुचिर्भूत्वा, देवतोचितामपचितिं संपाद्य, तथैवाङ्के समारोपितचन्द्रापीडचरणद्वया, राजपुत्रलोकेन स्वपरिजनेन च सह निराहारा तं दिवसमक्षिपत्।

यथैव च दिवसमशेषम्, तथैव तां गम्भीरमेघोपरोधभीमां जाग्रती समुपविष्टैव क्षणमिव क्षपा क्षपितवती। प्रातश्च तत् उन्मीलितं चित्रमिव चन्द्रापीडशरीरमवलोक्य, शनैः शनैः पाणिना स्पृशन्ती, पार्श्वस्थितां मदलेखामवादीत् — 'प्रियसखि मदलेखे, न वेद्मि—किं रुचेर्वशात् उत निर्विकारतयैवेति। अहं तु तादृशीमेवेमां तनुमालोकयामि। तत् त्वमपि तावदादरतो निरूपय' इत्येवमुक्ता मदलेखा तां प्रत्यवादीत्—'प्रियसखि, किमत्र निरूपणीयम्। अन्तरात्मनो विरहाद्व्यापारमात्रकमस्योपरतम्। अन्यत्, तादृशमेवेदं मनागप्यनुन्मुक्तं श्रिया वदनम्। तथैव चेदमविगलितसहजलावण्यसौकुमार्याणां सौष्ठवमङ्गानाम्। तत्सत्या सा भारती, कपिञ्जलावेदितश्च शापवृत्तान्त इति संभावयामि' इत्युक्तवत्यां मदलेखायाम्, आनन्दनिर्भरा

महाश्वेतायै राजपुत्रलोकायापि दर्शयित्वा कादम्बरी, शरीरस्थितिकरणायादिदेश सकलमेव राजलोकम्। आत्मनापि महाश्वेतयोपनीतानि तयैव सह सपरिवारा फलान्युपभुक्तवती। अन्येद्युश्चोपजातदृढतरप्रत्यया मदलेखामवादीत् 'प्रियसखि, देवस्य शरीरमिदमुपचरन्तीभिरवश्यम् आ शापक्षयादस्माभिरधुनात्र स्थातव्यम्। तदिममत्यद्भुतं वृत्तान्तं तातस्याम्बायाश्च गत्वा निवेदय। यथा मामेवंविधां दुःखभागिनीमागत्य न पश्यतः, तथा करिष्यसि। न शक्नोम्यहं तातमम्बां च दृष्ट्वा शोकवेगं धारयितुम्। मया चोपरतमेव देवमालोक्य न रुदितम्। सा, किमपरम्, अधुना निःसंशयितजीविते देवे प्रतिपन्ननियमा रोदिमि' इत्यभिधाय तां व्यसर्जयत्।

गत्वा आगतया च तया 'प्रियसखि, सिद्धं तेऽभिवाञ्छितम्। एवं संदिष्टं तातेनाम्बया च—शापावसाने जामात्रा सहैवानन्दबाष्पनिर्भरमाननारविन्दं ते द्रक्ष्यावः' इत्यावेदिते, निर्वृतेनान्तरात्मना अतिष्ठत्।

अथापगतप्राये जलदसमये, घननिरोधोद्बन्धादिवोन्मुक्ते जीवलोके, प्रसरन्तीष्विव आशासु, सलिलापसरणक्रमतरङ्ग्यमाणासु सुकुमारतीरसैकतरेखासु, एकदा कादम्बरीमुपसृत्य मेघनादो व्यज्ञपयत्—"'देवो युवराजश्चिरयतीत्युत्ताम्यता हृदयेन देवेन तारापीडेन वार्ताहाराः प्रहिताः। ते च देव्या एव शोकशल्यघटनां परिहरद्भिर्यथावृत्तं सर्वमाख्यायास्माभिरभिहिताः — भवतां हस्ते देवेन चन्द्रापीडेन न किंचित्प्रतिसंदेष्टव्यम्। नापि देव्या कादम्बर्या। तदकृतविलम्बा एव गत्वैवमखिलवृत्तान्तं तारापीडायावेदयत' इत्येवमभिहितास्तु

तेऽस्मान्मन्युनिर्भराः प्रत्यवदन्—'यथा भवद्भिः कथितम्, तत्तथा । तिष्ठतु तावत्क्रमागतस्नेहो भक्तिरनुवृत्तिर्वा । कार्यगौरवकृतं कुतूहलमेव देवावलोकनं प्रति बलात्प्रेरयत्यस्मान् । तद्विज्ञाप्य देवीम्, देवस्य युवराजस्य पादप्रणामेनास्माकं सफलयतु भवानागमनपरिश्रमम् । अन्यथा भूमिमेतावतीमागत्य, संभवे सति, अप्रत्यक्षीकृतयुवराजशरीरा गताः सन्तः किं तारापीडेन वक्तव्या वयम् । किं वास्माभिर्देवो विज्ञापयितव्यः' इत्यावेदिते, देवी प्रमाणम्" इति विज्ञाप्य पुनस्तूष्णीं स्थितवति मेघनादे, गद्गदिकयावगृह्यमाणकण्ठी कथंकथमपि चिरात्कादम्बरी प्रत्युवाच — 'स्थान एव हि तैरगमनमङ्गीकृतम् । अनवलोक्य देवम्, एवमेव याताः सन्तः किमुच्यन्ताम् । अपि च, वृत्तान्त एवायमेवंविधो लोकातीतः, यत्रावलोकनेनापि न संप्रत्ययः समुत्पद्यते । किं पुनरनालोकनेन । तदपरिलम्बितं प्रवेश्यताम् । पश्यन्तु देवम् । ततो यास्यन्ति' इति ।

आज्ञानन्तरं च मेघनादेन प्रवेशितान्दूरत एव समं बाष्पपातेन पञ्चाङ्गालिङ्गितमहीतलांस्ताननन्यदृष्टिश्चिरमिवालोक्य, कादम्बरी स्वयमेवाभाषत—'भद्रमुखाः, परित्यज्यतामयं क्रमागतस्नेहसद्भावसुलभः शोकावेगः । यत्खल्वनालोचितावधि दुःखावसानमेव दुःखम्, तन्मरणभीरोर्भवतु नाम शोकावेगाय । यत्पुनः सुखोदर्कम्, तत्पुरःस्थितया सुखप्रत्याशयैवान्तरितं नापतति हृदये । भवद्भिरपि दृष्टं च पुरेवाक्षततनोर्देवस्य वदनम् । तद्गम्यतामधुना वार्तोत्सुकमतेर्देवस्य पादमूलम् । न चायं प्रत्यक्षदृष्टोऽप्युपरतशरीराविनाशवृत्तान्तः प्रकाशनीयः । 'दृष्टोऽस्माभिरच्छोदसरसि । तिष्ठति' इत्येतदेवावेदनीयम् । यतः कार-

णादुपरतिः खल्ववश्यंभाविनी प्राणिनां कथंचित्प्रत्ययमुत्पादयति। शरीराविनाशः पुनः प्राणैर्विनाकृतानां दृश्यमानोऽप्यश्रद्धेय एव। तदस्यावेदनेन सुदूरस्थितमपि गुरुजनं मरणसंशये निक्षिप्य वर्तमाने प्रयोजनमेव नास्ति। प्रत्यागतजीविते जीवितेश्वरे, स्वयमेवायमत्यद्भुतोऽर्थो गुरुजनेष्वप्रकटीभविष्यति' इत्यादिश्य, किञ्चिद्विमृश्य, मेघनादमब्रवीत्—'मेघनाद, वेद्मि, संस्तुजनस्यैतदनुचितमिति। तथापि गुरूणां चेतःपीडामवेक्षमाणया मयैवमभिहितम्। कथ्यतां वास्तवं वृत्तम्। परं तु एभिः सहापरः कश्चिच्छ्रद्धेयवचाः संप्रत्ययाय व्रजतु'। इत्येवमादिष्टस्तु मेघनादः, त्वरितकनामानं कुमारबालसेवकमाहूय तैः सह व्यसर्जयत्।

अथ सुबहुदिवसापगमे वार्तां विनोत्ताम्यन्ती चन्द्रापीडस्यैवागमनायोपयाचितं कर्तुमवन्तिमातॄणामायतनं गता विलासवती, 'देवि, दिष्ट्या वर्धसे। प्रसन्नास्तेऽवन्तिमातरः। परागता युवराजवार्ताहराः' इति सहसैव संभ्रमप्रधावितात्परिजनादुपश्रुत्य, 'केन दृष्टाः? कियद्दूरे वर्तन्ते? किं वा तैः कथितं कुशलं मे वत्सस्य?' इति पृच्छन्त्येवाद्राक्षीत् इतस्ततो यथादर्शनं संवशः प्रधावितेन नरपतिप्रतिबद्धेनाप्रतिबद्धेन चोज्जयिनीनिवासिना जनेन 'आगतो न युवराजः? कियद्दूरे भवद्भिः परित्यक्तः? दिवसेष्वेषु क्व वर्तते? क्व वा भवद्भिर्यात्वा दृष्टः? यदर्थमयं क्लेशः कृतो युवराजेन, स दृष्टो वैशम्पायनः, प्रत्यानीतो वा?' इत्येतानि चान्यानि च प्रतिपदं पृच्छ्यमानानप्यदत्तवचसः, संदर्भानिव सर्वदुःखानाम्, दूरत एव त्वरितकसमेतांस्तान् लेखहारकान्।

आलोक्य तस्मिन्नेव मातृगृहाङ्गणे स्थित्वा, शून्यशरीरान्निर्जीवितानिवोपसर्पतस्तान् गद्गदतरमुच्चैरकृतप्रणामानेवावादीत् — 'भद्राः, कथयताशु वत्सस्य मे वार्तामात्रम्। इदं त्वन्यथैव किमपि कथयति मे हृदयम्' इति। एवं पृष्टान् 'देवि, दृष्टोऽस्माभिरच्छोदसरस्तीरे युवराजः। शेषमेष त्वरितको निवेदयिष्यति' इत्यभिवदत एव तानुद्बाष्पमुखी प्रत्युवाच—'किमपरमयं तपस्वी निवेदयिष्यति। दूरतः प्रभृत्यपसृतप्रहर्षेणैवोपसर्पणेन, प्रतिलेखमालिकाशून्यैः शिरोभिः, यदावेदयितव्यम्, तद्भवद्भिरेवावेदितम्'।

"हा वत्स जगदेकचन्द्र चन्द्रापीड, किं भूतं ते, येन नागतोऽसि। तात चन्द्रापीड, पीडिता ब्रवीमि, न कोपादुपालभमाना—न युक्तमेतत्तव 'अम्ब न परिलम्बं मनागपि करोमि' इति तथा मे पुरः प्रतिज्ञायान्यत्र क्वाप्यवस्थातुम्। वत्स, गच्छत एव ते मयास्य हतहृदयस्य शङ्कयैव ज्ञातम्—दुष्करं मे वत्सस्य पुनर्मुखावलोकनमिति। बलाद्धृतोऽसि। किं करोमि। को वात्र दोषो वत्सस्य। मन्दभाग्याया ममैवैतान्यपुण्यानां विलसितानि। भवन्त्यपुण्यवत्योपि लोके, न पुनर्मया सदृशी पापकारिणी; यस्यास्त्वमेक एवमकाण्ड एवाच्छिद्य क्वापि नीतोऽसि। विप्रलब्धास्मि दग्धवेधसा। वत्स, सुदूरस्यापि पादयोः पतामि ते। निवर्तस्वैकवारम्। 'अम्ब' इत्यालपतस्ते वदनमालोकयितुमुत्कण्ठितं मे हृदयम्। न वेद्मि किमपि—प्रियतया ते, किमाकृतेः प्रत्ययात्, उत स्त्रीजनसहभुवो मूढभावादेवेति, अद्यापि न श्रद्दधाति मे हृदयमनिष्टं ते; येन न सहस्रधा स्फुटति। तात, किं ब्रवीषि, यथा — 'किमनेन सुतस्नेहानुचितेन लोकलज्जाकरेण वैक्लव्येन'

इति। एषा स्थितास्मि ते वत्स, वचनात्तूष्णीम्। न रोदिमि" इत्यभिदधानैवासन्नसखीजनावलम्बितशरीरा मोहमगात्।

अथ विलासवतीपरिजनेनावेदिते तस्मिन्वृत्तान्ते, मन्दरास्फालनोद्वेल इव महाम्भोधिरुद्भ्रान्तचेताः, निर्जगाम नरपतिः। उपेत्य चावन्तिमातृगृहम्, कथं कथमपि चेतनामापाद्यमानां परिजनेन, अर्धोन्मीलितलोचनयुगां विलासवतीं दृष्ट्वा, समुपविश्य पार्श्वे, स्पर्शामृतवर्षिणा करेण स्पृशन्, शनैः शनैर्बाष्पगद्गदमवादीत्—'देवि, यदि सत्यमेवान्यादृशं किमपि वत्सस्य चन्द्रापीडस्य, ततो न जीव्यत एव। किमर्थमयमात्मा वत्सस्य कृते सकललोकसाधारणेनामुना वैक्लव्योपगमेन तुच्छतां नीयते। इयन्ति शुभान्युपात्तानि कर्माणि। किमपरं क्रियते। नाधिकस्य भाजनं सुखस्य वयम्। अनुपात्तं हि हृदयताडनमपि कुर्वद्भिर्न लभ्यत एवात्रात्मेच्छया। विधिर्नामापरः कोऽप्यत्रास्ते। यत्तस्मै रोचते, तत्करोति। नासौ कस्यचिदप्यायत्तः। एवं च पराधीनवृत्तौ सर्वस्मिन्, न किं वास्माभिर्लब्धम्? वत्सस्यातिदुर्लभो जन्मोत्सवः संभावितः। गृहीतविद्यस्य गुणवत्तयानन्दितं हृदयम्। दिग्विजयागतस्य प्रणमतः परिष्वक्तान्यङ्गानि। एतावदेव मनोरथशतवाञ्छितस्य वस्तुनो न संपन्नम्—यद्वधूसमेतस्य निजपदे प्रतिष्ठां कृत्वा तपोवने न गतम्। सर्वाभिवाञ्छितप्राप्तिस्तु महतः पुण्यराशेः फलम्। अपरमपि, किं वृत्तं वत्सस्येत्येतदद्यापि न परिस्फुटं केनचिदत्र कथितम्। एतावत्तु मया अव्यक्तमेव परिजनात्कथयतः कर्णे कृतम्—यथा—अस्मत्प्रहितैर्लेखहारिभिः सहापरो वत्सस्य मे बालसेवकस्त्वरितकनामा समायातः। स वेत्ति सर्वं वृत्तान्तम्। सोऽपि त्वया न

पृष्ट एवेति । तत् तं तु तावत्पृच्छामः । ततो जीवितमरणयोरन्यतरदङ्गीकरिष्यामः’ इत्यभिवदत्येव राजनि, परिजनान्तरितं त्वरितकमाहूय प्रतीहारो दर्शितवान् ।

‘भद्र, कथय, किं वृत्तं वत्सस्य, येन आगमनाय मया तन्मात्रामात्येन च लिखितेऽपि नायातः । अनागमनकारणं वा किंचिन्न प्रतिलेखितवान्’ इत्येवमादिष्टो राज्ञा त्वरितकः, गमनतः प्रभृति यथावृत्तं कथयितुमारेभे । राजा तु चन्द्रापीडहृदयस्फुटनवृत्तान्तं यावदाकर्ण्य, अतिक्षुभितशोकार्णवाक्रान्तिविक्लवः, प्रसार्य करम्, आर्तस्वरस्त्वरितकमवादीत्—‘भद्र, विरम । संप्रति कथितं त्वया कथनीयम् । मयापि श्रुतम्, यच्छ्रोतव्यम् । पूर्णो मे प्रश्नदोहदः । आनन्दितं हृदयम् । सुखं स्थितोऽस्मि । हा वत्स, त्वयैकाकिना स्फुटतो हृदयस्यानुभूता वेदना । निर्व्यूढा त्वया वैशम्पायनस्योपरि प्रीतिः । एवं दुःखभागिनो निस्त्रिंशाः कर्मचाण्डालाः, येषां तवापि हृदयस्फुटने निर्विकारत्वमेव । देवि, वज्रसारतोऽपि कठिनतरमेवेदमावयोर्हृदयम्, यन्न स्वयं सहस्रधा स्फुटति । तदुत्तिष्ठ, यावदेवातिदूरं न प्रयात्येकाकी वत्सः, तावदेवानुगमनाय प्रयतामहे । शुकनास, किमद्यापि तिष्ठसि । अयं स कालः स्नेहस्य । महाकालायतनसमीपे समादिश सपदि परिचारकांश्चितारचनाय । यात यथाभूमि भूमिपतयः । उत्सृष्टाः स्थ । यथा च नाद्यैवानाथतादुःखं जानन्ति प्रजाः, तथा करिष्यथ’ इत्येवमार्तप्रलापिनं तारापीडं त्वरितको व्यज्ञापयत् — ‘देव, स्फुटितेऽपि हृदये, ध्रियते शरीरेण युवराजः । शापदोषाद्वैशम्पायनस्य युवराजस्य च यथा जन्म, तथा निरवशेषं शृणोतु तावद्देवः’ इति ।

तारापीडस्तु तदद्भुतमाकर्ण्य, दत्तावधानस्तेन कथ्यमानं यथा-दृष्टं यथाश्रुतं च निरवशेषं तत्सर्वमश्रौषीत्। श्रुत्वा च तमनेकचिह्नो-त्पादितप्रत्ययं युवराजवैशम्पायनयोर्वृत्तान्तम्, ईषदिव विवर्तिताननः, विमर्शस्तिमिततारकां दृष्टिं निर्विशेषावस्थे शुकनासमुखेऽभ्यपातयत्। सुहृदस्तु स्वयं दुःखिता अपि निधानीकृत्यात्मदुःखम्, सुहृद्दुःखापनो-दायैव यतन्ते। यतः शुकनासस्तदवस्थोऽपि स्वस्थवदवनिपतिमुवाच—'देव, विचित्रेऽस्मिन्संसारे, अनेकप्रकारमुत्पद्यमानस्य तिष्ठतो विन-श्यतो वा स्थावरजङ्गमस्य न कदाचिदवस्था सा, या न संभवति। तत्कुतोऽयं देवस्यात्र वस्तुनि विमर्शः। यदि युक्तेर्विचारात्, किय-न्त्यत्र युक्तिरहितान्यागमप्रामाण्यादेवाभ्युपगतान्यविसंवादीनि दृश्यन्ते। मुद्राबन्धात् ध्यानाद्वा विषप्रसुप्तस्योत्थापने कीदृशी युक्तिः, अयस्का-न्तस्य चायसः समाकर्षणे भ्रमणे वा, मन्त्राणां वैदिकानामवैदिकानां वानेकप्रकारेषु कर्मसु सिद्धौ। आगमेषु सर्वेष्वेव पुराणरामायणभार-तादिषु सम्यगनेकप्रकाराः शापवार्ताः। तद्यथा — महेन्द्रपदवर्तिनो नहुषस्य राजर्षेरगस्त्यशापादजगरता। असुरगुरुशापाच्च ययातेस्तारुण्य एव जरसा भङ्गः। त्रिशङ्कोश्च पितृशापाच्चण्डालभावः। तिष्ठतु तावदन्य एव। योऽयमादिदेवो भगवानजः, स एव जमदग्नेरात्मज-तामुपगतः; श्रूयते च—पुनश्चतुर्धात्मानं विभज्य, राजर्षेर्दशरथस्य, तथैव मधुरायां वसुदेवस्य। तन्मनुष्येषु देवतानामुत्पत्तिर्नैवासंभाविनी। न च पूर्वमनुष्येभ्यो गुणैः परिहीयते देवः। न चापि भगवतः कम-लनाभादतिरिच्यते चन्द्रमाः। किमत्रासंभावनीयम्। अपि च, गर्भार-म्भसंभवे देवेन देव्या वदने विशंश्चन्द्रमा एव दृष्टः। तथा ममापि

स्वप्ने पुण्डरीकस्य दर्शनं समुपजातम्। तत्, उत्पत्तिं प्रति तयोर्नास्त्येव संदेहः । विनष्टयोः शरीरस्याविनाशः कथम्, कथं वा पुनर्जीवितप्रतिलम्भ इत्यत्राप्यखिललोकप्रख्यातप्रभावममृतमेवैकं कारणमावेदितम्। तच्चन्द्रमसि विद्यत इत्येषास्त्येव वार्ता । तत्सर्वमेतदित्थमेवावगच्छतु देवः । तयोरेवं शापः, अस्माकं पुनर्वर एव। तदस्मिन्वस्तुनि मनागपि न देवेन देव्या वा शोकः कार्यः । अपरमपि, यद्यद्देवं गते श्रेयस्करं श्रूयते, ज्ञायते वा, तत्तदद्यैवारभ्य क्रियतां कार्यतां च कर्म। न खलु वैदिकानामवैदिकानां वा कर्मणामसाध्यं नाम किंचिदपि । उत्पत्तिरपि तयोः कृच्छ्रलब्धयोरीदृशेनैव प्रकारेणोपजाता' ।

इत्युक्तवति शुकनासे, सशोक एव राजा प्रत्यवादीत्—'सर्वमेवमेतत्, यदार्येणाभिहितम्। कोऽन्यो बुध्यते । केन वापरेण वयं परिबोधनीयाः । किं तु तद्वत्सस्य मे वैशम्पायनदुःखात्स्फुटनं हृदयस्याग्रतो दृष्टिलग्नं सर्वमेवान्यदन्तरयति । तदेवमप्रत्यक्षिते वत्सस्य वदने, संस्तम्भमेनात्मनो न शक्नोमि कर्तुम्। यत्र च ममायमीदृशः प्रकारः, तत्र देव्याः परिबोधनं दूरापेतमेव । तद्गमनात् ऋतेऽन्य उपाय एव नास्ति जीवितसंधारणायेत्येवमवधारयत्वार्यः' इत्युक्तवति तारापीडे, चिरात्तनयपीडया तत्पुरः परित्यज्य लज्जां विलासवती कृताञ्जलिरुच्चैर्जगाद—'आर्यपुत्र, यद्येवम्, किमपरं विलम्बितेन । उत्ताम्यति मे हृदयं वत्सस्य दर्शनाय। दुःखापनोदार्थं स्फुटनमङ्गीकृतमासीत्। तदपि संप्रति दर्शनकाङ्क्षया न रोचत एव। जानामि—वरं दीर्घकालमपि दुःखान्यनुभवन्ती सकृदपि वत्सस्य दर्शनाय जीवितास्मि; न पुनरसह्यदुःखोपशान्तये संप्रत्येव मृतास्मीति । तदस्य

पुनराशानिबन्धनस्य गमनमपि हृदयस्य तावद्विनोदतां व्रजतु' इति वदन्तीमेव विलासवतीमासाद्य, अन्यतमः परिणतवयाः षट्कर्मा समुपसृत्य स्वस्तिपूर्वकं व्यज्ञापयत् — 'देवि, सर्वत एवापरिस्फुटेन वार्ताकलकलेनाकुलीकृतहृदया मनोरमा स्वयमेम धावन्त्यागता। राज्ञो लज्जमाना नोपगता स्थानमिदम्। तदेषा मातृगृहस्य पृष्ठतस्तिष्ठति। पृच्छति च देवीम् — किमेभिः कथितम्? जीवति वा मे वत्सो वैशम्पायनः? स्वस्थशरीरो वा? ढौकितो वा पुनर्युवराजस्य? क्व वर्तते? तावागमिष्यतो वा? कियद्भिर्दिवसैः?' इति।

राजा तु दीर्ण इव शुचा, विलासवतीमवादीत् — 'देवि, न श्रुतं किंचिदपि वत्सयोः प्रियसख्या ते। अन्यतश्च श्रुत्वा कदाचिज्जीवितेनैव वियुज्यते। तदुत्तिष्ठ, स्वयमेव धैर्यमालम्ब्य, सर्ववृत्तान्तानुकथनेन संस्थापय प्रियसखीम्। तयाप्यार्यशुकनासेन सहायातव्यम्' इत्येवमुक्त्वा, विलासवतीं व्यसर्जयत्। आत्मनापि शुकनासेन सह गमनसंविधानमकारयत्।

अथोत्ताम्यता हृदयेन राजा संततमविच्छिन्नकैः प्रयाणकैर्वहन्, अबहुभिरेव दिवसैरासमादाच्छोदम्। आसाद्य च दूरस्थित एव प्रथममागतमानश्ववारान्वार्तान्वेषणाय त्वरितकेन सार्धं प्रहितवान्।

अथ तैः सार्धमागच्छन्तम्, परस्परावरणेनैवात्मदर्शनमभिरक्षन्तम्, अक्षतमपि हतमिव, जीवन्तमपि मृतमिव, मेघनादपुरःसरं सकलमेव उपसर्पन्तं राजपुत्रलोकमालोक्य, उच्छ्वसित इव निवृत्य सावरणपर्याणवर्तिनीं विलासवतीमवादीत्—'देवि, दिष्ट्या वर्धसे। ध्रियते सत्यमेव शरीरेण वत्सः, येन सकल एवायं तच्चरणकमलानु-

जीवी राजपुत्रलोकस्तत्पादमूलादागतः' इति । सा तु तदाकर्ण्य, किंचिदात्मपाणिनैवोत्सारितावरणसिचयाञ्चला निश्चलया दृष्ट्या चिरमिवावलोक्य तनयनिर्विशेषं राजपुत्रलोकम्, धैर्यमुन्मुच्य, उच्चैरारटितवती—'हा वत्स, कथं सहपांसुक्रीडितस्यैतावतो राजपुत्रलोकस्य मध्ये त्वमेवैको न दृश्यसे' इति । तथारटन्तीं तु तां समाश्वास्य, राजा मेघनादमप्राक्षीत्—'मेघनाद, कथय, को वृत्तान्तो वत्सस्य' इति । स तु व्यज्ञापयत्—'देव, चेतनाविरहाच्चेष्टामात्रकमेवापगतम् । शरीरे पुनः, ज्ञायते—दिवसे दिवसेऽभ्यधिका कान्तिः समुपजायते' इति । राजा तु तच्छ्रुत्वा, जीवितप्रतिलम्भे समुपजातप्रत्याशः, 'श्रुतं देव्या मेघनादस्य वचनम्? तदेहि, चिरात्पुनः कृतार्थयामो दर्शनेनात्मानम् । पश्यामो वत्सस्य वदनम्' इत्यभिदधान एवाभिवर्धितगतिविशेषया करेण्वा महाश्वेताश्रममगमत् ।

अथ सहसैव तच्चन्द्रापीडगुरुजनागमनमाकर्ण्य, धावित्वा ह्रिया महाश्वेता गुहाभ्यन्तरमविशत्; चित्ररथतनयापि मोहान्धकारम् । तदवस्थयोश्च तयोः शुकनासावलम्बितशरीरो राजा विवेशाश्रमपदम्; तदनु मनोरमावलम्बिता विलासवती । प्रविश्य च सहजयैव कान्त्या अविरहितमुपरतसर्वप्रयत्नं सुप्तमिव तं पुत्रवत्सला तनयमालोक्य, यावन्न परापतत्येव तारापीडः, तावद्विलासवती विधारयन्तीं मनोरमामप्याक्षिप्य दूरत एव प्रसारितबाहुलताद्वया 'एहि जात दुर्लभक, चिराद्दृष्टोऽसि । देहि मे प्रतिवचनम् । आलोकय सकृदपि माम् । अनुचितं तात, तवैतदवस्थानम् । उत्थायाङ्कोपगमनेन मे संपादय तनयोचितं स्नेहम् । न चानाकर्णितपूर्वं बाल्येऽपि त्वया मम वचनम् ।

अद्य किमेवं विलपन्त्या अपि न श्रृणोषि। जात, केन रोषितोऽसि। एषा तोषयामि वत्स, पादयोर्निपत्य। पुत्र, चन्द्रापीड, प्रणम तावत्प्रत्युद्गम्य त्वत्स्नेहादेवातिदूरमागतस्य पितुः पादौ। क्व सा गता ते गुरुभक्तिः। क्व ते गुणाः। क्व सा धर्मज्ञता। क्व सा बन्धुप्रीतिः। क्व सा परिजनवत्सलता। कथमभाग्यैर्मे सर्वमेकपद एव उत्सृज्य, एवमौदासीन्यमवलम्ब्य स्थितोऽसि। अथवा यथा ते सुखम्, तथा तिष्ठ। वयमुदासीनहृदयास्त्वयि' इति कृतार्तप्रलापा, चन्द्रापीडस्य चरणावुत्तमाङ्गे कृत्वा, उन्मुक्तकण्ठमरोदीत्। तथा रुदतीं तु तामन्तरितनिजपीडस्तारापीडो भुजाभ्यामवलम्ब्याब्रवीत्—'देवि, यद्यप्यावयोः सुकृतैरपत्यतामुपगतः, तथापि देवतामूर्तिरेवायमशोचनीयः। तदुन्मुच्यतामयमिदानीं मनुष्यलोकोचितः शोचितव्यवृत्तान्तः। अस्मिञ्शोके कृते, न किंचिदपि भवति। केवलं गल एव स्फुटति रटतः, न हृदयम्। निरर्थकं प्रलपितमेव निर्याति वदनात्, न जीवितम्। अपरम्—अस्यामवस्थायामावाभ्यामपि तावत्परमवष्टम्भं कृत्वा मनोरमा शुकनासश्च संधारणीयौ, ययोर्लोकान्तरितो वैशम्पायनः। तिष्ठतां तावदेतावपि। यस्याः प्रभावात्पुनरनुभवनीयो वत्सस्य जीवितप्रतिलम्भाभ्युदयमहोत्सवः, सैवेयं गन्धर्वराजतनया वधूस्तेऽद्यापि संज्ञां न प्रतिलभते। तदेनां तावदुत्थाप्याङ्के कृत्वा चेतनां लम्भय। ततो यथेच्छं रोदिष्यसि'।

इत्यभिहिता राज्ञा विलासवती 'क्व सा मे वत्सस्य जीवितनिबन्धनं वधूः' इत्यभिदधत्येव ससंभ्रममुपसृत्य, अप्रतिपन्नसंज्ञामेवाङ्केनादाय कादम्बरीम्, चन्द्रापीडस्पर्शशिशिरेण च पाणिना हृदये

स्पृशन्ती, 'समाश्वसिहि मातः, त्वया विनाद्यैव प्रभृति केन संधारितं वत्सस्य मे चन्द्रापीडस्य शरीरम् । मातः, त्वममृतमयीव जातासि, येन वत्सस्य पुनर्वदनमालोकितम्' इत्यवादीत् । कादम्बरी तु तेन चन्द्रापीडनामग्रहणेन तेन च तन्निर्विशेषवृत्तिना विलासवतीशरीरस्पर्शेन लब्धसंज्ञापि, लज्जावनम्रमुखी प्रतिपत्तिमूढा, मदलेखया अङ्कादवतार्य, परवत्येव यथाक्रममकार्यत वन्दनं गुरूणाम् ।

अथ प्रत्यापन्नचेतनायां चित्ररथतनयायाम्, चन्द्रापीडमेवोज्जीवितं मन्यमानो राजा मदलेखामाहूयादिदेश — 'दर्शनसुखमात्रकमस्माकं विधीयमानम् । तच्चास्माभिरासादितम् । तत् यादृशेनैवोपचारेणैतावतो दिवसानुपचरितवती वधूर्वत्सस्य शरीरम्, स एवोपचारो नास्मदनुरोधाल्लज्जया वा मनागपि परिहरणीयः । वयं निष्प्रयोजना द्रष्टार एव केवलम् । किमस्माभिरिह स्थितैर्गतैर्वा । यस्याः करस्पर्शेनाप्यायितमेतदविनाशि, सैव वधूः पार्श्वेऽस्य तिष्ठतु' इत्यादिश्य निर्जगाम ।

निर्गत्य चोपकल्पितं निजावासमगत्वैव तपस्विवासोचितेऽन्यतरस्मिन्नासन्न एवाश्रमतरुलतामण्डपे समुपविश्य, निर्विशेषदुःखं सकलमेव राजचक्रमाहूय, सबहुमानमवादीत् — 'न भवद्भिरवगन्तव्यम्, यथा—अद्य शोकावेगादेवैतदहमङ्गीकरोमीति । पूर्वचिन्तित एवायमर्थः, यथा—वधूसमेतस्य चन्द्रापीडस्य वदनमालोक्य संक्रामितनिजभरेण मया क्वचिदाश्रमपदे गत्वा पश्चिमं वयः क्षपयितव्यमिति । स चायं मे भगवता कृतान्तेन पुराकृतैः कर्मभिर्वा विरूपैरेवं समुपनमितः । किमपरं क्रियते । अनतिक्रमणीया नियतिः । तदिच्छामि चिरकाङ्क्षितं

मनोरथं पूरयितुम्। तदस्य वस्तुनः कृते भवन्तो मया प्रार्थनीयाः' इत्युक्त्वा, संनिहितान्यपि परित्यज्योचितानि सर्वसुखानि, अनुचितान्यङ्गीकृत्य वन्यानि, — तथा हि — हर्म्यबुद्धिं वृक्षमूलेषु, संस्तुतजनस्नेहं हरिणेषु, आहारहार्दं कन्दमूलफलेषु, नर्मालापं धर्मसंकथासु, तनयस्नेहं तरुषु संक्रमय्य, तथा तपस्विजनोचिताः क्रियाः कुर्वन्, अविच्छेदात्सायं प्रातश्चानुभूतचन्द्रापीडदर्शनसुखो दुःखान्यगणयन्, नरपतिः सपरिवारः समं देव्या शुकनासेन च तत्रैवातिष्ठत्" इति।

एवं च कथयित्वा भगवान् जाबालिः, जराभिभवविच्छायं स्मितं कृत्वा, ताञ्छ्रावकानवादीत् — 'दृष्टमायुष्मद्भिरिदमन्तःकरणापहारिणः कथारसस्याक्षेपसामर्थ्यम्। यत्कथयितुं प्रवृत्तोऽस्मि, तत्परित्यज्यैव कथारसात्कथयन्नतिदूरमतिक्रान्तोऽस्मि। तत् यः स कामोपहतचेताः स्वयंकृतादेवाविनयाद्दिव्यलोकतः परिभ्रश्य, मर्त्यलोके वैशम्पायननामा शुकनाससूनुरभवत्, स एवैष पुनः स्वयंकृतेनाविनयेन कोपितस्य पितुराक्रोशात् महाश्वेताकृताच्च सत्याभिध्यानादस्यां शुकजातौ पतितः' इति।

एवं वदत्येव भगवति जाबालौ, बाल्येऽपि मे सुप्तप्रबुद्धस्येव पूर्वजन्मान्तरोपात्ताः समस्ता एव विद्या जिह्वाग्रेऽभवन्। उपदेशाय मनुजस्येव चेयं विस्पष्टवर्णाभिधाना भारती संपन्ना। किं बहुना। मनुष्यशरीरात् ऋते सर्वमन्यत्तत्क्षणमेव मे महाश्वेतानुरागादिकमुपगतम्। तथा चोत्सुकान्तरात्मा भगवन्तं जाबालिं कथमपि शनैः शनैर्व्यज्ञापयम् — 'भगवन्, त्वत्प्रसादादाविर्भूतज्ञानोऽस्मि संवृत्तः।

स्मृताः खलु मया सर्व एव पूर्वबान्धवाः। स्मृत्वा च तान् स्फुटतीव मे हृदयम्। न च तान्स्मृत्वापि तथा, यथा चन्द्रापीडम्; यस्य मदुपरतिश्रवणमात्रकात्स्फुटितं हृदयम्। तत्तस्यापि जन्माख्यानेन प्रसादं करोतु भगवान्, येनायं तिर्यग्योनिवासोऽपि मे तेन सहैकत्र वसतो न पीडाकरः संजायते' इति। एवं च विज्ञापितो भगवान् जाबालिः सस्नेहकोपगर्भं प्रत्यवादीत्—'दुरात्मन्, ययैतावतीं दशामुपनीतोऽसि, कथं तामेव तरलहृदयतामनुबध्नासि। अद्यापि पक्षावपि नोद्भिद्येते। तत्संचरणक्षमस्तु तावद्भव। ततो मां प्रक्ष्यसि' इति। एवमुक्ते भगवता, समुपजातकुतूहलो हारीतः पप्रच्छ—'तात, महानयं विस्मयो मे। कथय, कथमस्य मुनिजातौ वर्तमानस्य तादृशी कामपरता जाता? यया जीवितमपि न संधारयितुं पारितम्। कथं च दिव्यलोकसंभूतस्य तथा स्वल्पमायुः संवृत्तम्?' ।

एवं च पृष्टः सूनुना भगवाञ्जाबालिः प्रत्यवादीत्—'स्पष्टमेवात्र कारणं वत्स। अयं हि कामरागमोहमयादल्पसारात्स्त्रीवीर्यादेव केवलादुत्पन्नः। श्रुतौ च पठ्यत एतत्—यादृशाद्वै जायते, तादृगेव भवतीति। लोकेऽपि च प्रायः कारणगुणभाञ्ज्येव कार्याणि दृश्यन्ते। तथा चैतदायुर्वेदेऽपि श्रूयते। तदयमुत्पन्न एवेदृशः, येनास्य तादृशी कामपरता जाता, मरणं च तथोपनतम्। अधुनापि तादृश एवाल्पायुरयम्। शापावसानोत्तरकालमस्याक्षयेणायुषा योगो भविष्यति। तावदियं कथास्ताम्। रसाक्षेपादचेतितैवास्माभिः प्रभातप्राया रजनी। प्रभाविरहादनुन्मृष्टरजतदर्पणाभमिदमपरान्तावलम्बि वर्तते रजनिकरबिम्बम्। एष पम्पासरःशायिनां प्रबोधाशंसी समुच्चरति कोलाहलः

श्रोत्रहारी विहंगमानाम्। प्रत्यासन्ना अग्निविहारवेला' इत्यभिदधान एव गोष्ठीं भङ्क्त्वोदतिष्ठत्।

अथोत्थिते भगवति जाबालौ, वीतरागापि समस्तैव सा तपस्विपरिषत् कथारसाद्विस्मृतगुरूचितप्रतिपत्तिः, शृण्वतीवोत्कण्टकितकाया, स्तम्भितेव चिरमिव स्थित्वा, यथास्थानं जगाम। हारीतस्तु मामात्मपर्णशालां नीत्वा, प्राभातिकक्रियाकरणाय निर्ययौ। निर्गते च तस्मिन्, तेन सर्वकार्याक्षमेण तिर्यग्जातिपतनेन पीडितान्तरात्मा, चिन्तां प्राविशम्—'अत्र तावदनेकभवसुकृतशतसहस्राधिगम्यं मानुष्यकमेव दुर्लभम्। तत्राप्यपरं सकलजातिविशिष्टं ब्राह्मण्यम्। ततोऽपि विशिष्टतरमासन्नामृतपदं मुनित्वम्। तस्यापि विशेषान्तरं किमपि दिव्यलोकनिवासित्वम्। तद्येनैतावतः स्थानात्स्वदोषैरात्मा पातितः, तेन कथमधुना सर्वक्रियाविहीनेनास्यास्तिर्यग्जातेः समुद्धृतः स्यात्। तन्निष्प्रयोजनेनामुना जीवितेन किं मे परिरक्षितेन। तत्परित्यजाम्येतच्छरीरम्। पूर्यतामस्मद्व्यसनदानैकचिन्तादुःस्थितस्य विधेर्मनोरथः' इति। एवं च जीवितपरित्यागचिन्तानिमीलितं मां समुच्छ्वासयन्निव हारीतोऽभ्यधात्—'भ्रातर्वैशम्पायन, दिष्ट्या वर्धसे। पितुस्ते भगवतः श्वेतकेतोः पादमूलात्कपिञ्जलस्त्वामेवान्विष्यन्नायातः' इति।

अहं तु तच्छ्रुत्वा 'क्वासौ' इति वदन्नेव, अग्रतो गगनागमनवेगात् अयथास्थितजटाकलापम्, मदवलोकनदुःखोद्गतं च बाष्पजललवविसरमीक्षणाभ्यां युगपदुत्सृजन्तम्, समुज्झितक्लेशमपि मदर्थे क्लिश्यन्तम्, कृतज्ञम् अकृतज्ञः, वचनकरम् अनाश्रवः, महात्मानं दुरात्मा, कपिञ्जलमद्राक्षम्। दृष्ट्वा च तमवदम्— 'सखे कपिञ्जल,

एवं जन्मद्वयान्तरितदर्शनमपि त्वां दृष्ट्वा किं सरभसमुत्थाय दूरत एव प्रसारितभुजद्वयो गाढालिङ्गनेन सुखमनुभविष्यामि। किं करेणावलम्ब्यासनपरिग्रहं कारयिष्यामि' इति। एवमात्मानमनुशोचन्तमेव मां कपिञ्जलः करद्वयेनोत्क्षिप्य, भूयसा मन्युवेगेनोत्तमाङ्गे कृत्वा मच्चरणौ, इतरवदरोदीत्।

तथा रुदन्तं तु तं वाङ्मात्रप्रतीकारः पुनरवदम्—'सखे कपिञ्जल, सकलक्लेशपरिभूतस्य पापात्मनो ममेदं युज्यते, यत्त्वया प्रारब्धम्। त्वं पुनर्बालोऽपि न स्पृष्ट एवामीभिः संसारबन्धात्मकैर्दोषैः। तत्किमधुना मूढजनगतेन वर्त्मना। समुपविश्य तावत्कथय यथावृत्तं वार्ताम्। अपि कुशलं तातस्य? मद्वृत्तान्तमाकर्ण्य किमुक्तवान्? कुपितः, न वा?' इति।

स त्वेवमुक्तो मया, प्रक्षाल्य मुखमाख्यातवान्—"सखे कुशलं तातस्य। अयं चास्मद्वृत्तान्तः प्रथमतरमेव तातेन दिव्येन चक्षुषा दृष्टः। दृष्ट्वा च प्रतिक्रियायै कर्म प्रारब्धम्। समारब्ध एव कर्मणि, तुरगभावाद्विमुक्तो गतोऽस्मि तातस्य पादमूलम्। गतं च मां भयादनुपसर्पन्तमालोक्याहूयाज्ञापितवान्—'वत्स कपिञ्जल, परित्यज्यतां स्वदोषशङ्का। ममैवायं खलु शठमतेः सर्व एव दोषः; येन जानताप्युत्पत्तिसमय एव वत्सस्य कृते नेदमायुष्करं कर्म निर्वर्तितम्। अधुना सिद्धप्रायमेवेदम्। न दुःखासिका भावनीया। मत्पादमूले तावत्स्थीयताम्' इति। अद्य च प्रातरेवाहूय मामाज्ञापितवान्—'वत्स कपिञ्जल, महामुनेर्जाबालेराश्रमपदं सुहृत्ते प्राप्तः। जन्मान्तरस्मरणं चास्योपजातम्। तद्गच्छ संप्रति तं द्रष्टुम्। मदीयया चाशिषानुगृह्य वक्त-

र्योऽसौ—वत्स, यावदिदं कर्म परिसमाप्यते, तावत्त्वयास्मिन्नेव जाबालेः पादमूले स्थातव्यम्' इति । अपि च, त्वद्दुःखदुःखिताम्बा ते श्रीरपि तस्मिन्नेव कर्मणि परिचारिका वर्तते । तया तु शिरस्युपाघ्राय, एतदेव पुनः पुनः संदिष्टम्'' ।

एवमुक्त्वा दूयमानहृदयं तमवदम्—'सखे कपिञ्जल, किं दूयसे । त्वयापि मन्दपुण्यस्य मम कृते तुरङ्गमतामापन्नेन पराधीनवृत्तिना बहुतराण्येव दुःखान्यनुभूतानि । कथं सोमपानोचितेनामुनास्येन समुत्पादितसफेनरक्तस्रवाः खरखलीनक्षतयो विसोढाः । कथं च ब्रह्मसूत्रोद्वाहिनि देहेऽस्मिन्वर्ध्रोत्पीडनकृताः पीडाः समुपजाताः' इति । एभिरन्यैश्च पूर्ववृत्तान्तालापैस्तत्कालविस्मृततिर्यग्जातिदुःखः सुखमतिष्ठम् ।

उपरोहति च मध्याह्नं सवितरि, कृताहारः कपिञ्जलः क्षणमिव स्थित्वा मामब्रवीत्—'अहं हि तातेन त्वा समाश्वासयितुम्, जाबालिपादमूलात् आ कर्मपरिसमाप्तेर्न त्वया चलितव्यमित्येतच्चादेष्टुं विसर्जितः । अन्यत्, अहमपि तत्रैव कर्मणि व्यग्रतर एव । तद्व्रजामि संप्रति' इति । अहं तु तच्छ्रुत्वा विषण्णवदनस्तं प्रत्यवदम्—'सखे कपिञ्जल, एवं गते किं ब्रवीमि । किं तातस्याम्बाया वा संदिशामि । सर्वं त्वमेव वेत्सि' इति । स त्वेवमुक्तो मया, पुनः पुनस्तत्रावस्थानाय मां संविधाय, अन्तरिक्षमतिक्रम्य, क्वाप्यदर्शनमगात् । गते च तस्मिन्, हारीतो निर्वर्तितस्नानादिक्रियाकलापः सन्, आत्मनैव सहापराह्णसमये पुनर्मामाहारमकारयत् ।

एवं संवर्ध्यमानः, कतिपयैरेव दिवसैरुत्पन्नोत्पतनसामर्थ्यः,

'गमनक्षमस्तु संवृत्तोऽस्मि । तत्र नाम चन्द्रापीडोत्पत्तिपरिज्ञानम् । महाश्वेता पुनः सैवास्ते । भवतु, तत्रैव गत्वा तिष्ठामि' इति निश्चित्य, एकदा प्रातर्विहारनिर्गत एवोत्तरां ककुभं गृहीत्वावहम् । अबहुदिवसाभ्यस्तगमनतया स्तोकमेव गत्वा, अवाशीर्यन्तेव मेऽङ्गानि श्रमेण । तदवस्थश्च शिथिलायमानपक्षतिः, 'अत्र पतामि, अत्र पतामि' इति परवानेवान्यतमस्य सरस्तीरतरुनिकुञ्जस्योपर्यात्मानममुञ्चम् । चिरादिवोन्मुक्ताध्वक्लमः, अध्वश्रमनिःसहान्यङ्गानि विश्रमयितुमन्यतमां शाखामारुह्य स्थितः सन्, अध्वश्रमसुलभां निद्रामगच्छम् । चिरादिव च लब्धप्रबोधो बद्धमात्मानमपश्यम् । अग्रतश्च पाशविरहितमिव कालपुरुषम्, आशये केशेषु चास्निग्धम्, वपुषि वचसि च परुषम्, पुरुषमद्राक्षम् । आलोक्य च तं तादृशम्, आत्मन उपरि निष्प्रत्याश एवापृच्छम् — 'भद्र, कस्त्वम्? किमर्थं वा त्वया बद्धोऽस्मि? यदि आमिषतृष्णया, तत्किमिति सुप्त एव न व्यापादितोऽस्मि । किं मया निरागसा बन्धदुःखमनुभावितेन । अथ केवलमेव कौतुकात्, ततः कृतं कौतुकम् । मुञ्चतु मामिदानीं भद्रमुखः' । एवमुक्तः स मामुक्तवान्—'महात्मन्, अहं खलु क्रूरकर्मा जात्या चाण्डालः । न च मया त्वमामिषलोभेन कुतूहलेन वा बद्धः । मम खलु स्वामी पक्कणाधिपतिः । तस्य दुहिता कौतुकमये प्रथमे वयसि वर्तते । तस्यास्त्वं केनापि दुरात्मना कथितः । तया च श्रुत्वा, उत्पन्नकौतुकात्त्वद्ग्रहणाय बहव एवापरे मादृशाः समादिष्टाः । तदद्य पुण्यैर्मयासादितोऽसि । तदहं तत्पादमूलं त्वां प्रापयामि । बन्धे मोक्षे चाधुना सा प्रभवति' इति ।

अहं तु तच्छ्रुत्वा संविग्नान्तरात्मा चेतस्यकरवम्—'अहो मे मन्दपुण्यस्य दारुणतरः कर्मणां विपाकः, येन मया म्लेच्छजातिभिरपि दूरतः परिहृतप्रवेशमधुना पक्कणं प्रवेष्टव्यम्, चण्डालबालकजनस्य क्रीडनीयेन च भवितव्यम्। दुरात्मन् पुण्डरीकहतक, धिग्जन्मलाभं ते, यस्य कर्मणामयमीदृशः परिणामः। किमर्थं प्रथमगर्भ एव न सहस्रधा शीर्णोऽसि' इत्येतानि चान्यानि च चेतसा विलप्य, पुनस्तमभ्यर्थनादीनमवदम्—'भद्रमुख, जातिस्मरो मुनिरस्मि जात्या। तत्त्वापि मामस्मान्महतः पापसंकटादुद्धृत्य धर्मो भवत्येवादृष्टसुखहेतुः। दृष्टेऽपि च, केनचिदपरेणादृष्टस्य मन्मुक्तिकृतः प्रत्यवायो नास्त्येव। तन्मुञ्चतु मां भद्रमुखः' इत्यभिदधानश्च पादयोरपतम्। स तु विहस्य मामब्रवीत्—रे मोहान्ध, यस्य शुभाशुभकर्म साक्षिभूताः पञ्च लोकपालास्तवैवात्मशरीरस्थिता न पश्यन्ति, सोऽन्यस्य भयादकार्यं नाचरति। तन्नीतोऽसि मया स्वाम्याज्ञया' इति। एवमभिदधान एव मामादाय पक्कणाभिमुखमगच्छत्।

अहं तु 'केषां पुनः कर्मणामिदं मे फलम्' इत्यन्तरात्मनाभिध्यायन्, प्राणपरित्यागं प्रति कृतनिश्चयोऽभवम्। नीयमानश्च तथा तेन, नानाविधग्राहकविहङ्गवाचालनकुशलैः कौलेयकमुक्तिसंचारणचतुरैश्चण्डालशिशुभिर्बृन्दशो दिशि दिशि मृगया क्रीडद्भिर्दूरत एवावेद्यमानम्, सर्वतः करङ्कप्रायवृतिनगटम्, धवलीप्रायवाहनम्, स्त्रीमद्यप्रायपुरुषार्थम्, संनिवेशमिव सर्वश्मशानानाम्, पत्तनमिव सर्वपापानाम्, स्मर्यमाणमपि भयंकरं, पक्कणमपश्यम्।

दृष्ट्वा च तं समुत्पन्नघृणोऽन्तरात्मन्यकरवम्—'अपि नाम सा

चाण्डालदारिका दूरत एव मामालोक्य, उत्पन्नकरुणा मोचयेत्? न जातिसदृशमाचरिष्यति? भविष्यन्त्येवंविधानि मे पुण्यानि? न निमेषमप्यत्र पदं कुर्याम्' इत्येवं कृताशंसमेव मा नीत्वा स चण्डालस्तस्यै चण्डालदारिकायै दर्शितवान्। सा तु प्रहृष्टतरवदना स्वकरयुगेनादाय माम् 'आः पुत्रक, प्राप्तोऽसि। सांप्रतं क्वापरं गम्यते। व्यपनयामि ते सर्वमिदं कामचारित्वम्' इत्यभिदधानैव मनागुद्घाटितद्वारे दारुपञ्जरे समं महाश्वेतावलोकनमनोरथैराक्षिप्य, अर्गलितद्वारा 'अत्र निर्वृतः संप्रति तिष्ठ' इत्यभिधाय, तूष्णीमस्थात्।

अहं तु तथा संरुद्धश्चेतस्यकरवम्—'महासंकटे पतितोऽस्मि। यदि तावदावेदितात्मावस्थः शिरसा प्रणिपत्य मुक्तये विज्ञापयाम्येनाम्, तदा, य एव मे गुणो दोषतामापद्य बन्धायोपजातः, स एव संवर्धितो भवति। 'साधु जल्पति' इत्येवाहमनया ग्राहितः। कास्या मदीयया बन्धनपीडया पीडा। नाहमस्यास्तनयः, न भ्राता, न बन्धुः। अथ मौनमालम्ब्य तिष्ठामि। तत्रापि शाठ्यप्रकुपिता कदाचिदितोऽप्यधिकामवस्था प्रापयति माम्। नृशंसतमा हि जातिरियम्। अथवा, वरमितोऽप्यधिकमुपजातम्, न पुनश्चण्डालैः सह वागपि विमिश्रिता। अपि च, गृहीतमौनं निर्वेदात्कदाचिन्मुञ्चत्येव। वदंस्तु पुनर्न मोक्तव्य एवाहमनया। अपि च, यद्दिव्यलोकभ्रंशः, यन्मर्त्यलोके जन्म, यत्तिर्यग्जातौ पतनम्, यच्चाण्डालहस्तागमनम्, यच्चेदमेवंविधं पञ्जरबन्धदुःखम्, सर्व एवायमनियतेन्द्रियत्वस्यैव दोषः। तत्किमेकया वाचा। सर्वेन्द्रियाण्येव नियमयामि' इति निश्चित्य, मौनग्रहणमकरवम्।

उपनीतेऽपि च पानाशने, तं दिवसमनशनेनैवात्यवाहयम्। अन्येद्युश्चातिक्रामत्यशनकाले मे दूयमाने च हृदये, सा स्वपाणिनोपनीय नानाविधानि पक्वान्यपक्वानि च फलानि, सुरभि शीतलं च पानीयम्, स्निह्यन्तीवावोचत्—'क्षुत्पिपासार्दितानां हि पशुपक्षिणां निर्विचारचित्तवृत्तीनामुपनतेष्वाहारेष्वनुपयोगो न संभवत्येव। तत्, यद्येवंविधस्त्वं कोऽपि भोज्याभोज्यविवेककारी पूर्वजातिस्मरोऽस्मदीयमाहारं परिहरसि, तथापि तावद्भक्ष्याभक्ष्यविवेकरहितायां तिर्यग्जातौ वर्तमानस्य ते किं वा अभक्ष्यम्। प्रथममेवात्मा न विवेके स्थापितः। अधुना स्वकर्मोपात्तजातिसदृशमाचरतस्ते नास्त्येव दोषः। न चेदृशं किंचिदप्याहाराय मयोपनीतम्, यादृशेन चाण्डालाशनशङ्का समुत्पद्यते। फलानि तु ततोऽपि प्रतिगृह्यन्त एव। पानीयमपि चाण्डालभाण्डादपि भुवि पतितं पवित्रमेवेत्येवं जनः कथयति। तत्किमर्थमात्मानं क्षुधा पिपासया वा पातयसि' इति। अहं तु तेन तस्या वचसा विवेकेन च विस्मितान्तरात्मा, क्षुत्पिपासोपशमायाशनक्रियामङ्गीकृतवानस्मि। मौनं तु पुनर्नात्याक्षम्।

एवमतिक्रामति च काले, क्रमेण तरुणतामापन्ने मयि, एकदा प्रभातायां यामिन्याम्, उन्मीलितलोचनः, अद्राक्षमस्मिन्कनकपञ्जरे स्थितमात्मानम्। सापि चाण्डालदारिका यादृशी, तादृशी देवेनापि दृष्टैव। सकलमेव च तं पक्कणममरपुरसदृशमालोक्य, 'किमेतत्' इति कुतूहलात्प्रष्टुकामो यावन्न परित्यजाम्येव मौनम्, तावदेषा मामादाय देवपादमूलमायाता। तत् केयम्? किमर्थमनया चाण्डालतात्मनः

ख्यापिता? किमर्थं वाहं बद्धः? बद्धो वा किमर्थमिहानीतः? इत्यत्र वस्तुनि अहमपि देव इवानपगतकुतूहल एव" इति ।

राजा तु तच्छ्रुत्वा, समुपजाताभ्यधिककुतूहलः, तदाह्वानाय पुरः स्थितां प्रतीहारीमादिदेश । नचिरादेव प्रविश्य सा पुरस्तादूर्ध्वस्थितैव बभाषे—"भुवनभूषण रोहिणीपते, सर्वस्त्वयास्य दुर्मतेरात्मनश्च पूर्वजन्मवृत्तान्तः श्रुत एव । अत्रापि जन्मनि यथायं निषिद्धोऽपि पितुराज्ञामुल्लङ्घ्य वधूसमीपं प्रस्थितः, तथानेन स्वयमेव कथितम् । तदहमस्य दुरात्मनो जननी श्रीः । तथा प्रस्थितमेनं दिव्येन चक्षुषा दृष्ट्वा अस्य पित्रा अहं समादिष्टास्मि—'सर्व एव ह्यविनयप्रवृत्तोऽनुतापाद्विना न निवर्तते । तदयं ते तनयः कदाचिदस्या अपि तिर्यग्जातेरधस्तात्पतति । तद्यावदिदं कर्म न परिसमाप्यते, तावदेनं मर्त्यलोक एव बद्ध्वा धारय । यथा चानुतापोऽस्य भवति, तथा प्रतिविधेयमस्य' इति । तदस्य विनयायेदं विनिर्मितं मया । सर्वमधुना तत्कर्म परिसमाप्तम् । शापावसानसमयो वर्तते । शापावसाने च युवयोः सममेव सुखेन भवितव्यमिति त्वत्समीपमानीतो मयायम् । अत्रापि यच्चाण्डालजातिः ख्यापिता, तल्लोकसंपर्कपरिहाराय । तदनुभवतं संप्रति द्वावपि सममेव जन्मजराव्याधिमरणादिदुःखबहुले तनू परित्यज्य, यथेष्टजनसमागमसुखम्" इत्यभिदधानैव सा झटिति क्षितेर्गगनमुदपतत् ।

अथ राज्ञस्तद्वचनमाकर्ण्य संस्मृतजन्मान्तरस्य, "मकरकेतुर्जीवितापहरणाय प्रतिरोधक इवान्तरा पदं चकार । तत्पदाक्रान्तिनिर्वासितमिव कादम्बरीशरणमुपजगामान्तःकरणम् । तद्विरहशिखरजोरूषितमिव नयनयुगलमश्रुजलमुत्ससर्ज । आपाण्डुतां च सद्यो वदनला-

वण्यमयासीत्। आर्द्रस्य दारुणो द्रव इव दह्यमानस्याङ्गेभ्यो निरगमत्स्वेदः। एवं च विहतसर्वबाह्यक्रियस्य, तामेवाभिध्यायतः, तामेव पश्यतः, धर्मक्रियामप्यकुर्वाणस्य, आत्मन्यपि विगलितस्नेहस्य, किं बहुना, कादम्बरीसमागमेऽप्यनुद्यमस्य, केवलमस्य काष्ठीभूतदेहस्य, दाहक्षमो झटित्येवारुरोह परां कोटिं कामानलः, राज्ञ एव तुल्यावस्थस्य महाश्वेतोत्कण्ठया पुण्डरीकात्मनो वैशम्पायनस्य च।

तस्मिन्नेव चान्तरे, तत्संधुक्षणायेव सकलमेव प्रेममयमिव, उत्सवमयमिव, औत्सुक्यमयमिव जनयन् जीवलोकं परावर्तत सुरभिमासः; येन च पर्याकुलितहृदया कादम्बरी सायाह्ने स्नात्वा निर्वर्तितकामदेवपूजा, तस्य पुरश्चन्द्रापीडमतिसुरभिशीतलैः स्नपयित्वाम्भोभिः, भावार्द्रया दृशा सुचिरमालोक्योत्कण्ठानिर्भरा, सहसा तमभिपत्य मुकुलितनयनपङ्कजा जीवन्तमिव निर्भरं कण्ठे जग्राह।

चन्द्रापीडस्य तु कादम्बरीकण्ठग्रहेण सद्यः सुदूरगतमपि कण्ठस्थानं पुनर्जीवितं प्रत्यपद्यत। उषःपरामृष्टेन्दीवरमुकुललीलयोदमीलत्कर्णोन्मायतं चक्षुः। एवं च सुप्तप्रतिबुद्ध इव प्रत्यापन्नसर्वाङ्गचेष्टश्चन्द्रापीडः, तथा कण्ठलग्नां कादम्बरीं कण्ठे गृहीत्वा, भयोत्कम्पमानाङ्गयष्टिं न मोक्तुं न ग्रहीतुमात्मना पारयन्तीमवादीत् — 'भीरु, परित्यज्यतां भयम्। प्रत्युज्जीवितोऽस्मि तवैवामुना कण्ठग्रहेण। त्वं खल्वमृतसंभवादप्सरसां कुलादुत्पन्ना। तदेतावन्त्येव दिनानि पाणिना ते स्पृश्यमानोऽपि न यत्प्रत्युज्जीवितोऽस्मि, तच्छापदोषात्। अद्य तु स मे द्वितीयवारं व्यपगतः शापः। परित्यक्ता सा मया त्वद्विरहदुःखदायिनी मानुषी शूद्रकाख्या तनुः। एषापि च 'तवास्यां रुचिरुत्पन्ना' इति

त्वत्प्रीत्या प्रतिपन्ना पालिता च । तदयं लोकश्चन्द्रलोकश्च ते द्रावप्यधुना चरणतलप्रतिबद्धौ । अपि च, प्रियसख्या अपि ते महाश्वेतायाः प्रियतमो मयैव सह विगतशापः संजातः' इत्यभिदधत्येव चन्द्रापीडशरीरान्तरितवपुषि चन्द्रमसि, तादृशेनैव वेषेण—यादृशेन महाश्वेतोत्कण्ठयोपरतः — तथैव कण्ठेनैकावलीं धारयन्, अम्बरतलादवतरन् अदृश्यत कपिञ्जलकरावलम्बी पुण्डरीकः ।

चन्द्रापीडस्तु तं कण्ठे गृहीत्वाब्रवीत्—'सखे पुण्डरीक, यद्यपि प्राग्जन्मसंबन्धाज्जामातासि, तथाप्यनन्तरजन्माहितसुहृत्स्नेहसद्भावेनैव मया सह वर्तितव्यं भवता' इत्येवं वदत्येव चन्द्रापीडे, चित्ररथहंसौ दिष्ट्या वर्धयितुं केयूरको हेमकूटमगमत् । मदलेखापि धावमाना निर्गत्य मृत्युंजयजपव्यग्रस्य तारापीडस्य विलासवत्याश्च पादयोः पतित्वा 'देव देव्या सह दिष्ट्या वर्धसे । प्रत्युज्जीवितो युवराजः समं वैशम्पायनेन' इत्यानन्दनिर्भरमुच्चैर्जगाद । राजा तु तच्छ्रुत्वा हर्षपरवशो विलासवतीं कण्ठेऽवलम्ब्य, शुकनासं कण्ठे संभावयन्, तत्रैवागच्छत् । चन्द्रापीडस्तु तथा हर्षपरवशं पितरमालोक्य, पुरेव चरणयोरपतत् । अथ सत्वरापसृतः, तं तथा प्रणतमुन्नमय्य तारापीडोऽभ्यधात् — 'पुत्र, यद्यपि पिताहं तव शापदोषात्स्वपुण्यैर्वा संजातः, तथापि जगद्वन्दनीयो लोकपालस्त्वम् । अपि च, मय्यपि नमस्यो योंऽशः, सोऽपि मया त्वय्येव संक्रामितः । तदुभयथापि त्वमेव नमस्कार्यः' इत्यभिदधदेव, समं राजपुत्रलोकसहस्रैः प्रतीपमस्य पादयोरपतत् । विलासवती तु तं पुनः शिरसि पुनर्ललाटे पुनश्च कपोलयोश्चुम्बित्वा, गाढतरं सुचिरमालिलिङ्ग । उन्मुक्तश्च मात्रा, उपसृत्य पुनः

पुनः कृतनमस्कारः, शुकनासं प्रणनाम। आशीःसहस्राभिवर्धितश्च तेन, आत्मनोपसृत्य यथानुक्रमं पित्रोः शुकनासस्य मनोरमायाश्च 'एष वो वैशम्पायनः' इति पुण्डरीकमदर्शयत्।

तस्मिन्नेव च प्रस्तावे, समुपसृत्य कपिञ्जलः शुकनासमवादीत्--'एवं संदिष्टमार्यस्य भगवता श्वेतकेतुना—अयं खलु पुण्डरीकः संवर्धित एव केवलं मया। आत्मजः पुनस्तव। अस्यापि भवत्स्वेव लग्नः स्नेहः। तत् 'वैशम्पायन एवायम्' इत्येवमवगत्य, अविनयेभ्यो निवारणीयः; 'परोऽयम्' इति कृत्वा नोपेक्षणीयः। यच्चापगतशापोऽप्यात्मसमीपं नानीतः, तत्तवैवायमिति। अन्यच्च, आत्मानमस्मिन्नाचन्द्रकालीनायुषि स्थापयित्वा कृतार्थस्य, संप्रत्यस्माद्दिव्यलोकादप्युपरिष्टाद्गन्तुमुद्यतं मे सत्त्वाख्यं ज्योतिः' इति। शुकनासस्तु प्रत्यवादीत्—'कपिञ्जल, सकलजगदाशयज्ञेन सता भगवता किमित्यादिष्टम्। सर्वथा स्नेहस्यायमसंतोषः' इत्येवंविधैश्च पूर्वजन्मवृत्तान्तानुस्मरणालापैः सर्वेषामेव तेषामचेतितैव सा क्षणदा प्रभाता। प्रातरेव च सकलगन्धर्वलोकानुगतौ समं मदिरागौरीभ्यां चित्ररथहंसौ तत्रैवाजग्मतुः। आगतयोश्च तयोस्तारापीडशुकनासाभ्यां सहानुभूतसंबन्धकोचितसंवादकथयोः सहस्रगुण इव महोत्सवः प्रावर्तत।

अथ प्रवर्तमान एव तस्मिन्, चित्ररथस्तारापीडमवादीत् —'विद्यमाने स्वभवने किमर्थमयमरण्ये महोत्सवः क्रियते। अपि च, यद्यप्यस्माकमयमेव परस्पराभिरुचिनिष्पन्नो धर्म्यो विवाहः, तथापि लोकसंव्यवहारोऽनुवर्तनीय एव। तद्गम्यतां तावदस्मदीयमवस्थानम्। ततः स्वभूमिं चन्द्रलोकं वा गमिष्यथ'। तारापीडस्तु तं प्रत्यवादीत्—

'गन्धर्वराज, यत्रैव निरतिशयं संपत्सुखम्, तदेव वनमपि भवनम्। तदीदृशं क्वापरत्र मया संपत्सुखं प्राप्तम्। अन्यच्च, संप्रति सर्वगृहाण्येव मया जामातरि ते संक्रामितानि। तद्वयस्य, वधूसमेतं तमेवादाय, गम्यतां गृहसुखानुभवनाय' इति। चित्ररथस्तु तथाभिहितः, चन्द्रापीडमादाय हेमकूटमगात्। गत्वा च चित्ररथः कादम्बर्या सह समग्रमेव स्वं राज्यं चन्द्रापीडाय न्यवेदयत्। पुण्डरीकायापि समं महाश्वेतया निजपदं हंसः। तौ तु हृदयरुचितवधूलाभमात्रकेणैव कृतार्थौ न किंचिदप्यपरं प्रत्यपद्येताम्।

अन्यदा निर्वृतापि कादम्बरी, विषण्णमुखी, चन्द्रापीडमूर्तिं चन्द्रमसमप्राक्षीत् —— 'आर्यपुत्र, सर्वे खलु वयं मृताः सन्तः प्रत्युज्जीविताः परस्परं संघटिताश्च। सा पुनर्वराकी पत्रलेखास्माकं मध्ये न दृश्यते। न विद्मः——किं तस्याः केवलाया वृत्तम्' इति। स तु प्रत्यवादीत् ——'प्रिये, कुतोऽत्र। सा हि खलु मद्दुःखदुःखिनी रोहिणी शप्तं मामुपश्रुत्य 'कथं त्वमेकाकी मर्त्यलोकनिवासदुःखमनुभवसि' इत्यभिधाय, निवार्यमाणापि मया, प्रथमतरमेव मच्चरणपरिचर्यार्थं मर्त्यलोके जन्माग्रहीत्। इतश्च जन्मान्तरं गच्छता मया मदुपरमसमुन्मुक्तशरीरा पुनरपि मर्त्यलोकमवतरन्ती बलादावर्ज्यात्मलोकं विसर्जिता। तत्र पुनस्तां द्रक्ष्यसि' इति। कादम्बरी तु तच्छ्रुत्वा रोहिण्यास्तयोदारतया पतिव्रततया च विस्मितहृदया, परं लज्जिता, न किंचिदपि वक्तुं शशाक।

एवं च चन्द्रापीडस्तत्र दशरात्रं स्थित्वा, परितुष्टहृदयाभ्यां श्वशुराभ्यां विसर्जितः, पितुः पादमूलमाजगाम।

आगत्य च समकालमेवानुभूतक्लेशं राजलोकमात्मसमं कृत्वा, समारोपितराज्यभारः पुण्डरीके, कदाचिज्जन्मभूमिस्नेहादुज्जयिन्याम्, कदाचिद्गन्धर्वराजगौरवेण हेमकूटे, कदाचिद्रोहिणीबहुमानेन चन्द्रलोके, कादम्बरीरुच्या च सर्वत्रैवापरेष्वपि रम्यतरेषु तेषु तेषु स्थानेषु, न केवलं चन्द्रमाः, परस्पराविर्योगेन सर्व एव सर्वकालं सुखान्यनुभवन्तः परां कोटिमानन्दस्याध्यगच्छन् ।